एकादशस्कंधसारंभः

भा०ए०
१

श्रीसिद्धिविनायकायनमः॥ ॐनमः परमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनि
वासायश्रीरामाय विजयंतेपरानंदकमलपादरजःस्रजः। याभूतामूर्द्धि जायंतेमहेंद्रादिमहस्रजः॥१
त्र्येकत्रिंशदध्यायैर्मुक्तिरेकादशेततः॥ जायंतेयेतिहासाद्यैः समासव्यासरूपतः॥२ नारदोवसुदेवा
यसमासेनन्यवर्णयत्॥ भगवानुद्धवायाथविस्तरेणोपपत्तिभिः॥३॥ तत्रतुप्रथमेऽध्यायेयदुवंशस्यसंक्षयः
उपक्षिप्तोविरागायमौशलव्यपदेशतः॥४॥ प्रवृत्तिः परानन्दकलाक्रीडानुवर्तिनी॥ तन्निवृत्त्यापरान
न्दपदारोहोनुवर्ण्यते॥५॥ एवंतावद्दशमस्कंधेभूभारावतारणायनिजविभूतिविभूषितयदुवंशस्य
यदुवंशावतारितसकलसुरांशस्यभगवतः श्रीकृष्णस्यैतदुचितप्रवृत्तिविडम्बनेनतत्कृतचरणस्मर
णादिपराणांपरेधामानन्दकारणांक्रीडानिरूपिता॥ अथेदानीमुपरमितयोगमायावैभवस्यभक्ता
नामात्मतत्त्वोपदेशपूर्वकंक्रीडार्थंभूतत्वेअवतारितानांचाधिकारिणांसुरांशानांमौशलव्यपदेशे
नतत्तदधिकारिपदप्रापणपूर्वकंचतुर्व्यूहाद्यनुग्रहायनिजपदारोहोनिरूप्यते॥ तत्रकुरुक्षेत्रया
त्रायांअविरक्तस्यवसुदेवस्यकर्मणाकर्मनिर्हारोयथास्यान्नस्तदुच्यतामित्येवंकर्मयोगंपृच्छ
वतेनारदादिभिःकर्मयोगोनिरूपितः॥ कर्मणाकर्मनिर्हारापसाधुनिरूपितः॥ यच्छ्रद्धयाप्तवि
त्तेनशुक्लेनेज्येतपूरुषइत्यादिना॥ ॥श्रीमतेरामानुजायनमः॥ श्रीकृष्णायनमः॥ रामराम

राम
१

भा०ए०
२

एतद्वितत्तोत्तियेकोपिताइति। सपत्नैर्दुर्योधनादिभिः कोपिताः कोपंकारिताः सुबहु यथा भवति तथा बहुवारानि
त्यर्थः तदेवाह॥ दुर्द्यूतहेलनकचग्रहणादिभिरिति॥ दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुःशास
नेनद्रौपद्याः केशाकर्षणं॥ एतानि आदिर्येषां गरदानजतुगृहदाहादीनां तैः कृत्वा ये कोपिताः तान्पांडु
सुतान् निमित्तं कृत्वा इतरेतरतः उभयोः पक्षयोः समेतान् मिलितान् नृपान् हत्वा क्षितेर्भारं निरह
रत्। जहार यद्वा ये कोपिता येश्च कोपिताः तान् इतरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः॥ येतावत्स्म
येकोपिताः सुबहु पांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान्॥ कृत्वा निमित्तमितरेतर
तः समेतान् हत्वा नृपान्निरहरत् क्षितिभारमीशः॥२॥ भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहु
भिरचिंतयदप्रमेयः॥ मन्येऽवनेर्ननु गतोऽप्यगतं हि भारं यद्यादवं कुलमहो अविषह्यमास्ते॥३॥ रामरा

२

कटदैत्याः पूतनादयः तान् स्वयमेव हत्वा न ये तु दैत्याः बांधवकुरुजनास्थिताः तान् परस्परं निमित्तं विधायप्र
त्वा भूभारमपाकृतवानित्यर्थः॥२॥ अपि चा भूभारेत्यादि॥ अन्याश्च सुयो भारभूताः राजपृतनाः॥ राज्ञां
पृतनाः सेनाः॥ राज्ञः तेषां पृतनाश्चेति वा॥ स्वबाहुभिर्गुप्तैः परिरक्षितैर्यदुभिर्विवादादिच्छलेन नि
रस्य हत्वा॥ बाहुभिरिति बहुवचनं वस्तुतः चतुर्भुजाभिप्रायेण॥ नन्वेवं कृतकृत्यश्चिकीर्षतीति सौ।
त्वा यादवास्तस्मै कथं न द्रुह्यन्ति॥ तत्राह अप्रमेयः प्रमातुमशक्यः॥ चिंतामाह॥ मन्य इति॥ ननु
तिवितर्के अवनेर्भूमेर्यद्यपि लोकदृष्ट्या भारो गतः तथाप्यहमगतमेव मन्ये यद्यस्मात् अवि
षह्यं सोढुमशक्यं यादवं कुलमित्यनेनैव स्ववंशत्वात्स्वयं हननमनुचितमिति सूचितं॥३॥

राम
२

तेन च विशुद्धसत्त्वस्य श्रीकृष्णस्य रामोपरमेश्वरत्वेन ज्ञातवतः षड्भिर्नियनाध्यायैः श्रीकृष्णेनात्मतत्त्वमुपदिष्टं
व चोद्धवः समस्तैनार्थैतानेतदुपमन्यस्ते॥ यच्चः पुत्रान्समुद्दिश्य पतत्त्वग्रामगदात्दृतदृत्यादिना। तत्र विषय
भोगानिराश्यैनपुनस्तिरोहितमासीत्॥ तदेवेदानीं नारदमुखेन प्रथमं पंचाध्याय्या निरूप्यते॥ तत्र प्र
थमेऽध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापापदेशेनात्युन्नतविषयसुखानामप्यनित्यताप्र

श्रीबादरायणिरुवाच॥ कृत्वा दैत्यवधं कृष्णः सरामो यदुभि
र्वृतः॥ भुवोऽवतारयद्भारं जविष्ठं जनयन्कलिं॥१॥

तिपाद्यते। ततश्चतुर्भिर्निमिजायंतेयसंवादेन सपरिकरमात्मतत्त्वनिरूपणं॥ ततः षष्ठे भगवदुद्ध
वसंवादप्रस्तावः ततस्त्रयोविंशत्या उद्धवं प्रति भगवतस्तत्त्वनिरूपणं॥ ततो द्वाभ्यां मौश
लक्रीडेत्येवमेकत्रिंशताध्यायैरेकादशस्कंधस्य प्रवृत्तिः॥ तस्य च यथामति व्याख्यानमारभ्यते॥ तत्र
मौशलप्रसंगार्थं पूर्वस्कंधार्थमनुवदति श्लोकद्वयेन कृत्वेति॥ अवतारयदित्यवातारयदि
त्यडागमोऽद्भुतः॥ जविष्ठं वेगवत्तरं। अतिशीघ्रं हिंसापर्यवसायिनमित्यर्थः कलिं कलहं॥१॥

अब्रह्मण्येभ्यः अदातृभ्यो वा असेवकेभ्यो वा विप्राः कुप्यंति॥ ब्रह्मण्यस्तु न तथेत्याह। ब्रह्मण्यानामित्यादि
ना॥ किं च कोपे जाते पि कृष्णचेतसां कथमभूत् कथं प्रादुरभूदित्यर्थः॥ ८॥ अतः स्य सस्य निमित्तस्याभावा
न्निमित्तांतरं पृच्छति॥ यन्निमित्त इति एकात्मनामेकचित्तानां कथं भेदः कलहः॥ ९॥ ईश्वरेच्छैवात्र नि
मित्तमिति परिहरन्ति॥ बिभ्रदिति॥ सकलानां सुंदरवस्तूनां सन्निवेशो विन्यासविशेषो यस्मि

श्रीराजोवाच। ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां॥ विप्रशापः कथमभूद्वृष्णीनां कृष्ण
चेतसां॥ ८॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व
मे॥ ९॥ श्रीशुक उवाच॥ बिभ्रद्वपुः सकलसुन्दरसन्निवेशं कर्माचरन्भुवि सुमंगलमाप्त
कामः॥ आस्थाय धाम रममाण उदारकीर्त्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः॥ १०॥

३

न्तद्वपुर्बिभ्रत्॥ तर्हि किमिति सौंदर्यादिधर्ययपरः न सुमंगलं कर्माचरन्। तत्किं कयापि काम
नया न आप्तकामः॥ तर्हि किमिति कर्माचरति धाम द्वारवत्याख्यं गृहमास्थाय रममाणः
गृहे रममाणानां कर्म ग्राहयितुमित्यर्थः॥ ननु किमाप्तकामस्य गृहरत्या कर्मभिर्वा न वा ह॥
उदारकीर्त्तिः बहुफलप्रदा कीर्त्तिर्यस्य॥ कीर्त्तिं विना नार्थ इत्यर्थः॥ एवं परमैश्वर्येण वर्त्तमा
न एव कुलं संहर्तुमैच्छत॥ तत्कस्य हेतोः स्थितकृत्यशेषः स्थितः कृत्ये भूभारहरणे शेषो यस्य सः
॥१०॥

तर्हि तदपमेध्येतीत्यत आह नैवेति॥ अन्यतः देवादिभ्योपि यादवकुलस्य परिभवस्तिरस्कारो न भवेत्॥ कुतः मत्संश्र
यस्य मां संश्रयत्तद्वनि मत्संश्रयं स्वकुलं तस्य किं च विभवोन्नहनस्य विभवैर्गजतुरगादिभिः उद्धं स्वबलस्य॥ यद्वा
तर्हीदं किमिति संहर्तव्यं॥ तत्राह॥ विभवोन्नहनस्येति॥ तस्मादेवं करिष्यामीत्याह। अन्तः कलिमिति॥
शान्तिं उपशमं उपेमि॥ वर्तमानसामीप्ये वर्तमानवद्वा॥ उपेष्य॥ मी॥ तदनन्तरं धाम वैकुंठाख्यं उपयामी
त्यर्थः॥४॥ व्यवसितः कृतनिश्चयः॥ संजह्रे उपसंहृतवान्॥५॥ तदेवमवतारप्रयोजनं सर्वं संपाद्य स्व
लोकं जगामेत्याह॥ श्लोकद्वयेन स्वमूर्त्येति लोकानां लावण्यनिर्मुक्तिः स्यात् यया॥ यामपेक्ष्य लोके शुः

नैवान्यतः परिभवोस्य भवेत्कथंचिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यं॥ अन्तः कलिं यदुकुलस्य विधा
य वेणुस्तंबस्य वह्निमिव शान्तिमुपैमि धाम॥४॥ एवं व्यवसितो राजन् सत्यसंकल्प ईश्वरः॥ शापव्याजेन
विप्राणां संजह्रे स्वकुलं विभुः॥५॥ स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणां॥ गीर्भिस्ताः स्मरतां चि
त्तं पदैस्तानीक्षतां क्रियाः॥६॥ आच्छिद्य कीर्तिं सुश्लोकां वितत्य ह्यंजसा नु कौ॥ तमोनया तरिष्यंतीत्यगात्स्वं पद
मीश्वरः॥७॥

लावण्यं नास्तीत्यर्थः॥ यद्वा लोकेभ्यो लावण्यनिर्मुक्तिर्दानं यतः यत्संपर्कात् लोकाल्लावण्यवं
तो भवंतीत्यर्थः तया स्वमूर्त्या लोचनमाच्छिद्य आकृष्य॥ ततोन्यस्यावलोकने लोचनस्याप्रवृत्तेः तथा
स्वगीर्भिस्ताः गिरः स्मरतां चित्तं चाच्छिद्य॥ तथा पदैः तत्र तत्रांकितैः तानि पदानीक्षतामीक्षमाणानां अन्यतोग
मनादिकाः क्रियाश्चाच्छिद्य तदानींतनानां सर्वेषां चक्रादिप्रवृत्तीः स्वैकनिष्ठाः कृतेत्यर्थः॥६॥ किं च इत उत्त
॥रजनिष्यमाणानां संसारतारणाय कौ पृथिव्यां शोभनाः श्लोकाः सुश्लोकाः कवीनां यस्यां तां स्वकीर्तिं वितत्य
विस्तार्य अनया कीर्त्या अंजसा सुखेनैव तमो निश्चितं तमस्तरिष्यंतीत्यभिप्रेत्य ईश्वरः स्वं पदं स्थानमगादिति॥७॥

गलबद्धं चिताः॥१६॥ तस्मिन्नुदरे अयस्मयं लोहमयं॥१७॥ मंदभाग्यै रस्माभिः किमेतत्कृतं नः अस्मान्नु
किं वदिष्यति इति विह्वलिताः संतो मुशलमादाय गेहान् ययुः॥१८॥ राज्ञे उग्रसेनाय न चुक्रुश्माय १९
आरुक उग्रसेनः। सोपि श्रीकृष्णमपृष्ट्वैव पास्य नृपदिष्टवान्॥ अस्य मुशलस्य चूर्णं क्रियतामा॥

एवं प्रलब्धा मुनयस्तानूचुः कुपितान्नृप॥ जनयिष्यति वो मंदा मुशलं कुलनाशनं॥१६॥ तच्छ्रुत्वा
ते तिसंत्रस्ता विमुच्य सहसोदरं॥ साम्बस्य ददृशुस्तस्मिन्मुशलं खल्वयस्मयं॥१७॥ किं कृतं मंदभा
ग्यैर्नः किं वदिष्यंति नो जनाः॥ इति विह्वलिता गेहानादाय मुशलं ययुः॥१८॥ तच्चोपनीय सदसिप
रिम्लानमुखश्रियः॥ राज्ञ आवेदयांचक्रुः सर्वयादवसन्निधौ॥१९॥ श्रुत्वामोघं विप्रशापं दृष्ट्वा च
मुशलं नृप। विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः॥२०॥ तच्चूर्णयित्वा मुशलं यदुराजः स।
आहुकः॥ समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितं॥२१॥ कश्चिन्मत्स्योग्रसील्लोहं चूर्णानि त
रलैस्ततः॥ उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः॥२२॥ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः
सहार्णवे॥ तस्योदरगतं लोहं स शल्ये लुब्धको करोत्॥२३॥ भगवान्ज्ञातसर्वार्थ ईश्वरोपि त
दन्यथा॥ कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत॥२४॥ इति श्रीभागवते महापुराणे एकादशस्कं
धे प्रथमोध्यायः॥१॥

स्यावशेषितं लोहं च प्रास्यत्॥२१॥ तरलैस्तरंगैः॥२२॥ अन्यैर्मत्स्यैः सह
शल्ये शराग्रे॥२३॥ ज्ञाताः सर्वे अर्था येन सः ईश्वरोपि समर्थोपि सन्॥ अन्यथा कर्तुं नैकत्तं किं
त्वन्वमोदन यतः कालरूपी॥२४॥ एकादशप्रथमः॥।।१॥। ॥ ॥

कर्मार्थमाहुत्ताः कर्माणीति कृत्वा निसृष्टा मुनयः पिंडार
द्वारके क्रयोस्थितं च ब्रह्मशापनिमित्तं च कुमाह कर्माणीति ॥
कं समगमन्नित्यन्वयः । निसृष्टाः प्रस्थापिताः पूर्वोक्तामुदारकीर्तिं विस्तारयन्कर्माणि विशिनष्टि ॥ पुण्य
निवहानीत्यादिविभिः पदैः कानिचिदश्वमेधादिकर्माणि पुण्यमेव जनयंति पुत्रोपलालनादीनि त
त्वात्सुखमेव कुर्वंति प्रायश्चित्तादीनि पापमेव हरंति एतानि तु सर्वतो सुखानीत्याह ॥ पुण्यनि

कर्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा ॥ कालात्मना निवसता यदु ।
देवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ॥ ११ ॥ विश्वामित्रोऽसितः काण्वो दुर्वासा भृगुरंगिराः । कश्य
पो वामदेवोऽत्रिर्वसिष्ठो नारदादयः ॥ १२ ॥ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः ॥ उपसंगत्य पप्रच्छु
म
रविनीता विनीतवत् ॥ १३ ॥ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतं । एषा पृच्छति वो विप्रा अंतर्व
त्न्यसितेक्षणा ॥ १४ ॥ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः ॥ प्रसोष्यंती पुत्रकामा किंस्वित्संजनयि
ष्यति ॥ १५ ॥

वहानीति कीर्तनादिना पुण्यानि निर्वहंति प्रापयंतीति ॥ तथा सुमंगलानि प्रतिसुखात्म
कानि गायतो जगतः कलिमलापहराणीति कृत्वा ॥ मुनिप्रस्थापने हेतुः कालात्मना संहाररूपेण ॥ यदुदे
वगेहे निवसता स्वकृतं संजिहीर्षतेत्यर्थः ॥ पिंडारकं नाम नातिदूरे तीर्थविशेषं ॥ १२ ॥ उपसंगत्य पादग्र
हणं कृत्वा ॥ १३ ॥ प्रश्नप्रकारमाह ॥ इत्येनाने वेषयित्वेति ॥ हे अमोघदर्शनाः विप्राः ॥ एषा अंतर्वत्नी
गर्भिणी ॥ १४ ॥ वः युष्मान् साक्षात्प्रष्टुं विलज्जती लज्जमाना स्वमुखेन पृच्छति ॥ प्रसोष्यंती आसन्न
प्रसवा किंस्वित्संजनयिष्यतीति कन्यां वा पुत्रं वा तत्प्रब्रूत ॥ १५ ॥ ॥

नदेवंयद्यपिभवतआगमनमात्रेणैववयंकृतार्थास्तथापिपप्रकामः तवेतितवयैर्हृद्मैःप्रसन्नोभगवान्ता =
निस्पर्थः॥७॥ननुत्वत्तोपिकिमन्योभगवत्प्रसादपात्रमस्तितत्राह॥अहंकिलेति॥भुविप्रजार्थेपूज
यंपुत्रलाभप्रयोजनःसन्प्राजितवान्किलेतिसतीगर्हेभगवदुक्तमनुस्मरति॥८॥अतोयथा
मुच्येमहि॥तथानोस्माननुशाधिशिक्षयविचित्राणिव्यसनानियस्मिन्तस्मात्संसारात्॥तथावि

बहूंस्तथापिपप्रच्छामोधर्म्मान्भागवतांस्तव॥यान्श्रुत्वाश्रद्धयामर्त्योमुच्यतेसर्वतोभयात्॥७॥
अहंकिलपुरानन्तंप्रजार्थोभुविमुक्तिदं॥अपूजयंनमोक्षायमोहितोदेवमायया॥८॥यथावि
चित्रव्यसनाद्भवद्भिर्विश्वतोभयात्॥मुच्येमह्यंजसैवाद्धातथानःशाधिसुव्रत॥९॥श्रीशुकउ
वाच॥राजन्नेवंकृतप्रश्नोवसुदेवेनधीमता॥प्रीतस्तमाहदेवर्षिर्हरिःसंस्मारितोगुणैः॥१०॥श्री
नारदउवाच॥सम्यगेतद्व्यवसितंभवतासात्वतर्षभ॥यत्पृच्छसेभागवतान्धर्म्मांस्त्वंविश्व
भावनान्॥११॥श्रुतोनुपठितोध्यातआदृतोवानुमोदितः॥सद्यःपुनातिसद्धर्म्मोदेवविश्वद्रुहोपि
हि॥१२॥

एवतःसर्वतोभयंयस्मिन्तस्मात्।भवद्भिर्दैर्नुभूतैःअंजसाअनायासेन॥अद्धा
साक्षात्॥९॥हरेर्गुणैर्वर्णनीयत्वेनप्रस्तुतैःहरिंसंस्मारितइत्यर्थः॥१०॥प्रीतिमाविष्करोति॥
सम्यगितित्रिभिःपृच्छसेपृच्छसिविश्वभावनान्सर्वशोधकान्॥११॥आदृतःआस्तिक्येनगृही
तः॥अनुमोदितःपरैःक्रियमाणःसंस्तुतःसद्धर्म्मोभागवतोधर्म्मःदेवद्रुहेवसुदेवेत्यर्थः॥यद्वादे

द्वितीये निमिजायंतसंवादेनाह नारदः। धर्म्मान्भागवतान् भक्त्या वसुदेवाय पृच्छते॥ अभीक्ष्णं प्रस्थापि
पुनः पुनरवात्सीदित्यर्थः॥ ननु नारदस्य दक्षादिशापान्नैकत्र वासः संभवतीत्याशंक्याह॥ गोविंदभुज
गुप्तायामिति॥ न तस्यां शापादेः प्रभाव इत्यर्थः॥ कृष्णोपासने लालसा औत्सुक्यं यस्य सः॥१॥ यदुजने
मुक्तानामपीदृशमौत्सुक्यं तत्र को नु नाम न भजेदित्याह॥ को न्विति॥ इंद्रियवानिति इंद्रियवत्त्वमात्र
मन्वयत्राधिकारिविशेषणमित्यर्थः॥ सर्वतः सर्वेषु त्रिलोकेषु मृत्युर्यस्य सः॥२॥ यथा पित्रोर्यात्रागम
मनं अपत्यानां स्वस्त्ययमंगलाय॥ यथा च उत्तमश्लोकस्य वर्त्मभूतानां महतां यात्रा कृपणानां स्वस्त

श्रीशुक उवाच॥ गोविंदभुजगुप्तायां द्वारवत्यां कुरूद्वह॥ अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलाल
सः॥१॥ को नु राजन्निंद्रियवान्मुकुंदचरणांबुजं॥ न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः॥२॥ तमे
कदा तु देवर्षिं वसुदेवो गृहागतं॥ अर्चितं सुखमासीनमभिवाद्येदमब्रवीत्॥३॥ वसुदेव उवाच॥
भगवद्भवतो यात्रा स्वस्तये सर्वदेहिनां॥ कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनां॥४॥ भूतानां दे
वचरितं दुःखाय च सुखाय च॥ सुखायैव हि साधूनां त्वादृशामच्युतात्मनां॥५॥ भजंति ये यथा दे
वान्देवा अपि तथैव तान्॥ छायेव कर्म्मसचिवाः साधवो दीनवत्सलाः॥६॥

ये। तथा भगवद्रूपस्य
भवतो यात्रा सर्वदेहिनां स्वस्त्यय इति॥४॥ देवैरपि महतामुपमानमयुक्तमित्याह॥ भूतानां देवच
रितमिति देवचरितमतिवृष्ट्यादिना भूतानां दुःखायापि भवति॥ त्वादृशां त्वया सदृशानामच्यु
च्युत आत्मा येषां॥५॥ किं च असुखं कुर्वंतोऽपि देवा भजनानुसारेण कुर्वंति न तथा साधव इत्याह॥
भजंतीति छायेव यथा पुरुषो यावत्करोति तावदेव तस्य छायापि। तथा कर्म्मसचिवाः कर्मसहायाः॥६॥

भा०ए०
६

तेषां पारमहंस्यचरितमाह ॥ द्वाभ्यां ॥ त एत इति । भगवद्रूपं विश्वं पश्यंतः सदसदात्मकं स्थूलसूक्ष्मरूपं । त
च स्वात्मव्यतिरेकेण पश्यंतः ॥२२॥ अव्याहता अप्रतिहता इच्छा अभिप्रेता गतिर्येषां ते मुक्ता अनासक्ताः ॥२३॥
महात्मनो नि । मेर्वितायमानं अनुष्ठीयमानं । अजनाभे भारतवर्षे ॥२४॥ यजमानो निमिः ॥ अग्नय आह

कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोथ द्रुमिलश्चमसः करभाजनः ॥२१॥ त एते भग
वद्रूपं विश्वं सदसदात्मकं आत्मनोव्यतिरेकेण पश्यंतो व्यचरन्महीं ॥२२॥ अव्याहतेष्टगतयः सुर
सिद्धसाध्यगंधर्वयक्षनरकिंनरनागलोकान् ॥ मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विज
गवां भुवनानि कामं ॥२३॥ त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया ॥ वितायमानमृषिभिरजनाभे म
हात्मनः ॥२४॥ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप ॥ यजमानोग्नयो विप्राः सर्व एवोपतस्थिरे
२५॥ विदेहस्तानभिप्रेत्य नारायणपरायणान् ॥ प्रीतः संपूजयांचक्रे आसनस्थान्यथार्हतः ॥२६॥
तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव ॥ पप्रच्छ परमप्रीतः प्रश्रयावनतो नृपः ॥२७॥ विदेह उ
वाच ॥ मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः ॥ विष्णोर्भूतानि लोकानां पावनाय चरंति हि ॥२८॥

वनीयादयः विप्रा ऋत्विगादयः ॥२४॥ अभिप्रेत्य ज्ञात्वा ॥२६॥ स्वरुचैव रोचमानान् न त्वाभरणादिप्रका
शैः ब्रह्मपुत्रोपमान् सनत्कुमारादिसदृशान् ॥२७॥ परमप्रीत्या तद्दर्शनमभिनंदति द्वाभ्यां मन्य इति
ननु भगवतः पार्षदानां कथमत्रोपलब्धिस्तत्राह ॥ विष्णोरिति ॥ विष्णुभक्ता लोकपावनार्थं सर्वत्र नृप पर्यटंतीत्यर्थः ॥२८॥

राम
६

6

किंच त्वया महाननुपकारः कृत इत्याह ॥ त्वयेति ॥ पुण्ये श्रवणकीर्त्तने यस्य सः ॥१३॥ अत्रापि भगवद्धर्मनिर्णयेऽपि विदेह-
स्य जनकस्य १४ आर्षभाणां सुतत्वं सान्वयं विविच्य कथयन्ति सप्तभिः प्रियव्रत इति ॥१५॥ मोक्षधर्माणां प्रवर्त्ते-
नेच्छया अवतीर्णं वासुदेवांशमाहुः तस्य च वेदपारगं सुतशतमासीत् ॥१६॥ तेषामृषभसुतानां मध्ये नवयोगी-

त्वया परमकल्याणः पुण्यश्रवणकीर्त्तनः ॥ स्मारितो भगवानाद्यदेवो नारायणो मम ॥१३॥ अत्राप्युदाहरंती-
ममितिहासं पुरातनं ॥ आर्षभाणां च संवादं विदेहस्य महात्मनः ॥१४॥ प्रियव्रतो नाम सुतो मनोः स्वायंभु-
वस्य यः ॥ तस्याग्नीध्रस्ततो नाभिर्ऋषभस्तत्सुतः स्मृतः ॥१५॥ तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया ॥ अ-
वतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगं ॥१६॥ तेषां तु भरतो ज्येष्ठो नारायणपरायणः ॥ विख्यातं वर्षमेतद्य-
न्नाम्ना भारतमद्भुतं ॥१७॥ स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिं ॥ उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रि-
भिः ॥१८॥ तेषां नव नवद्वीपपतयोऽस्य समंततः ॥ कर्मतंत्रप्रणेतार एकाशीतिर्द्विजातयः ॥१९॥ नवाभव-
न्महाभागा मुनयो ह्यर्थशंसिनः ॥ श्रमणा वातरशना आत्मविद्याविशारदाः ॥२०॥

श्वराणां चरित्रं वक्तु-
मितरेषां चरित्रं ततो विविच्याह ॥ तेषामिति ॥ एतदजनाभं नाम वर्षं यस्य नाम्ना भारतमित्यद्भुतं वि-
ख्यातमासीत् ॥ एतेन तस्य धर्मातिरेको निरूपितः ॥१७॥ इमां पृथ्वीं गृहान्निर्गतः हरिमुपासीनः सेवमानः
सन् ॥१८॥ नव सुताः नवद्वीपपतयः नवानां ब्रह्मावर्त्तादिभूखण्डानां पतयः अस्य भारतवर्षस्य ॥ एकाशीतिः
सुताः कर्ममार्गप्रवर्त्तका ब्राह्मणाः अभवन् ॥१९॥ अर्थशंसिनः परमार्थनिरूपकाः ॥ श्रमणाः श्रमवन्तः आ-
त्माभ्यासे कृतश्रमा इत्यर्थः वातरशना दिगंबराः । आत्मविद्यायां विशारदाः निष्णाताः ॥२०॥ ॥

भा॰ ए॰
७

प्रथममात्यंतिकं क्षेमं कथयति। मन्यइति। न कुतश्चिद्भयं यस्मात्तदकुतश्चिद्भयं॥ अत्र संसारे असदात्मभा
वात् असतिदेहादावात्मभावनात्। नित्यं सर्वदा उद्विग्नबुद्धेः विश्वात्मना सर्वथा निःशेषं यत्र पादांबु
जोपासने भीर्निवर्त्तते तत्॥३३॥ भागवतधर्मलक्षणमाह। ये वै इति। मन्वादिमुखेन वर्णाश्रमादिध
र्मा उक्तास्तिरस्कृत्य स्वमुखेनैव भगवता अविदुषामपि पुंसां अंजः सुखेनैवात्मलब्धये ये वै उपा

कविरुवाच॥ मन्ये कुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं॥ उद्विग्नबुद्धेरसदात्मभावा
द्विश्वात्मना यत्र निवर्त्तते भीः॥३३॥ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये॥ अंजः पुंसामवि-
दुषां विद्धि भागवतान् हि तान्॥३४॥ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित्॥ धावन्निमील्य
वा नेत्रे न स्खलेन्न पतेदिह॥३५॥

याः प्रोक्ताः तान् भागवतधर्मान् विद्धि॥३४॥ अंजः पदेनोक्तं सुख-
करत्वं विवृणोति॥ यानास्थायाश्रित्य योगादिष्विव न प्रमाद्येत विघ्नैर्न विहन्येत किं च॥ निमील्य
नेत्रे धावन्नपि इह एषु भागवतधर्मेषु न स्खलेत् निमीलनं नामाज्ञानं॥ यथाहुः श्रुतिस्मृती उभे ने
त्रे विप्राणां परिकीर्त्तिते एकेन विकलः काणो द्वाभ्यामंधः प्रकीर्त्तित इति अज्ञात्वापीत्यर्थः। यथा
पदन्यासस्थानमतिक्रम्य शीघ्रं परतः पदन्यासेन गतिर्द्धावनं तद्वदत्रापि किंचित्किंचिदतिक्र
म्यातिक्रम्य शीघ्रमनुष्ठानं धावनं तथाभूतोऽपि न स्खलेत् न प्रत्यवायी स्यात्॥ तथा न पतेत्। फला

7

राम॰
७

मयादुर्ल्लभंत्वद्धं श्रद्धो भाग्यमित्याह । दुर्ल्लभ इति । बहवो देहाभवंतियेषांते देहिनो जीवास्तेषांक्षणभंगुरोपि
मानुषो देहो दुर्ल्लभः परमपुरुषार्थसाधनत्वात् वैकुंठः प्रियो येषांवैकुंठस्य वा प्रियास्तेषांदर्शनं ॥२९॥ हे
अनघा निरवद्याः भवतः युष्मानात्यंतिकं क्षेमं पृच्छामः यतः क्षणार्द्धकालभवोपि सत्संगः शेवधिर्निधिः नि
धिलाभे यथानंदो भवति तथात्र परमानंदद इत्यर्थः ॥३०॥ तदर्थं च भागवतान्धर्मान्ब्रूत यदि नोस्माकं श्रु

दुर्ल्लभो मानुषो देहो देहिनां क्षणभंगुरः ॥ तत्रापि दुर्ल्लभं मन्ये वैकुंठप्रियदर्शनं ॥२९॥ अत आत्यंतिकं
क्षेमं पृच्छामो भवतोनघाः ॥ संसारेस्मिन्क्षणार्द्धोपि सत्सङ्गः शेवधिर्नृणाम् ॥३०॥ धर्म्मान्भागवतान्ब्रूत
यदि नः श्रुतये क्षमं ॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥३१॥ नारद उवाच ॥ एवं ते निमि
नापृष्टा वसुदेव महत्तमाः ॥ प्रतिपूज्याब्रुवन्प्रीत्या ससदस्यर्त्विजं नृपम् ॥३२॥ ॥ ॥

तये श्रवणाय क्षमं योग्यं भवति कथंभूतान् । यैर्द्धर्म्मैः प्रपन्नाय भक्ताय अजो हरिः आत्मानमपि दास्यति ता
न् ॥३१॥ सदसदस्यैर्ऋत्विग्भिश्च वर्त्तमानं तेपि भगवद्धर्म्मश्रवणपरा बभूवुरित्यर्थः ॥ भगवद्धर्म्मांत ।
द्रूमायातत्तराणानि च ॥ ब्रह्मकर्म्मावतारे हाभक्तपाप्पयुगक्रमान् ॥ ज्ञातुं क्रमेणाकृतवान्नव
प्रश्नान्निमिर्न्नवाप्येकैकस्योत्तरं प्रोचुः कविमुख्या मुनीश्वराः ॥३२॥ ॥ ॥

ननुविषयविक्षिप्तस्य कुतोऽव्यभिचारिणी भक्तिः संभवति कुतस्तरामभयं तत्र न तावद्द्वितीयो नाम वास्तवोऽस्ति किंतु मनोविलासमात्रं अतो मनोनियमनेन भजनादभयं स्यादित्याह। अविद्यमानोपीति॥ द्वयः द्वैतप्रपंचः ध्यातुः पुंसः धिया मनसा स्वप्नमनोरथवद्यथेत्यर्थः तत्तस्मात्कर्माणि संकल्पयति विकल्पयति च यन्मनस्तन्निरुंध्यात्॥ नियच्छेत्॥ ततश्चैकया भक्त्या भजनादभयं स्यादित्यर्थः॥३८॥ एतदत्यंताशक्यमित्याशंक्य सुगममार्गमाह॥ शृण्वन्निति॥ तदर्थकानि तानि जन्मानि कर्माणि च अर्थो येषां

अविद्यमानोप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा॥ तत्कर्मसंकल्पविकल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात्॥३८॥ शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लोके॥ गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः॥३९॥ एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः॥ हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः॥४०॥

तानि॥ एतान्यपि साकल्येन ज्ञातुमशक्यानीत्याशंक्याह। यानि लोके गीतानि प्रसिद्धानि तानि शृण्वन् गायंश्च विचरेत्॥ असंगो निस्पृहः॥३९॥ एवं च भजतः संप्राप्तप्रेमलक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह एवमिति॥ एवंव्रतं व्रतं यस्य सः स्वप्रियस्य हरेर्नामकीर्त्या जातोऽनुरागः प्रेम यस्य सः अत एव द्रुतचित्तः श्लथहृदयः कदाचिद्द्रूपराजितं भगवंतमालक्ष्योच्चैर्हसति॥ एतावंतं कालमुपेक्षितोऽस्मीति रोदिति॥ अतौत्सुक्याद्रौतीति क्रोशति अतिहर्षेण गायति जितं जितमिति नृत्यति॥ किं दाम्भिकवत्परान्प्रतारयितुं न उन्मादवत् ग्रहगृहीतवत्॥ लोकबाह्यः विवशः॥४०॥ ॥

ननु के ते भागवता धर्म्माः ईश्वरार्प्पितानि सर्वकर्म्माण्यपीत्याह ॥ कायेनेति ॥ आत्मना चित्तेनाहंकारेण वा अनुसृ
तो यः स्वभावः तस्मात् ॥ अयमर्थः न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारि लौकिकमपीति ।
तथा च भगवद्गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मद
र्प्पणमिति । यद्वा ननु कायादीनामेव कर्म्म नात्मन इत्याशंक्याह ॥ अध्यासेनानुसृतात् ब्राह्मणत्वादि
स्वभावाद्यत्करोतीत्यर्थः ॥ तत्सकलं परस्मै परमेश्वराय समर्प्पयेत् ॥ तथा सति सकलमपि कर्म्म भाग
वतो धर्म्मो भवतीति भावः ॥ ३६ ॥ ननु किमेवं परमेश्वरभजनेन ॥ अज्ञानकल्पितभयस्य ज्ञानैकनिवर्त्ती

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ॥ करोति यद्यत्सकलं परस्मै नारायणा
येति समर्प्पयेत्तत् ॥ ३६ ॥ भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ॥ तन्मायया
तो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ॥ ३७ ॥

त्वादित्याशंक्याह भयमिति ॥ यतो भयं तन्मायया
भवेत् ॥ अतो बुधो बुद्धिमान् तमेवाभजेत् ॥ ननु भयं देहाद्यभिनिवेशतो भवति स च देहाहंकारतः
स च स्वरूपास्मरणात् किमत्र तस्य माया करोति अत आह ॥ ईशादपेतस्येति । ईशविमुखस्य तन्माय
याऽस्मृतिः भगवतः स्वरूपास्फूर्त्तिः ततो विपर्ययो देहोऽस्मीति ततो द्वितीयाभिनिवेशाद्भयं भवति । एवं हि
प्रसिद्धं लौकिकी ह्यपि मायायास्तु उक्तं च भगवता दैवी ह्येषा गुणमयीत्यादि एकया अव्यभिचारिण्या भ
क्त्या भजेत् किं च गुरुदेवतात्मा गुरुरेव देवता ईश्वरः आत्मा प्रेष्ठश्च यस्य तथा दृष्टिः सन्नित्यर्थः ॥ ३७ ॥

यद्धर्म्मैरुत्तमोत्तरमाह ॥ त्र्यैणा सर्व्वभूतेष्विति आत्मनः स्वस्य सर्व्वभूतेषु ब्रह्मभावेन समत्वं यः पश्येत् त
था ब्रह्मरूपे आत्मन्यधिष्ठाने भूतानि च यः पश्येत् ॥ यद्वा आततत्वाद्भ्रमातृत्वादात्मादिपरमोदारशक्तिं
त्रोक्तेः ॥ आत्मनो हरेः ॥ सर्व्वभूतेषु मशकादिष्वपि नियंतृत्वेन वर्त्तमानस्य भगवद्भावं निरतिशयैश्व
र्य्यमेव यः पश्येत् ॥ न तु तस्य तारतम्यं ॥ न ह्यात्मनि हरावेव भूतानि च पश्येत् ॥ कथंभूते भगवति ॥
अप्रच्युतैश्वर्य्यादिरूपेण पुर्ज्जैडमलिनभूताश्रयत्वे न जाड्यादिप्रसक्त्यापि ऐश्वर्य्यादिप्रच्युतिं पश्ये

हरिरुवाच ॥ सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ४५ ई
श्वरे तदधीनेषु बालिशेषु द्विषत्सु च ॥ प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ४६ अर्च्चायामेव ह
रये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥ गृहीत्वापीन्द्रियैरर्थान्यो न
द्वेष्टि न हृष्यति ॥ विष्णोर्म्मायामिदं पश्यन्स वै भागवतोत्तमः ॥ ४८ ॥

त्स सर्व्वत्र परिपूर्णं भगव
त्तत्वं पश्यन् भागवतोत्तम इत्यर्थः ॥ ४५ ॥ प्रेम मैत्री च कृपा च उपेक्षा च ताः ॥ ईश्वरादिषु चतुर्षु यः करो
ति स मध्यमो भागवतः एवं भूतस्य भेददर्शनात् ॥ ४६ ॥ अर्च्चायां प्रतिमायां पूजामीहते करोति
न तद्भक्तेषु अन्येषु च सुतरां न करोति। प्राकृतः प्रकृतिः प्रारंभः ॥ अधुनैव प्रारब्धभक्तिः शनैरुत्तमो
भविष्यतीति ॥ ४७ ॥ पुनस्त्रिभिः श्लोकै रभ्यर्हितत्वात् उत्तमभागवस्यैव लक्षणान्याह ॥ गृहीत्वापीति ॥
श्रीवासुदेवाविष्टचित्तो न गृह्णातीति तावदिन्द्रियैरर्थान् गृहीत्वापीत्यपिशब्दार्थः ॥ इदं विश्वं ॥ ४८ ॥ राम

किं च ॥ खमिति ॥ सत्वानि भूतानि ॥ आकाशादि यत्किंचिद्भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत् संभावनायां लि
ङ् ॥ ४१ ॥ नन्वियमारूढयोगानामपि बहुजन्मभिर्दुर्लभा गतिः कथं नाम कीर्त्तनमात्रेण एकस्मिन्नेव जन्मनि भवे
दित्याशंक्य सदृष्टांतमाह ॥ भक्तिरिति ॥ प्रपद्यमानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः
प्रेमास्पदभगवद्रूपस्फूर्त्तिः ॥ तया निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिरित्येष त्रिकः एककालः भजनस

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वानि दिशो द्रुमादीन् ॥ सरित्समुद्रांश्च हरेः शरीरं यत्किंच भू
तं प्रणमेदनन्यः ॥ ४१ ॥ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ॥ प्रपद्यमानस्य यथाश्नतः
स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥ ४२ ॥ इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः
भवंति वै भागवतस्य राजंस्ततः परां शांतिमुपैति साक्षात् ॥ ४३ ॥ राजोवाच ॥ अथ भागवतं ब्रूत यद्ध
र्मो यादृशो नृणाम् ॥ यथाचरति यद्ब्रूते यैर्लिंगैर्भगवत्प्रियः ॥ ४४ ॥

मकाल एव स्यात् ॥ यथाश्नतो भुं
जानस्य तुष्टिः सुखं पुष्टिः उदरभरणं क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः ॥ उपलक्षणमेतत् ॥ प्रतिसिक्थम
पि यथा स्युः तद्वत् ॥ ४२ ॥ एवमेकैकस्मिन् भजने किंचित्किंचित्प्रेमादित्रिके जायमानेऽनुवृत्त्या भजत
परमप्रेमादि जायते । बहुग्रासभोजिन इव परमतुष्ट्यादि । ततश्च भगवत्प्रसादेन कृतार्थो भवती
त्याह ॥ इत्यच्युतांघ्रिमिति ॥ ४३ ॥ भागवतस्य भवंतीत्युक्तेः तस्य लक्षणं पृच्छति ॥ अथेति । यद्धर्मः यस्मि
न् धर्मे परिनिष्ठितः । यादृशः ॥ यत्स्वभावः यथाचरति वर्त्तते । ब्रूते वा यैश्च लिंगैर्भगवतः प्रियो भवति ॥ ४४

अपिच। विषयाभिसंधिना चलनं कामेनाऽतिसंतापे सति भवेत्॥ सतु भगवत्सेवानिर्वृतौ न संभवतीत्याह॥ भ
गवत इति। उरुविक्रमोचता वंघ्रीचतयोः शाखा अंगुलयः तासु नखा निचता निमणयस्तेषां चन्द्रिकाशी
तलादीप्तिः तया निरस्तः कामादितापो यस्मिन्तस्मिन् उपसीदतां भजतां हृदि कथं पुनः संतापः प्रभवति
चन्द्रे उदिते सति अर्कताप इव॥ नयस्य स्वःपर इत्यादिना श्लोकत्रयेणायादशाइत्यस्योत्तरमुक्तं वेदि

भगवतउरुविक्रमांघ्रिशाखानखमणिचन्द्रिकयानिरस्ततापे॥ हृदिकथमुपसीदतांपुनःसःप्र
भवतिचन्द्रइवोदितेर्कतापः॥५४॥ विसृजतिहृदयंनयस्यसाक्षाद्धरिरवशाभिहितोप्यघौघनाशः
प्रणयरशनयाधृतांघ्रिपद्मःसभवतिभागवतप्रधानउक्तः॥५५॥ इतिश्रीभागवतेमहापुराणेए
कादशस्कंधेद्वितीयोध्यायः॥ राजोवाच॥ परस्यविष्णोरीशस्यमायिनामपिमोहिनीं॥ मायांवे
दितुमिच्छामोभगवन्तोब्रुवन्तुनः॥१॥

20

तवं॥ यद्वा तद्त्यस्य च हरिनामानीति ज्ञातव्यं॥५४॥ उ
क्तसमस्तलक्षणसारमाह। विसृजतीति। हरिरेव स्वयं साक्षाद्यस्य हृदयं न विसृजति न मुंच
ति। कथंभूतः॥ अवशेनाप्यभिहितमात्रोपि अघौघं नाशयति यः सः तत्किं न विसृजति॥ यतः प्र
णयरशनया धृतं तत्र हृदये नवद्धमंघ्रिपद्मं यस्य सः भागवतप्रधान उक्तो भवति॥५५॥ इति एकादशे
द्वितीयः॥ मायातत्तरणाब्रह्मकर्मप्रश्नचतुष्टये। तृतीये तत्तरं दत्तमार्षभैर्मुनिभिः पृथक्॥
विष्णोर्मायामिदं पश्यन्तित्युक्तं अतो मायां पृच्छति। परस्येति॥१॥ ॥

राम
१०

किंच देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या विमुह्यमानः स भागवतप्रधानः। तत्र देहस्य धर्मौ जन्माप्ययौ। प्राणस्य क्षुत्पिपासे मनसो भयं बुद्धेस्तर्षः तृष्णा इंद्रियाणां कृच्छ्रं श्रमः ते॥४९॥ कामाश्च कर्माणि च बीजानि च वासनाः तेषां वासुदेव एको निलय आश्रयो यस्य सः। एतेन गृहीत्वापीतिश्लोकत्रयेण देहधर्मैर्मोहकामादिरहितः प्रकारत्रीति यथा चरतीत्यस्योत्तरमुक्तं॥५०॥ ये लिंगे भगवत्प्रिय इत्यस्योत्तरमाह। न यस्येति। जन्म सत्कुलं कर्म तपआदि। जातयः अनुलोमप्रतिलोमजाः मूर्द्धावसिक्तादयः। अस्मिन्देहे अहंकारः रहितैः सत्कुलत्वकर्मादिलिंगः हरेः प्रियो भवतीत्यर्थः॥५१॥ वित्तेषु स्वीयं परकीयं परकीयामिति आत्मनि स्वः पर इति॥५२॥ किंच त्रिभुवनविभवहेतवेपि त्रैलोक्यराज्यार्थमपि लवार्द्धमपि निमेषार्द्धमपि म

देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः। संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः॥४९॥ न कामकर्मबीजानां यस्य चेतसि संभवः। वासुदेवैकनिलयः स वै भागवतोत्तमः॥५०॥ न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः। सज्जतेऽस्मिन्नहंभावो देहे वै स हरेः प्रियः॥५१॥ न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा। सर्वभूतसमः शांतः स वै भागवतोत्तमः॥५२॥ त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्। न चलति भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः॥५३॥

गवत्पदारविन्दभजनाद्यो न विरमेत् स वै वैष्णवाग्र्यः। ननु लवार्द्धमात्रभजनोपरमे चेत्तावान् लाभो भवेत् ततश्च नो न चलेत्तत्राह। अकुंठस्मृतिः भगवत्पदतोन्यत्सारं नास्तीत्येवंरूपाऽकुंठा अनपगता स्मृतिर्यस्य सः भगवत्पदादन्यत्सारं नास्तीति कुतः अत आह। अजिते हरावेव आत्मा येषां तथाभूतैः सुरादिभिरपि दुर्लभान्। किंतु केवलं विमृग्यान् न तदपेक्षया सर्वस्य तुच्छत्वं

स च जीव आत्मना तत्र्यम्मिणात्मद्योतितैर्गुणैः सिद्धियैर्गुणान्विभयान भुंजान इदं स ईशरीरमात्मानं मन्यमान इहशरीरादौ सज्जते ॥५॥ कर्म्मभिः कर्म्मेन्द्रियैश्च तन्निमित्तानि सदा सनानि कर्म्माणि कुर्वन्नूनत्तत्फलं च कर्म्मफलं च गृह्णन् अयं देहभृत् भ्रमतीह संसारे नमुच्यते सुखेतरं सुखदुःखात्मकं कर्म्मफलं ॥६॥ कियन्तं कालं भ्रमतीति तदाह इत्थमिति चतुर्भिः आभूताप्रावहन्तीति तथा ताः सर्गप्रलययोरन्तर्मरणे ॥७॥ आत्मनो मह

गुणैर्गुणान्स भुंजान आत्मप्रद्योतितैः प्रभुः ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥५॥ कर्म्माणि कर्म्मभिः कुर्वन्सनिमित्तानि देहभृत् ॥ तत्तत्कर्म्मफलं गृह्णन्भ्रमतीह सुखेतरं ॥६॥ इत्थं कर्म्मगतीर्गच्छन्बह्वभद्रवहाः पुमान् ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः ॥७॥ धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकम् ॥ अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥८॥ शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ॥ तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति ॥९॥ पातालतलमारभ्य संकर्षणमुखानलः ॥ दहन्नूर्द्ध्वशिखो विष्वग्वर्द्धते वायुनेरितः ॥१०॥ संवर्त्तको मेघगणो वर्षति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥११॥

भूतानां महाप्रलये नाशहेतावासन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणाः सूक्ष्मं तदात्मकं अव्यक्ताय अव्यक्तं प्रति नेतुं आकर्षति ॥८॥ नाशहेतुर्नाह । शतवर्षेति । तस्मिन्काले उपचितश्चासौ उष्णश्चासावर्कश्च । यद्वा तेन काले नोपचितमुष्णत्वं यस्य सः ॥९॥ ऊर्द्ध्वशिखः ऊर्द्ध्वज्वालः । विष्वक् परितः ॥१०॥ संवर्त्तकः प्रलयकर्त्ता धाराभिः न तु विंदुभिः हस्तिहस्ताभिस्तत्प्रमा

ननूत्तमत्वत्तो भागवतोभूतात्कृतार्थः स्यात् किं त्वेदृशैरेतन्मुखाद्धानानुतृप्य इति॥ संसारतापैर्नितरां तप्तो दृढं तस्य
तापस्य भेषजं हरिकथामृतरूपं युष्मद्वचो जुषमाणो नानुतृप्यामि॥२॥ मायायाः स्वरूपतो निरूपणासंभवात्स
ष्ट्यादिकार्यद्वारेण निरूपयितुमाह॥ एभिरिति॥ आद्यः पुरुषः यथा शक्त्या भूतानामात्मा कारणभूतः एभिः
स्वसृष्टैर्महाभूतैरुच्चावचानि भूतानि ससर्ज॥ एषा माया भगवत इति चरमश्लोकपादस्य प्रतिश्लोकम
नुषंगः॥ किमर्थं ससर्ज स्वमात्रात्मप्रसिद्धये॥ स्वं मिमीते परिमिमीते यः उपास्तेऽसौ स्वमाता तस्यात्मनो जी

नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृतं॥ संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजम्॥२॥ मैत्रेय उ
वाच॥ एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज॥ ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये॥३॥ एवं
सृष्टानि भूतानि प्रविष्टः पंचधातुभिः॥ एकधा दशधात्मानं विभजन्जुषते गुणान्॥४॥ ॥

वस्य प्रकृष्टायै सिद्धये॥ यद्वा स्वांशभूतानां जीवानां मायाप्रसिद्धये विषयभोगाय॥ आत्मप्रसिद्धये
मोक्षाय चेत्यर्थः॥ तदुक्तं वेदस्तुतौ। बुद्धींद्रियमनःप्राणान्जनानामसृजत्प्रभुः मात्रार्थं च भवार्थं चात्म
नेकल्पनाय चेति॥३॥ एवं जीवोपकरणार्थं पंचधातुभिर्महाभूतैः सृष्टानि भूतानि अंतर्यामिरूपेण प्र
विष्टः॥ एकधा मनसा दशधा वा इंद्रियरूपेण आत्मानं विभजन् गुणान् तत्तद्विषयान् तत्तद्विष
यान्जुषते जोषयतीत्यर्थः॥ यद्वात्मात्मानं प्रति गुणान्विभजन्जुषते प्रीयत इत्यर्थः॥४॥

भा॰ए॰
१२

त्रिवर्णा त्रिगुणा। मायाम्नवगाभीतंराजानंतन्निस्तुपायप्रवणो ऽकंदयति। किंभूय इति॥१६॥ एवमनुकंपि
तस्तान्निस्तुपायमेवपृच्छति यथैतामिति॥ यद्यपितन्मायया नो बुध आभजेन्नमिति भक्तिस्तत्तारकत्वेनो
व तथापि किंभक्तिरेव अन्योपिवा तत्रोपायोस्तीति ज्ञातुं पुनः प्रश्नः अकृतात्मभिरवशीकृतान्तःकरणैः
स्थूलधियः स्थूले शरीरे अहंधीर्येषां ते॥१७॥ भक्तिव्यतिरेकेणनात्मन्य उपाय इत्यभिप्रेत्य भक्तिमेवस
साधनं निरूपयति॥ तत्र प्रथमं वैराग्यद्वारा गुरूपसत्तिमाह चतुर्भिः कर्म्माणीति॥ दुःखहत्यै दुः

एषा माया भगवतः सर्गस्थित्यन्तकारिणी॥ त्रिवर्णा वर्णितास्माभिः किंभूयः श्रोतुमिच्छसि॥१६॥ राजो
वाच॥ यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः॥ तरंत्यंजः स्थूलधियो महर्ष इदमुच्यतां॥१७॥ प्र
बुद्ध उवाच॥ कर्म्माण्यारभमाणानां दुःखहत्यै सुखाय च॥ पश्येत्पाकविपर्य्यासं मिथुनीचारि
णां नृणां॥१८॥ नित्यार्त्तिदेन वित्तेन दुर्ल्लभेनात्ममृत्युना॥ गृहापत्याप्तपशुभिः का प्रीतिः सा
धितैश्चलैः॥१९॥ एवं लोकं परं विद्यान्नश्वरं कर्म्मनिर्म्मितं॥ सतुल्यातिशयध्वंसं यथा मंडल
वर्त्तिनां॥२०॥

खप्रतीकाराय पाकविपर्य्यासं फलवैपरीत्यं॥ मिथुनीचारिणां मिथुनीभूय प्र
वर्त्तमानानां॥१८॥ कर्मभिः साधिता अपि वित्तादयो न सुखहेतवः किंतु पश्येदित्याह नित्यार्त्तिदेनेति॥
आत्मनः स्वस्य मृत्युरूपेण॥ चलैः अनित्यैः अपायिभिश्च॥१९॥ एवं लोकं परमिति॥ कर्म्मनिर्म्मितत्वा
न्नश्वरं तथा च श्रुतिः तद्यथेह कर्म्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति
किंच वर्त्तमानसमयेपि दुःखयुक्तं पश्येदित्याह सतुल्यातिशयध्वंसं सह तुल्येन अतिशयेन ध्वंसे
न च वर्त्तमानं। अतस्तुल्ये स्पर्द्धा अतिशयितेऽसूया ध्वंसात्लोचनैर्भयादिकं चापरिहार्यमित्यर्थः यथा खं

राम
१२

तत उपाधिलयाद्वैराजः पुरुषोऽव्यक्तं कारणं प्रविशति नन्नु ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः
प्रविशन्ति परं पदमिति स्मृतेः यावदधिकारमवस्थितिराधिकारिकाणामिति न्यायाच्च वैराजशब्दाभिधेय
स्य च ब्रह्मणः परमभागवतत्वान्मोक्ष एव संगच्छते ॥ नान्यथाभिवकारणमात्रे प्रवेशः। सत्यं अश्वमेधादि
नामस्यलोकं गतानामप्यभक्तानामानन्त्यश्रवणात् ॥ अभक्तत्वे ब्रह्मणोऽपि प्रकृतौ लयः पुनरुत्पत्तिश्चेति
मान्नदोलेभ्य स्वचनार्थवमुक्तमित्यविरोधः। अत एकेनापि प्रमाणेन न व्यज्यत इत्यव्यक्तं ब्रह्मैव तत्प्र
वेशेन मोक्ष एवोक्त इति द्रष्टव्यं ॥१२॥ एवं विराजो लयमुक्त्वा तत्कारणानां महदादीनां प्रातिलोम्ये

ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ॥ अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः ॥१२॥ वायुना हृत
गंधा भूः सलिलत्वाय कल्पते ॥ सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ॥१३॥ हृतरूपं तु तमसा वा
यौ ज्योतिः प्रलीयते ॥ हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते ॥१४॥ कालात्मना हृतगुणं नभ
आत्मनि लीयते ॥ इंद्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ॥ प्रविशंति ह्यहंकारं स्वगुणैरहमात्मनि ॥१५॥

न लयमाह। वायुनेति। वायोर्हि गंधहरत्वं प्रसिद्धं। संवर्तकेन वायुना हृतगंधा ॥ अत एव गंधस्य
व्यावर्तकस्य गतत्वात् ॥ सलिलत्वाय कल्पते। सलिले लीयत इत्यर्थः ॥ तद्धृतरसं तेन वायुना हृतो रसो
यस्य तत् ॥१३॥ तमसः स्वरूपतिरस्कारित्वं प्रसिद्धं संवर्तकेन तमसा ॥ अवकाशेन आकाशेन स्वकार
णेन ॥१४॥ कालात्मना शब्दस्य हि काल एव नाशः प्रसिद्धः तद्रूपेणात्मना ईश्वरेण। आत्मनि तामसाहंका
रे इंद्रियाणि बुद्धिश्च राजसाहंकारे। मनो वैकारिकैर्देवैः सह सात्त्विकाहंकारे॥ एवं त्रिविधैः स्वगुणैः स्व
कार्यैः सहितः अहं अहंकारः आत्मनि महति स च प्रकृताविति द्रष्टव्यं ॥१५॥ ॥

भागवते भगवत्प्रतिपादके अन्यत्र शास्त्रादौ च अनिन्दा तां मनसः प्राणायामैः वाचो मौनेन कर्म्मणो नीहयादंडं ॥ सत्यं
यथार्थभाषणं ॥ शमदमौ अंतःकरणबाह्येंद्रियनिग्रहौ ॥२६॥ हरेर्जन्मकर्म्मगुणानां श्रवणादि तदर्थे चेष्टितं विशे
षतश्च यजनादि यत्तत्तदर्थं शिक्षेत ॥२७॥ इष्टं दत्तमित्यादयो भावे निष्ठा ॥ वृत्तं सदाचारः आत्मनः प्रियं ग
धपुष्पादि दारादीन्प्राणांस्तत्परमेश्वराय निवेदनं ॥ तत्सेकनया समर्प्पणं यत्तच्छिक्षेत ॥२८॥ कृष्ण एवा

श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ॥ मनोवाक्कर्म्मदंडं च सत्यं शमदमावपि ॥२६॥ श्रवणं कीर्त्तनं
ध्यानं हरेरद्भुतकर्म्मणः ॥ जन्मकर्म्मगुणानां च तदर्थेखिलचेष्टितं ॥२७॥ इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः
प्रियं दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं ॥२८॥ एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं ॥ परिचर्यां
चोभयत्र महत्सु नृषु साधुषु ॥२९॥ परस्परानुकथनं पावनं भगवद्यशः ॥ मिथो रतिर्मिथस्तुष्टिर्निवृत्ति
र्मिथ आत्मनः ॥३०॥ स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं ॥ भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं ॥३१॥

त्मा नाथश्च येषां ॥ कृष्ण आत्मनो जीवस्य नाथो येषामिति वा ॥ उभयत्र स्थावरे जंगमे च यथा परिचर्या तां ॥
विशेषतो नृषु तत्रापि साधुषु स्वधर्म्मशीलेषु ॥ ततोपि महत्सु श्रीभागवतेषु ॥२९॥ जैश्च सह संगम्य यत्पाव
नं भगवद्यशः तस्य परस्परानुकथनं शिक्षेत ॥ यद्वा यशः प्रति तत्र संस्पर्द्धादिपरित्यागेन मिथो या रतिः
रमणं ॥ या च तुष्टिः सुखं ॥ या च निवृत्तिः समस्तदुःखनिवृत्तिः तामपि शिक्षेत ॥३०॥ एवं वर्त्तमानानां पर
मानंदप्राप्तिमाह ॥ स्मरंत इति द्वयेन ॥ भक्त्या साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या ॥३१॥

त्तमं श्रेयो ज्ञातुमिच्छुः ॥ शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं न त्वज्ञं । अन्यथा संशयनिरासकत्वायोगा
त् । परे च ब्रह्मणि अपरोक्षानुभवेन निष्णातं । अन्यथा संबोधसंचारायोगात् परब्रह्मनिष्णातत्वद्योतकमाह
उपशमाश्रयमिति ॥ २१ ॥ गुरुरेवात्मा दैवतं च यस्य सः ॥ अनुवृत्त्या सेवया यैर्धर्मैः । वस्तुतस्त्वात्मा आत्मप्र
दश्चोपासकानां यथा बलिप्रभृतीनां ॥ २२ ॥ यथोचितमिति हीनेषु दयां समेषु मैत्रीमुत्तमेषु प्रश्रयं शिक्षेदि

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं । शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं ॥ २१ ॥ तत्र भागवतान्ध
र्मान् शिक्षेद्गुर्वात्मदैवतः ॥ अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥ २२ ॥ सर्वतो मनसोऽसंगमादौ
संगं च साधुषु ॥ दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं ॥ २३ ॥ शौचं तपस्तितिक्षां च मौनं स्वाध्यायमा
र्जवं ॥ ब्रह्मचर्यमहिंसां च समत्वं द्वंद्वसंज्ञयोः ॥ २४ ॥ सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां ॥ वि
विक्तचीरवसनं संतोषं येन केनचित् ॥ २५ ॥

त्यर्थः ॥ २३ ॥ शौचं बाह्यं मृज्जलादिभिः ॥ आभ्यंतरं चादंभ
मानादिशिक्षेण । तपः स्वधर्माचरणं । तितिक्षां क्षमां । मौनं वृथावाचामनुच्चारणं । स्वाध्यायमधिकारानुरू
पं वेदपाठादिकं । आर्जवं स्वकृतां ब्रह्मचर्यं यस्य यथार्हमुचितं । ऋतुस्वदारनियमादि । अहिंसां भूते
ष्वद्रोहं । द्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोर्हर्षविषादराहित्यं ॥ २४ ॥ आत्मेश्वरान्वीक्षां सच्चिद्रू
पेणात्मेक्षां नियंतृरूपेणेश्वरान्वीक्षां च । कैवल्यमेकान्तशीलत्वं । अनिकेततां गृहाद्यभिमानराहित्यं । वि
विक्तचीरवसनं विजनपतितानां वस्त्रखंडानां शुद्धानां वा वल्कलानां परिधानं ॥ २५ ॥

अवेद्यत्वमनेन विषयत्वं प्राप्तं निषेधति नैनदिति ॥ एतत्परं तत्त्वं मनो न विशति । न विषयीकरोति । वागुत वाग
पि च तु अ आत्मा बुद्धिः प्राणश्च क्रियाशक्तिमान् न प्राप्नोति ॥ अन्यानि चेंद्रियाणि ॥ यथानलस्य स्वांशभूताः अर्चि
षो विस्फुलिंगादयः न प्रकाशयंति । न दहंति च ॥ तथा जडा मनआदि तन्निषभिव्यज्यमानस्यात्मप्रकाशस्य
तत्तद्वृत्तिप्रकाशकस्य न तत्प्रकाशविषयत्वं । प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य मन्नस्यान्नं मनसो
यन्मनो विदुरिति ॥ तथा यतो वाचो निवर्तंते अप्राप्य मनसा मनसा सहेत्यादिश्रुतेः ॥ ननु तं त्वौपनिषदं
पुरुषं पृच्छामीति श्रुतेः शब्दगोचरत्वं प्रतीयते तत्राह ॥ शब्दोपीति ॥ शब्दोपि आत्मस्वरूपे आत्मनि प्रमा

नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेंद्रियाणि च यथानलमर्चिषः स्वाः ।
शब्दोपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः ॥ ३६ ॥

णं सत् ॥ अर्थोक्तं अर्थादुक्तं यथा भवति तथाह न साक्षात् ॥ कुतः बोधकनिषेधतया स्वस्यैव बोधकस्य नि
षेधरूपत्वात् ॥ यतो वाचो निवर्तंते अप्राप्य मनसा सह ॥ यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म
त्वं विद्धि । यन्मनो न मनुते ॥ न चक्षुषा पश्यति कश्चनैनमित्यादिश्रुतेः ननु तर्हि नैवाह श्रुतिः किमिद
मुच्यते अर्थोक्तमाहेति ॥ तत्राह ॥ यदृत इति ॥ अथात आदेशो नेति नेति ॥ अस्थूलमनणु ॥ यतो वा
चो निवर्तंते यद्वाचानभ्युदितमित्यादि निषेधस्य यदवधिभूतं ब्रह्म तेन विना सिद्धिर्नास्ति सर्वस्य
निषेधस्य सावधित्वात् ॥ ३६ ॥

यं ते हरिं अनुशीलयन्ति तल्लीलां अभिनयंति।। एवं परमेत्य प्राप्य निर्वृताः संतः तूष्णीं भवंति ॥३२॥ उपसंहरति। इतीति।। भागवतधर्मोत्पन्नया भक्त्या ॥३३॥ नारायणपरो मायां तरतीत्युक्तं पृच्छति।। नारायणाभिधानस्येति।। निष्ठां स्वरूपं अयं भावः।। ब्रह्मैव तावन्नारायण इति भगवानिति परमात्मेति चोच्यते।। तदुक्तं। वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति। तथा नारायणो भगवतीति तदिदं विश्वमाहितं।। गृहीतमायोरुगुणः सर्गादावगुणः स्वत इत्यादिषु।। तत्र किमेभिः

क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः॥ नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं परमेत्य निर्वृताः॥३२॥ इति भागवतान्धर्मान् शिक्षन्भक्त्या तदुत्थया॥ नारायणपरो मायामंजस्तरति दुस्तरां॥३३॥ राजोवाच॥ नारायणाभिधानस्य ब्रह्मणः परमात्मनः॥ निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः॥३४॥ पिप्पलायन उवाच॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च॥ देहेंद्रियासुहृदयानि चरंति येन संजीवितानि तदवेहि परं नरेंद्र॥३५॥

शब्दैर्निर्विशेषं तदेव वस्तूच्यते आहोस्वित्कोपि विशेष इति शंका इति ॥३४॥ अत्रोत्तरं स्थित्युद्भवेति।। अयमर्थः अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं च अहेतुः हेतुरहितः स नारायण इति परमेव तत्त्वमवेहि। स्वप्नजागरसुषुप्तिषु सत् अनुवर्तमानं यत् वस्त्वस्तीति चं तित्तुरीयं त्रिषु संततमिति। बहिश्च समाध्यादौ च सत्।। तद्ब्रह्मेति परमेव तत्त्वमवेहि देहेंद्रियप्राणमनांसि येन संजीवितानि संति चरंति प्रवर्तंते। तत्परमात्मेति परमेव तत्त्वमवेहि।। एवं लक्षणभेदैर्नारायणादिनामभिरुच्यमानमपि परमेकमेव तत्

भा-ए-
१५

ननु सर्वात्मकं चेद् ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वाद् ब्रह्मणोऽपि तत्प्रसंगः स्यादत आह। नात्मेति
आत्मा ब्रह्म न जजान जातः। जन्माभावादेव तदनन्तरास्तितालक्षणोऽपि विकारो नास्ति। नैधते न वर्द्धते। वृद्ध्य-
भावादेव विपरिणामोऽपि निरस्तः। कुतः। हि यस्मात् व्यभिचारिणां आगमापायिनां बाल्ययुवादिदेहानां
सवनवित्तत्तत्कालद्रष्टा॥ न ह्यवस्थावतां द्रष्टा तदवस्थो भवतीत्यर्थः॥ निरवस्थः कोऽसावात्मा अ-

25

नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद्व्यभिचारिणां हि॥
सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेन्द्रियबलेन विकल्पितं सत्॥ ३८॥

त आह॥ उपलब्धिमात्रमिति न वाच्यम्। तर्हि ज्ञानक्षणिकत्वं नेत्याह। सर्वत्रेति॥ सर्वत्र देशे शश्वत्सर्व-
दा अनपायि अनुवर्त्तमानं॥ ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्न ज्ञानस्यानपायि-
त्वं। अत आह इंद्रियबलेनेति॥ सदेव ज्ञानं इंद्रियबलेन विविधं कल्पितं॥ नीलाद्याकारावच्छिन्नं-
यएव जायते नश्यन्निव॥ न ज्ञानमिति भावः। व्यभिचारिष्वव्यभिचारे दृष्टान्तः। प्राणो यथेति॥ ३८॥

राम
१५

ननु तर्हि प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसज्यते अत आह। सत्त्वमिति॥ सत्स्थूलं कार्यं असत्सूक्ष्मं
कारणं तत्सर्वं ब्रह्मैव भाति। कुतः यत् यस्मात् तयोः सदसतोः परं कारणं। कार्यं कारणाद्भिन्नं न भवति।
वाचारंभणमिति श्रुतेः। ननु कथमेकं बहुविधस्य कारणं तत्राह। उरुशक्ति अनेकशक्तिमत्॥ उरुर्मी
हती मायालक्षणा शक्तिर्यस्य तत् इति वा बहुधाभानमेव दर्शयति॥ अदो यदेकं ब्रह्म तदेव सत्त्वरजस्त

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदन्ति जीवम्।
ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत्॥३१॥

मइति त्रिवृत्प्रधानं प्रवदन्ति। ततः क्रियाशक्त्या सूत्रं ज्ञानशक्त्या महानिति तदेव प्रवदंति॥ अहमि
ति। जीवं जीवोपाधिं अहंकारं च तदेव प्रवदंति। ततश्च ज्ञानक्रियार्थफलरूपतया ज्ञानशब्देन देव
ताः क्रिया इंद्रियाणि अर्था विषयाः फलं तत्प्रकाशः सुखादि वा तद्रूपतया ब्रह्मैव भाति न हि सर्वस्वरू
पेण स्वतोभासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति भावः॥३१॥ ॥

ननुयदिसुषुप्तौकूटस्थात्मानुभवोभवेत्कथंपुनरपिसंसारःस्यात् अविद्यातत्संस्काराणांविद्यमानत्वादिति
चेत्कदातर्हितन्निवर्त्तकोनुभवोभवेदतआहयर्हीति।वित्तैषणादिविहायकेवलमब्जनाभस्यैवचर
णेच्छयायाउरुभक्तिःतयायःपुमान्चेतसोमलानिविधमेन्नाशयेत् चेतएववाकर्त्तृस्वगतानिम
लानितयाभक्त्यातालयेत्।।तदातस्मिन्विशुद्धेचेतसिसतिसाक्षादव्यवधानेनात्मतत्त्वमुपलभ्य
ते॥अमलयोर्दृशोःसत्योःयथापूर्वमेवसिद्धःसवितृप्रकाशइति॥४०॥भक्तेःकर्म्मयोगाधीनत्वात्त

यर्ह्यब्जनाभचरणैषणयोरुभक्त्याचेतोमलानिविधमेद्गुणकर्म्मजानि॥तस्मिन्विशुद्धउपलभ्य
तआत्मतत्त्वंसाक्षाद्यथामलदृशोःसवितृप्रकाशः॥४०॥राजोवाच॥कर्म्मयोगंवदतनःपुरुषोये
नसंस्कृतः॥विधूयेहाशुकर्म्माणिनैष्कर्म्यंविन्दतेपरं॥४१॥एवंप्रश्नमृषीन्पूर्वमपृच्छंपितुरन्तिके
नाब्रुवन्ब्रह्मणःपुत्रास्तत्रकारणमुच्यताम्॥४२॥आविर्होत्रउवाच॥कर्म्माकर्म्मविकर्म्मेतिवेद
वादोनलौकिकः॥वेदस्यचेश्वरात्मत्वात्तत्रमुह्यन्तिसूरयः॥४३॥

पृच्छति॥कर्म्मयोगमिति।नै-
ष्कर्म्यंकर्म्मनिवृत्तिसाध्यंज्ञानं॥४१॥प्रश्नांतरमाह।।एवमिति।।प्रश्नंप्रष्टव्यमर्थं॥पितुरन्तिके।ब्रह्म
णःपुत्राःसनकादयःसर्वज्ञाअपिनाब्रुवन्॥४२॥गहनत्वद्योतनायप्रथमंहेतोःप्रश्नस्योत्तरमाह।कर्म्मेति
कर्म्मविहितं।।अकर्म्मतद्विपरीतंनिषिद्धं।।विकर्म्मविगतंकर्म्मविहिताकरणं॥ईश्वरात्मत्वात्ईश्व
राद्भूतत्वात्।अपौरुषेयत्वादित्यर्थः।।पुंवाक्येहिवक्तुरभिप्रायतोर्थज्ञानंशक्यं।।अपौरुषेयेतुके
वलंवाक्यपौर्वापर्य्येणैवतात्पर्यावधारणं।।तच्चदुःकरमिति।।तत्रकर्म्मादौविद्वांसोपिमुह्यन्तीतिकिमुत

26

दृष्टान्तं विज्ञाय एवमिन्द्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति ॥ अण्डेष्विति। पेशिषु जरायुजेषु। तरु-
षूद्भिज्जेषु ॥ अविनिश्चितेषु स्वेदजेषु ॥ उपधावति अनुवर्त्तते ॥ एवं दृष्टान्ते निर्विकारत्वं प्रदर्श्य दार्ष्टा-
न्तिके प्रदर्शयति ॥ कथं तर्हि आत्मा सविकार इव प्रतीयते। यद्यदा जागरे इन्द्रियगणः यदा च स्वप्ने तत्सं-
स्कारवानहंकारः यदा तु प्रसुप्तं तदा तस्मिन् प्रसुप्ते इन्द्रियगणे सन्ने लीने अहमि अहंकारे च सन्ने कू-
टस्थः निर्विकार एवात्मा कुतः आशयमृते लिंगशरीरमुपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः।

अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र ॥ सन्ने य-
दिन्द्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥३९॥ ॥

न चाहंकारपर्यन्तस्य सर्वस्य लये शून्यमेवावशिष्येत। कुतस्तदा कूटस्थ आत्मा अत आह। तदनु-
स्मृतिर्नः ॥ तस्य दर्शनादिविशेषज्ञानशून्यस्य सुखात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं भवति
। एतावन्तं कालं सुखमहमस्वाप्सं न किंचिदवेदिषमिति ॥ अतो ननु अनुभूतस्यास्मरणादस्त्वेवं सुषुप्ता-
वात्मानुभवः ॥ विषयसंवेद्याभावात्तु न स्पष्ट इति भावः। तथा च श्रुतिः। यद्वै तन्न पश्यति पश्यन्वै तं
द्रष्टव्यं न पश्यति ॥ न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति ॥३९॥ ॥

भा०११
१७

ननुफलस्यश्रुतत्वात्कर्म्मणिकृते तस्मिन्नासक्तिः न तु फलं च स्यात्। न तु नैःकर्म्यरूपा सिद्धिरत आह निःसं
गः अनभिनिवेशवानीश्वरेऽर्पितं ननु फलोद्देशेन ननुफलस्यश्रुतत्वात्कर्म्मणि कृते फलं भवेदेव॥ नरोच
नार्थेति। कर्म्मणि रुच्युत्पादनार्थं अगदपाने खंडलड्डुकादिवत्। ततश्च कर्म्मभिरुच्या वेदार्थसम्यग्वि
चारयति। तदा च यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इत्यनात्मज्ञस्य कृप
णत्वं। तमेतं वेदानुवचनेन विविदिषंति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चेति यज्ञादी

वेदोक्तमेव कुर्वाणो निःसंगोऽर्पितमीश्वरे। नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः
॥४५॥ य आशु हृदयग्रंथिं निर्जिहीर्षुः परात्मनः। विधिनोपचरेद्देवं तंत्रोक्तेन च केशवं॥४६॥
लब्ध्वानुग्रह आचार्यात्तेन संदर्शितागमः। महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः॥४७॥

27

नां ज्ञानशेषतां चावधार्य निःकामेषु कर्म्मसु प्रवर्त्तन्ते। ततश्च स्वर्गकामो यजेतेत्यादिभिः कामितस्यै
व स्वर्गादेः फलत्वावगमात् कामितो सौ न भवतीति नैःकर्म्यसिद्धिरेव भवतीति भावः॥४५॥ वैदि
कं कर्म्मयोगमुक्त्वा तांत्रिकमाह। य आश्विति। परात्मनः परस्य ब्रह्मस्वरूपस्य आत्मनो जीवस्य हृदयग्रं
थिमहंकारबंधं निहर्त्तुमिच्छुः स तंत्रोक्तेन च विधिना प्रकारेण भजेत् तंत्रमागमः। चकाराद्वैदिकेन
सहसमुच्चयमाह॥४६॥ तमेव विधिमाह। लब्ध्वानुग्रह इत्यादिना। तेनाचार्येण संदर्शितः आग

राम
१७

दुर्ज्ञेयंवेदतात्पर्य्यमाह।।परोक्षवादोवेदोयमिति।। यत्रान्यथास्थितोर्थःसंगोपयितुमन्यथाकृत्वोच्यतेसपरो
क्षवादःतथाचश्रुतिःतंवाएतंचतुर्होतारंसंतंचतुर्होतेत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवाइति।परो
क्षवादत्वमेवाह।।कर्म्ममोक्षायेति।।ननुस्वर्गाद्यर्थंकर्म्माणिविधत्तेनकर्म्ममोक्षार्थं।तत्राह।बालानामनु
शासनंयथाभवतितथा अत्रदृष्टांतःअगदंऔषधंयथापिताबालमगदंपाययन्खंडलड्डुकादिभिः

परोक्षवादोवेदोयंबालानामनुशासनं॥कर्म्ममोक्षायकर्म्माणिविधत्तेह्यगदंयथा॥
॥४३॥नाचरेद्यस्तुवेदोक्तंस्वयमज्ञोऽजितेंद्रियः॥विकर्म्मणाह्यधर्म्मेणमृत्योर्मृत्युमुपैतिसः॥
॥४४॥

प्रलोभयन्पाययति।।ददातिचतानि।नेतावनागदपानस्यतल्लाभःप्रयोजनं अपित्वारोग्यंतथावेदोप्य
वांतरफलैःप्रलोभयन्कर्म्ममोक्षायैवकर्म्माणिविधत्ते॥४३॥ननुकर्म्ममोक्षश्चेत्पुरुषार्थःतर्हिप्रथम
मेवकर्म्मत्यज्यतां अतआहनाचरेदिति।।अजितेंद्रियत्वादज्ञःस्वयंयदिनाचरेत्तत्तर्हिविकर्म्म
णाकर्म्मानाचरणलक्षणेनाधर्म्मेणमृत्योरनंतरंमृत्युमेवप्राप्नोति।।तथाचश्रुतिः॥मृत्वापुनर्मृत्यु
मापद्यतेअर्द्यमानःस्वकर्म्मभिरिति।।तस्माद्वेदोक्तमेवकुर्वाणःननुनिषिद्धं॥४४॥रामराम

चतुर्थेत्ववतारेह्यृषभस्योत्तरमुक्तवान्। जयंतीनंदनोनाम्नाद्रविलोनवसत्तमः॥ मर्त्याभिमतया
आत्मनइत्यनेनात्मनःस्थितिमवतारंप्रजयेदित्युक्तेऽवतारज्ञानमपेक्षितं। तथास्त्वैस्तुत्वानमेद्र
रमित्युक्तेगुणकर्म्मज्ञानंचापेक्षितं। अतःपृच्छति। यानियानीति॥ कर्त्ताकरिष्यति॥१॥ त्वयाप्यस्या-
निकालत्रयसंबंधिसकलावतारगुणकर्म्माणिकथयितुमशक्यानिसंक्षेपतस्तुकानिचित्क
थयिष्यामीत्याहयोवाइत्यादिना॥ अनुक्रमिष्यन्गणयितुमिच्छतियः॥ सतुबालानामिवबुद्धि

राजोवाच॥ यानियानीहकर्म्माणियैर्यैःस्वच्छन्दजन्मभिः॥ चक्रेकरोतिकर्त्तावाहरिस्ता
निब्रुवंतुनः॥१॥ श्रीद्रुमिलउवाच॥ योवाअनंतस्यगुणाननंतानुक्रमिष्यन्सतुबालबु
द्धिः॥ रजांसिभूमेर्गणयेत्कथंचित्कालेननैवाखिलशक्तिधाम्नः॥२॥ भूतैर्यदापं
चभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन्॥ स्वांशेनविष्टःपुरुषाभिधानमवापना
रायणआदिदेवः॥३॥

यस्यसमंदमतिःकालेनमहताकोपिमहामतिः॥ रजांसिगणयेदपि
अखिलशक्तिधाम्नःसर्वशक्त्याश्रयस्यभगवतोगुणांस्तुनैवगणयेत्॥ तथाचश्रुतिः। विष्णोर्नुकं
वीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसीति॥२॥ तत्रादौपुरुषावतारमाह भूतैरित्यादिभ्य
यादास्वसृष्टैर्भूतैर्विराजंब्रह्मांडपुरंनिर्म्मायतस्मिन्लीलयास्वांशेनचित्तशक्त्याप्रविष्टः॥ न
तुभोक्तृत्वेनप्रभूतपुण्यस्यजीवस्यतद्भोक्तृत्वात्॥३॥ ॥

मर्च्चेः संमुखमासीनः आदिशब्देन भूतशुद्ध्यादि पिपिंडं देहं विशोध्य संन्यासैः सद्भिर्न्यासैः कृतारक्षायेनसः ॥४८॥ आदावेव द्रव्याणि पुष्पादीनि जंत्वादिशोधनेन क्षितिं संमार्जनादिना आत्मानमव्यग्रतया लिंगमूर्त्तिं अनुलेपक्षालनादिना निःपाद्य योग्यानि कृत्वा ॥४९॥ पाद्यादिपात्राणि उपकल्प्य संनिधाप्य तद्दिसपूजि तं श्रीमूर्त्तौ ध्यात्वा हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैः मूलमंत्रेण च देवे कृतन्यासः

शुचिः संमुखमासीनः प्राणसंयमनादिभिः ॥ पिंडं विशोध्य संन्यासकृतरक्षोर्च्चयेद्धरिं ॥४८॥ अर्च्चादौ हृदये वापि यथालब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनं ॥४९॥ पाद्यादीनुपकल्प्याथ सन्निधाप्य समाहितः ॥ हृदादिभिः कृतन्यासो मूलमंत्रेण चार्च्चयेत ॥५०॥ सांगोपांगां सपार्षदां तां तां मूर्त्तिं स्वमंत्रतः ॥ पाद्यार्घाचमनीयाद्यैः स्नानवासोविभूषणैः ॥५१॥ गंधमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं ॥५२॥ आत्मानं तन्मयं ध्यायन्मूर्त्तिं संपूजयेद्धरेः ॥ शेषामाधाय शिरसा स्वधाम्न्युद्वास्य सत्कृतं ॥५३॥ एवमग्न्यर्कतोयादावतिथौ हृदये च यः ॥ यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥५४॥ इति श्रीभागवते महापुराणे एकादशस्कंधेत तियोध्यायः ।

सो मूलमंत्रेणार्च्चयेत् ॥५०॥ अंगानि हृदयादीनि उपांगानि सुदर्शनादीनि तत्सहितां ॥ संपार्षदां सपरिवारां कैरुपचारैरर्च्चयेत्तदाह ॥ पाद्येति ॥ आद्यशब्देन मधुपर्कमाचमनं च ॥५१॥ अक्षताक्षिलकालंकारेन तु पूजायां नाक्षतैरर्च्चयेद्विष्णुं न केतक्या महेश्वरं इति निषेधात् ॥ उपहारो नैवेद्यं ॥५२॥ शेषां निर्माल्यं ॥ स्वधाम्नि स्वस्थाने देवं तद्दिमूर्त्तिकरंडके ॥ उद्वास्य पापयित्वा पूजाविधिं समापयेदिति शेषः ॥५३॥ तांत्रिकं कर्मयोगमुपसंहरति एवमिति

भगवदवतारत्वद्योतकं परमोपशमं दर्शयितुं इतिहासमाह॥ इंद्र इति दशभिः॥ धाम स्थानं तपसा ग्र
हीतुमिच्छतीति विशंक्य तपोनाशाय कामं सपरिवारं प्रेषयामास॥ स कामः बदरीमित्युपाख्यायते यः तं
तस्याश्रमं च अप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणाणि एव इषवो बाणाः तैः न तस्य महिमहिमानं
जानातीति अतन्महिज्ञः॥७॥ अक्रमं अपराधं अहो अहं धीर इति विस्मयो गर्वः तद्रहितः॥ एजमा

इन्द्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स बदर्युपाख्यं॥ गत्वाप्सरोगणवसंत
सुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः॥७॥ विज्ञाय शक्रकृतमक्रममादिदेवः प्राह
प्रहस्य गतविस्मय एजमानान्॥ मा भैष्ट भो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमि
मं कुरुध्वं॥८॥ इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः॥ नैतद्विभो त्व
यि परेऽविकृते विचित्रं स्वारामधीरनिकरानतपादपद्मे॥९॥

नान् शापभिया कंपमानान्॥ भो
विभो समर्थ हे देववध्वः मा भैष्ट। बलिं आतिथ्यं तान् प्रार्थयते। इमं मम अस्माकं आश्रमं आतिथ्याभावे
अशून्यं प्रायः स्यादित्यर्थः॥८॥ हे नरदेव अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः।
सव्रीडानि नम्राणि शिरांसि येषां ते॥ लज्जाभरेण वा वनतशिरस्का इत्यर्थः॥ सघृणं यथा भ
वति कृपां जनयन् इत्यर्थः॥ कृपायुक्तं तमिति वा॥ मायातः परे अतोऽविकृते॥ स्वारामाश्च ते धीरा
श्च तेषां निकरैरानतं पादप[द्मं] यस्य तस्मिन् त्वयि एतन्नदत्तो भानुकंपादि न चित्रम्॥९॥ रामराम

त्रस्य गुणकर्म्माण्याह। हृद्येनयत्कायइति। यस्याधिष्ठेयः काय एषः। काय इति सप्तमी वा तनुभृतां समष्टिव्यष्टिनी
वानां ज्ञानकर्म्मेंद्रियाणि। यस्य स्वतः स्वरूपभूतात्सत्त्वात्तनुभृतां ज्ञानं। यस्य स्वतः सिद्धं ज्ञानमिति वा। यस्य श्व
सनतः प्राणात् बलं देहशक्तिः ओज इंद्रियशक्तिः ईहा क्रिया यश्च सत्त्वादिभिर्विश्वस्थितिलयोद्भवे आदिक
र्त्ता आदिकर्तृत्वेनेन तत्पूर्वकं कर्तृत्वमपि सूचितं॥४॥ तद्दर्शयितुं गुणावतारद्वारा चराचरसृष्ट्यादिक

यत्काय एष भुवनत्रयसन्निवेशो यस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि॥ ज्ञानं स्वतः श्वसनतो बलमोज
ईहा सत्त्वादिभिः स्थितिलयोद्भव आदिकर्त्ता॥४॥ आदावभूच्छतधृती रजसास्य सर्गो विष्णुः स्थितौ
क्रतुपतिर्द्विजधर्म्मसेतुः॥ रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु॥५॥
धर्म्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशांतः॥ नैष्कर्म्यलक्षणमुवाच चचार क
र्म्म योऽद्यापि चास्त ऋषिवर्य्यनिषेविताङ्घ्रिः॥६॥

र्तृत्वमाह। आदाविति॥ यस्येत्यनुषंगः। यस्य रजसा अ
स्य जगतः सर्गो कार्य्ये शतधृतिर्ब्रह्माभूत्॥ स्थितौ च विष्णुः यस्य सत्त्वेन निशेषः॥ क्रतुपतिस्तत्फलदाता
द्विजातीनां तद्धर्म्माणां च सेतुः पालक इत्यर्थः॥ यस्य तमसा अस्याप्ययाय रुद्रोऽभूत् इति एते ब्रह्मादिभि
र्निमित्तभूतैः प्रजासु उद्भवादयो यतो यतो भवंति स आद्यः पुरुष इत्यन्वयः॥५॥ धर्म्मस्य भार्य्यायां दक्ष
दुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन अजनिष्ट जातः॥ तच्चरितमाह। नैष्कर्म्यं आत्मस्वरू
पं तल्लक्षणं येन तत्कर्म्म कर्म्मनिर्हारस्वरूपं वा उवाच नारदादिभ्यः स्वयं च चचार च। योऽद्यापि कर्म्म च चरन्नास्ते ऋ

स्त्रियः योगनिर्मिताः स्वशुश्रूषां कुर्वतीः स्वर्चिताः सुष्ठु अलंकृताः तेषां स्वलावण्यादिदर्पोपशमनाः
यद्दर्शयामास ॥१२॥ रूपिणीः मूर्त्तिमतीः श्रीरिव ताः स्त्रीः दृष्ट्वा तासां तु रूपस्यौदार्येण महत्त्वेन हृताश्रीः
कांतिर्येषां ते ॥१३॥ वृङ्ध्वं वृणीध्वं ॥ क्व वयं वराकाः क्व चेमा इति चेत्तत्राह । सवर्णां समानरूपां नैकाप्य
स्मदनुरूपेति चेत्तमाभवत् । तथापि स्वर्गस्य भूषणरूपं ॥१४॥ सुरवंदिनः देवभक्ताः ॥१५॥ इंद्रा

इति प्रगृणतां तेषां स्त्रियोऽत्यद्भुतदर्शनाः । दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥१२॥ ते दे
वानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः । गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥१३॥ तानाह
देवदेवेशः प्रणतान्प्रहसन्निव । आसामेकतमां वृङ्ध्वं सवर्णां स्वर्गभूषणां ॥१४॥ ओमित्यादेशमा
दाय नत्वा तं सुरवंदिनः । उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥१५॥ इंद्रायानम्य सदसि शृण्
वतां त्रिदिवौकसां । ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः ॥१६॥ हंसस्वरूप्यवददच्युत
आत्मयोगं दत्तः कुमार ऋषभो भगवान्पिता नः । विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृ
ता मधुभिदा श्रुतयो हयास्ये ॥१७॥

यदिंद्रं प्रति नारायणबलमूचुः ॥ शक्रस्तत्रास त्रासं संप्राप्तः ॥
विस्मितश्च । तत्र विस्मितस्त्रासेति वा ॥१६॥ अन्यानप्यवतारांस्तच्चरितानि चाह ॥ हंसस्वरूपी
ति । दत्तः दत्तात्रेयः कुमारः सनकादिः नः पिता ऋषभश्च विष्णुरेव कलयावतीर्णः सन्नात्मयोग
मवदत् । तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सता ततः श्रुतय आहृताः ॥१७॥ राम

अस्माकं चापराधाचरणं स्वभावत्वान्न चित्रमित्याह ॥ त्वामिति। त्वां सेवमानानां सुरैरिंद्रादिभिः कृता अंतराया विघ्ना भवंति। कस्मादित्यत आह। स्वौक इति स्वस्थानं स्वर्गमतिक्रम्य परमं तव स्थानं व्रजतां नान्यस्य त्वामसेवमानस्य ॥ कुतः च हि प्रियज्ञे स्वभागान् पुरोडाशादीन् बलीन् करान्। कृषिक इव राज्ञे। इंद्रादिभ्यो ददतः प्रयच्छतः तर्हि किं मद्भक्तो विघ्नैर्भ्रश्यति नेत्याह। धत्त इति ॥ यदीति निश्चये। यतस्त्वं सर्वेश्वराधीश्वरो विता रक्षकः ॥ अतोसौ विघ्नानां मूर्ध्नि पदं धत्ते। कुतः पुनस्त्वयि विघ्नशंकेति भावः ॥१०॥

त्वां सेवतां सुरकृता बहवोंतरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते ॥ नान्यस्य बर्हिषि बलीन्ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥१०॥ क्षुत्तृट्त्रिकालगुणमारुतजैह्वशैश्न्यान् अस्मानपारजलधीनतितीर्य केचित् ॥ क्रोधस्य यांति विफलस्य वशं पदे गोर्मज्जंति दुश्चरतपश्च वृथोत्सृजंति ॥११॥

इभक्तानां तु केवलं तपश्चरतां हीयं गतिः ॥ अस्माकं वा वशं यांति क्रोधस्य वा तत्राप्यस्मद्वशाः कामोपभोगमपि तावदनुभवंति। क्रोधस्य वशाः पुनरतिमंदा इत्याह ॥ क्षुत्तृडिति। क्षुत्तृट्त्रिकालगुणाः शीतोष्णवर्षाणि मारुतश्च प्राणो वातो वा। जैह्वशैश्न्यौ जिह्वाभोगाश्च शैश्न्यभोगाश्च एतानस्मान् अपारजलधिरूपान् अतितीर्य विलंघ्य गोः पदे मज्जंति॥ कुतः यतः क्रोधस्य विफलस्य वशं यांति गच्छंति। किंच। जले मज्जंतो यथा विवशाः संतो मस्तकारोपितं भारमुत्सृजंति। तथात्वयानमोत्तायनच भोगाय शापादिना दुश्चरं तप उत्सृजंति ॥११॥

भाविनं रामकृष्णावतारमाह ॥ भूमेरिति ॥ बुद्धावतारमाह ॥ वादैरिति ॥ अतदर्हान् यज्ञानर्हान् दैत्या
न्विमोहयिष्यति ॥ कल्क्यवतारमाह ॥ शूद्रानिति ॥ न्यहनिष्यत निहनिष्यति ॥२५॥ इति कादशे चतुर्थः ॥ पं
चमे भक्तिहीनानां का निष्ठा को युगे युगे ॥ पूजाविधिरिति प्रश्नद्वयस्योत्तरमुच्यते ॥१॥ त्वां सेवतां
सुरकृता बहवोन्तराया इत्यनेन श्रीहरिभक्ता विघ्नमूर्ध्नि पदं दत्वा परां गतिं यांति ॥ अभक्ता
नां तु विघ्ना भवंतीत्युक्ते तर्हि तेषां का गतिर्भवतीति पृच्छति ॥ भगवंतमिति ॥ हे आत्मवित्त

भूमेर्भरावतरणाय यदुषु जन्मा जातः करिष्यति सुरैरपि दुष्कराणि ॥ वादैर्विमोहयति यज्ञकृतो
तदर्हान् शूद्रान्कलौ क्षितिभुजो न्यहनिष्यदंते ॥२४॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः भू
रीणि भूरियशसो वर्णितानि महाभुज ॥२५॥ इति श्रीभागवते महापुराणे एकादशस्कंधे चतु
र्थोध्यायः ॥४॥ राजोवाच ॥ भगवंतं हरिं प्रायो न भजंत्यात्मवित्तमाः । तेषामशांतकामानां का

27

निष्ठाऽविजितात्मनां ॥१॥ चमस उवाच ॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ॥ चत्वारो
जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥२॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं ॥ न भजंत्यवजा
नंति स्थानाद्भ्रष्टाः पतंत्यधः ॥३॥ मा: अविजितात्मनां अत एवाशांता एवाशांतकामानां कानि
ष्ठा किं प्राप्यमित्यर्थः ॥ स्वजनकस्य गुरोर्भगवतोऽनादराद्रुद्रोहेण दुर्गतिं यांतीति वक्तुं भगव
तः सकाशाद्वर्णाश्रमाणामुत्पत्तिमाह ॥ मुखेति ॥ गुणैः सत्वेन विप्रः ॥ सत्वरजोभ्यां क्षत्रियः । र
जस्तमोभ्यां वैश्यः । तमसा शूद्र इति ॥२॥ एषां मध्ये ये साक्षात्त्वां न भजंति ॥ ये च ज्ञात्वाप्यवजानंति ।
आत्मनः प्रभवो जन्म यस्मात्तं । तदभजने कृतघ्नतामप्याह । ईश्वरमिति । स्थानाद्वर्णाश्रमाद्भ्रष्टाः ॥३

इलापृथ्वी ओषधयश्च गुप्ताः क्रौडे वराहावतारे ग्राहाद्गजेंद्रममुंचन्मोचयामास॥ एवमादौ यत्रावतारः
नाम नास्ति तत्र विभुः शिवाय जगतां कल्याणायावतीर्णः इत्यनुवर्त्तनीयं॥२०॥ संस्तुवतः स्तुतिं कुर्वाणा
न् ऋषीन् वालखिल्यान् कश्यपार्थं समिदाहरणे गोःपदे निमग्नान् इंद्रेणोपहसितान् इत्यापदो

गुप्तोप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज उद्धरतांभसः क्ष्मां॥ कौर्म्मे धृतो द्रिरमृतोन्म
थने स्वपृष्ठे ग्राहात्प्रपन्नमिभराजममुंचदार्त्तं॥२०॥ संस्तुवतोब्धिपतितान् श्रमणान् ऋषींश्च श
क्रं च वृत्रवधतस्तमसि प्रविष्टं॥ देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेंद्रमभयाय
सतां नृसिंहे॥२१॥ देवासुरे युधि च दैत्यपतीन् सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः॥ भू
त्वाथ वामन इमामहरद्बलेः क्ष्मां याञ्चाछलेन समदाददितेः सुतेभ्यः॥२२॥ निःक्षत्रियामकृ
त गां च त्रिसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः॥ सोब्धिं बबंध दशवक्त्रमहन् सलंकं
सीतापतिर्जयति लो■कमलघ्नकीर्त्तिः॥२३॥

मोचयत्॥ तमसि वृत्रहत्यायां प्रविष्टं मोचया
मास। असुरगृहे पिहिता निरुद्धा या देवस्त्रियस्ताश्चामुंचदनेकावतारैः॥२१॥ अंतरेषु मन्वंतरेषु क
लाभिर्मूर्त्तिभिः भुवनानि अदधात् अपालयत्॥ इमां क्ष्मां समदात् ददौ॥२२॥ हैहयानां कुलस्याप्य
याय भार्गवरूपोग्निः। स रामो दाशरथिः सन् सलंकं लंकायां स्थितं॥ स च जयति। वर्त्तमानकालीनो

किंचतेषांकर्म्माभिनिवेशात्कामक्रोधदंभादयोवर्द्धंत इत्याह रजसेति॥ घोरः अभिचारादिः संकल्पो येषां ते
अहिवन्मन्युर्येषां ते॥७॥ कामुकत्वं प्रपंचयति वदंतीति॥ उपासिताः स्त्रियो यैः नतु हरिः गृहेषु मैथुन्यं मिथुन
सुखमेव परं न त्वात्तिर्थ्यादि येषु गृहेषु तेषु आशिषो वदंति॥ इदमद्यमया लब्धमिदं प्राप्स्ये मनोरथ
मित्यादि॥ इदमस्तीदमपि मे भविष्यति पुनर्धनमित्याकाराः॥ दांभिकतां प्रपंचयति यजंतीति॥ असृष्टा
न्नविधानदक्षिणं॥ नसृष्टाः न संपादिताः अन्नविधान दक्षिणा यथा तथा यजंति तदा च वृत्त्यै जीवि

रजसा घोरसंकल्पाः कामुका अहिमन्यवः॥ दांभिकामानिनः पापा विहसंत्यच्युतप्रियान्॥७॥ वदं
तितेन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यसुखेषु चाशिषः॥ यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै
परं घ्नंति पशूनतद्विदः॥८॥ श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्म्मणा॥ जा
तस्मयेनांधधियः सहेश्वरान्सतोवमन्यंति हरिप्रियान्खलाः॥९॥ सर्वेषु शश्वत्तनुभृत्स्ववस्थि
तं यथा खमात्मानमभीष्टमीश्वरं॥ वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्त्तया॥१०

कार्थं परं केवलं पशून्घ्नंति॥ अतद्विदः हिंसादोषानभिज्ञाः॥८॥ मानितां प्रपंचयति॥ श्रियेति॥ श्रिया धनादि
संपदा विभूत्या ऐश्वर्येण श्रियादिना जातो यः स्मयो गर्वस्तेनांधा धीर्येषां ते ईश्वरसहितान्सतः अ
वमन्यंते॥९॥ किंच एवं वर्त्तमाना नास्ते वेदतत्त्वार्थं स्फुटमपि न जानंतीत्याह। सर्वेष्विति॥ किं न रूपेण
वस्थितं तदाह॥ आत्मानमीश्वरं आत्मतया ईश्वरतया वाऽवस्थितं॥ एवमप्यसंगतामाह॥ यथा ख
मिति॥ पुरुषार्थतामाह॥ अभीष्टं। स्फुटत्वमाह॥ वेदोपगीतं चेति॥ न शृण्वतः मनोमनोरथानां अवाय
मिषमद्यसेवाविषयाणां वार्त्तया प्रवदंति॥१०॥ ॥ ॥

तत्रयेऽज्ञास्तेभवद्विधानामनुग्राह्याइत्याह। दूरइति। दूरेहरिकथाश्रवणं येषांते अतएवदूरेचअच्यु
तकीर्त्तनं येषांते। दूरेअच्युतकीर्त्तनाश्चेतिवा॥४॥ज्ञानलवदुर्विदग्धास्त्वचिकित्स्यत्वादुपेक्ष्याइत्य
शयेनाह॥ विप्रइति॥श्रोतेनउपनयनाख्येनउपलक्षणमेतत्॥ अध्ययनादिनापिहरेःपदांति
कंतद्भजनोत्तमाधिकारंप्राप्ताअपिसुत्यंतिकर्म्मफलेषुसज्जंते॥ कुतः आम्नायेषुयेवादाःअर्थवा
दाःतेमोहकतयाविद्यतेयेषांते। दत्तदुक्तंगीतासुयामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः।वेद

दूरेहरिकथाःकेचित्दूरेचाच्युतकीर्त्तनाः॥ स्त्रियःशूद्रादयश्चैवतेऽनुकंप्याभवादृशां॥४॥ वि
प्रोराजन्यवैश्यौवाहरेःप्राप्ताःपदांतिकं॥श्रौतेनजन्मनाथापिमुह्यन्त्याम्नायवादिनः॥५॥
कर्म्मण्यकोविदाःस्तब्धामूर्खाःपंडितमानिनः॥वदंतिचाटुकान्मूढायया माध्व्यागिरोत्सुकाः॥६॥

वादरताःपार्थनान्यदस्तीतिवादिनइत्यादिना॥५॥ भक्तिमार्गादाक्षिप्यतेषांमोहंप्रपंचयन्निन्दति
कर्माणीत्यादिना। अकोविदाःयथाबंधकंनभवतितथाकर्तुमज्ञाः।नचाभिज्ञाम्मन्यंते।।यतस्त
त्राःअनम्राःस्तब्धत्वेहेतुःयतोमूर्खाअपिपंडितावयमितिमानवंतः।अतःअयामसोममम्तृ
अभूम।अन्तयंरहवैचातुर्मास्ययाजिनःसुकृतंभवतियत्रवोष्णंनचशीतंस्यान्नग्लानिर्नापि
शतयइत्यादिकयाययामाध्व्यागिरोत्सुकाःसंतोमनस्तयाचाटुकान्अप्सरोभिःसहविचरि
ष्यामइत्यादिप्रियान्शब्दान्वदंति ॥६॥ ॥

रतनाषम वंशीनर जु

भा॰प्र॰
२३

23

श्रुत्यानिवृत्तिरुच्यते तेन तथा सति स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात्॥ अतः क्वचित्प्रा
प्स्यतोऽप्यर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वाराऽन्यनिवृत्तिः फलतो भवति। तद्यथा इमामगृभ्णन्रशना
मृतस्येत्यश्वाभिधानीमादत्त इत्यत्र रसेनाल्लिंगतो गर्दभाश्वाभिधानीरशनाद्वये प्राप्ततो मंत्रस्यापूर्वविधि
द्वारा परिसंख्योच्यते॥ यथोक्तं तंत्रवार्तिके॥ अप्राप्तविधिरेवायमतो मंत्रस्य निश्चितः॥ परिसंख्या
फले नो ज्ञानविशेषः पुनः श्रुतेरिति। क्वचित्तु रागतो नित्यप्राप्तस्याप्राप्तांशपूरणलक्षणस्य नियम
फलस्याप्यभावान्नियमविधिद्वारा फलतः परिसंख्या भवति॥ यथा पंच पंचनखा भक्ष्या इति। त
था रागतो नित्यवत्प्राप्तस्य व्यवायादेर्विवाहादिनियमेनाभ्यनुज्ञाद्वारा परिसंख्यैवेति। ननु यद्यप्य
नुज्ञामात्रमेतदिवेतु। तर्हि ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति॥ घोरायां भ्रूणहत्यायां पच्य
ते नात्र संशय इत्यादिदोषश्रवणं न स्यात्॥ नैष दोषः। मनसि कामे सत्यपि तस्यामनुच्छाद्वेषाद्वा ता
मनुपगच्छतो दोषश्रवणोपपत्तेरिति सर्वमनवद्यं॥ ११॥ ॥ ॥

रा॰म॰
२३

ननुव्यवायादीनामपि अतोभार्यामुपेयात् इतशेषंभक्षयेदित्यादिना विधिः तत्वात्किमेवं निंद्यते अत आह
लोकइति। व्यवायः स्त्रीसंगः नित्याः रागत एव नित्यप्राप्ताः जंतोः प्राणिमात्रस्य अतस्तत्र नास्तु चोदना
विधिर्नास्ति। ननु अतोभार्यामुपेयादि विधिर्दर्शितः सत्यं न त्वयमपूर्वविधिः। रागतः प्राप्तत्वात् किंतु नियम
विधिरूपेण रागिणामभ्यनुज्ञामात्रं क्रियते तदाह व्यवस्थितिरिति॥ तेषु व्यवायादिषु कैः। विवाह

लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना॥ व्यवस्थिति
स्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा॥११॥

यज्ञसुराग्रहैः विवाहविषये एव व्यवायः कार्यः यज्ञ एवामिषसेवा सौत्रामण्यां सुराग्रहान्गृह्णातीति
श्रुतेस्तत्रैव मद्यसेवेति नियमः क्रियते। ननु च नियमपक्षे प्राप्यावश्यकत्वान्न निन्दा युक्ता अत आह॥ आ
सु निवृत्तिरिष्टेति॥ अयं भावः नायं नियमविधिरपि नित्यप्राप्तत्वात् अतो निवृत्तिः परिसंख्यैव आसु
व्यवायामिषमद्यसेवासु विधिरिष्टः। कथं तर्हि व्यवस्थितिरित्युक्तं। उच्यते। न तावत्परिसंख्याविधिना
॥११॥

एवंभगवत्पराङ्मुखानां बहुदोषतां प्रपंचयन्निंदां प्रपंचयति पंचभिः। ये त्वनेवंविदोऽसंत इति। अ
नेवंविदः न एवं धर्म्मं विदंतीति ये ते विस्रब्धाः निःशंकाः अनेन मम नोरथो भविष्यतीति विश्वस्ता वा॥
तदानींतनपोषणेन वा तैः पशुभिर्विश्वस्ताः ते च पशवः प्रेत्य अमुत्र तान् खादंति॥ मांसभक्षयिता
मुत्र यस्य मांसमिहाद्म्यहं॥ एतन्मांसस्य मांसत्वं प्रवदंति मनीषिण इति वचनात्॥१४॥ अभिचारा

ये त्वनेवंविदोऽसंतस्तब्धाः सदभिमानिनः॥ पशून्द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान्॥१४
द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरं॥ मृतके सानुबंधेस्मिन्बद्धस्नेहाः पतंत्यधः॥१५॥ ये कै
वल्यमसंप्राप्ता ये चातीताश्च मूढतां॥ त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते॥१६॥ एत आत्म
हनोऽशांता अज्ञाने ज्ञानमानिनः॥ सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः॥१७॥ हित्वात्मायासर
चिता गृहापत्यसुहृच्छ्रियः॥ तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः॥१८॥

दिनाद्विषंतः। मृत
के देहे सानुबंधे पुत्रादिसहिते॥१५॥ अज्ञास्तत्त्वज्ञैरनुकंपितास्तरंतीति तत्त्वज्ञास्तु स्वतः ये तु ना
त्यंतमज्ञाः न च तत्त्वज्ञाः ते त्वरालवर्त्तिनः पतंतीत्याह ये इति॥ कैवल्यं तत्त्वज्ञानं असंप्राप्ताः॥ अत्र
हेतुः त्रिवर्गप्रधाना अक्षणिकाः उपशांतिलक्षणरहिताः॥ देहादिस्थैर्य्यबुद्ध्यो वा स्वयमेवात्मानं घातयं
ति॥१६॥ तदाह। एत इति। आत्महनः आत्मापह्नवकर्त्तारः। अज्ञाने कर्म्मणि तथा च श्रुतिः॥ असुर्य्या नाम
मते लोका अंधेन तमसावृताः॥ तांस्ते प्रेत्यापि गच्छंति ये के चात्महनो जना इति॥१७॥ या गृहापत्यसुहृच्छ्रिय

तदेवंव्यवायादिमनोरथाकुलितत्वादमीअमात्मानंनघ्नंत्येवेत्युक्तं॥ इदानींधनस्यापिधर्म्मद्वारापरमात्म
पापकस्यद्रव्योपभोगार्थविनियोगान्नात्मज्ञानगंधोपीत्याह। धनंचेति। धर्म्मएवैकंफलंयस्यतत्कुतःयतः
धर्म्मात्सविज्ञानमपरोक्षज्ञानसहितंज्ञानंपरोक्षज्ञानंभवति। कथंभूतंअनुप्रशांतिअनु अनंतरमेवप्र
कृष्टाशांतिःनिर्वाणलक्षणायस्यतत्॥ एवंभूतंधनंगृहेषुदेहाद्यर्थंयुंजंति॥१२॥ किंचान्यवस्थयापि
व्यवायाद्यप्यनुज्ञानेनयथेच्छं अपितुन्यथैवेत्याह। यदिति। यद्यस्मात्सुरायाःघ्राणभक्षः अवघ्राणं सएव

धनंचधर्म्मैकफलंयतोवैज्ञानंसविज्ञानमनुप्रशांति॥ गृहेषुयुंजंतिकलेवरस्यमृत्युंनपश्यं
तिदुरंतवीर्यं॥१२॥ यद्घ्राणभक्षोविहितःसुरायास्तथापशोरालभनंनहिंसा॥ एवंव्यवायः
प्रजयानरत्याइमंविशुद्धंनविदुःस्वधर्म्मं॥१३॥

विहितःनपानं। तथापशोरप्यालंभनमेव
विहितं। नतुहिंसा। अयमर्थः॥ देवतोद्देशेनयत्पशुहननंतदालंभनं॥ वायव्यंश्वेतमालभेते
त्यादिश्रुतेः। नतुहिंसायावैरविहिताहिंसासानहिंसेतिकीर्त्यतइतिवचनात्॥ भक्षणोद्देशेन।
तुक्रियमाणंलौकिकहननंवद्हिंसैव अनेनत्वालंभनमेवविहितंनतुहिंसा॥ अतोनयथेष्टभ
क्षणमप्यनुज्ञेत्यर्थः। व्यवायोपिप्रजयानिमित्तभूतयानतुरत्या अतोमनोरथवादिनइमंविशुद्धंस्व
धर्म्मंनविदुरिति॥१३॥ ॥ ॥ ॥

महाराजोपलक्षणं छत्रचामरादियुक्तं वेदतंत्राभ्यां वैदिकेनागमिकेन च मार्गेण यजंति पूजयंति। परं ईश्वरं ज्ञातुमिच्छवः॥२८॥ नामान्याह। नमस्त इति॥२९॥ नानातंत्रविधानेनेति कलौ तंत्रमार्गस्य प्राधान्यं दर्शयति॥३०॥ रूढतां प्रावर्त्तयति। त्विषाकांत्या अकृष्णं इंद्रनीलमणिवदुज्ज्वलं। य

तं तदा पुरुषं मर्त्या महाराजोपलक्षणं॥ यजंति वेदतंत्राभ्यां परं जिज्ञासवो नृप॥२८॥ नमस्ते वासुदेवाय नमः संकर्षणाय च॥ प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः॥२९॥ नारायणाय ऋषये पुरुषाय महात्मने॥ विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः॥३०॥ इति द्वापर उर्वीश स्तुवंति जगदीश्वरं॥ नानातंत्रविधानेन कलावपि यथा शृणु॥३१॥ कृष्णवर्णं त्विषाकृष्णं सांगोपांगास्त्रपार्षदं॥ यज्ञैः संकीर्तनप्रायैर्यजंति हि सुमेधसः॥३२॥ ॥ ॥ ॥

25

द्वा त्विषाकृष्णं संकर्षणावतारं अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति। अंगानि हृदयादीनि। उपांगानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि। पार्षदाः सुनंदादयः तत्सहितं॥ यज्ञैः अर्चनैः॥ संकीर्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः सुमेधसो विवेकिनः॥३२॥ ॥

तदेवं भगवद्भक्तिरेव कर्त्तव्येति स्थिते तत्र विशेषं पृच्छति॥ कस्मिन्काल इति। किं वर्णः कीदृग्वर्णवान्॥ कीदृशः
कीदृगाकारः केन च वा नाम्ना केन वा विधिना॥१९॥ एषु कृतादिषु कालेषु नानाप्रकारा वर्णाभिधाकारा यस्य सः॥
नानैव विधिना विविधेनैव मार्गेण॥२०॥ तदेव वर्णादिचतुष्टयमाह। कृत इत्यादिना। कृष्णाजिनादीन् बिभ्र

राजोवाच॥ कस्मिन्काले स भगवान्किं वर्णः कीदृशो नृभिः॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्यतां॥१९
श्रीकरभाजन उवाच॥ कृतं त्रेता द्वापरं च कलिरित्येषु केशवः॥ नाना वर्णाभिधाकारो नानैव विधिनेज्य
ते॥२०॥ कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलांबरः॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू॥२१॥ म
नुष्यास्तु तदा शांता निर्वैराः सुहृदः समाः॥ यजंति तपसा देवं शमेन च दमेन च॥२२॥ हंसः सुपर्णो वै
कुंठो धर्मो योगेश्वरोऽमलः॥ ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते॥२३॥ त्रेतायां रक्तवर्णोऽसौ चतुर्बा
हुस्त्रिमेखलः॥ हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः॥२४॥ तं तदा मनुजा देवं सर्वदेवम
यं हरिं॥ यजंति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः॥२५॥ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः॥
वृषाकपिर्जयंतश्च उरुगाय इतीर्यते॥२६॥ द्वापरे भगवान् श्यामः पीतवासा निजायुधः॥ श्रीव
त्सादिभिरंकैश्च लक्षणैरुपलक्षितः॥२७॥

इति ब्रह्मचारिवेषोपदर्शितः॥२१॥ तपसा ध्यानेन॥२२॥ त्रिवृ
णा दीक्षांगभूता मेखला यस्य सः यज्ञमूर्तिः हिरण्यकेशः पिशंगकेशः॥ त्रय्या विद्यया वेदत्रयोक्तकर्म
भिः॥ पृश्निगर्भः पृश्न्याः पुत्रः॥ वृषाकपिः स्मृतः सन् वर्षति कामान् अकं पयति क्लेशानिति तथा॥ जयत्येव
सर्वदा जयंतः॥२६॥ श्यामः अतसीपुष्पसंकाशः॥ निजानि चक्रादीन्यायुधानि यस्य सः॥ श्रीवत्सो नाम वक्ष
सि दक्षिणभागे रोमावर्त्तः प्रदक्षिणावर्त्तः स आदिर्येषां करचरणादिगतपद्मादीनां तैः अंकैः चिह्नैः ल

॥ २८ ॥

भा॰ए॰
२६
ए

युगानुरूपाभ्यां नामरूपाभ्यां ॥३४॥ एतेषु चतुर्ष्वपि युगेषु कलिरेव श्रेष्ठ इत्याह। कलिमिति। गुणज्ञाः कलेर्गुणं जानंति।
थेत॥ ननु दोषाणां बहुत्वात्कथं सभाजयंति। तत्राह। सारभागिनः गुणांशग्राहिणः॥ कोसौ गुणस्तमाह। यत्रे
ति। तदुक्तं ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेर्चयन्॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति
३६॥ तस्मात्कलौ अतः अस्मात्संकीर्त्तनात्परमो लाभो नास्ति यतः संकीर्त्तनात्॥३७॥ किंच कृतादिष्विति।

एवं युगानुरूपाभ्यां भगवान्युगवर्त्तिभिः॥ मनुजैरिज्यते राजन्श्रेयसामीश्वरो हरिः॥३५॥ कलिं सभा
जयंत्यार्या गुणज्ञाः सारभागिनः॥ यत्र संकीर्त्तनेनैव सर्वः स्वार्थोभिलभ्यते॥३६॥ न ह्यतः परमो लाभो
देहिनां भ्राम्यतामिह॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः॥३७॥ कृतादिषु प्रजा राजन्कलावि
छंतिसंभवं॥ कलौ खलु भविष्यंति नारायणपरायणाः॥३८॥ क्वचित्क्वचिन्महाराज द्राविडेषु
च भूरिशः॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी॥३९॥ कावेरी च महापुण्या प्रतीची च महान
दी॥ ये पिबंति जलं तासां मनुजा मनुजेश्वर॥४०॥ प्रायो भक्ता भगवति वासुदेवेमलाशयाः॥ दे
वर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन्॥ सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृ
त्य कर्त्तं॥४१॥

अमलाशयाः संतःशयः प्रायशो भगवति भक्ता भवंति ॥३८॥ भक्तस्य विधिनिषेधनिवृत्तेः कृ
तकृत्यतामाह देवर्षीति॥ आप्ताः पोष्याः कुटुंबिनः इतरे देवादयः पंचयज्ञदेवताः एतेषां यथा अभक्तः
ऋणी अतएव तेषां किंकरः तदर्थं नित्यं पंचयज्ञादिकर्त्ता। तथा च स्मृतिः॥ हीनजातिपरिक्लीणमर्णार्थं
कर्म्मकारयेदिति। अयं तु न तथा कोसौ यः सर्वभावेन मुकुंदं शरणं गतः। कर्त्तं कृत्यं परिहृत्य यद्वा कर्त्तं भे

26

राम
२६

स्तुतिमाह। ध्येयमिति। हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे कथंभूतं ध्येयं ध्यातुं योग्यं सदेति सर्वत्र संबध्य
ते॥ ध्येयत्वे हेतवः दुर्दैवदुर्वादिभिर्यः परिभवः तिरस्कारः तं हंतीति तथा तत्॥ किं च अभीष्टदोहं मनोरथपूरकं॥
किं च तीर्थास्पदं गंगाद्याश्रयत्वेन परमपावनं शिवविरिंचाभ्यां नुतं स्तुतं महत्तमं॥ ननु तौ कृतार्थावेव किमर्थं ताभ्यां
नुतं तत्राह॥ शरण्यं आश्रययोग्यं सुखात्मकमित्यर्थः॥ तर्हि ब्रह्मादिस्तुत्यं प्राकृतस्य कथं गोचरः स्यात्तत्राह भृत्या
र्तिहं यस्य कस्यापि भृत्यमात्रस्यार्तिहंतृ॥ न केवलमागंतुकार्तिमात्रहं किं तु भवाब्धिपोतं संसारार्णवतारकं

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं॥ भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं
वन्दे महापुरुष ते चरणारविंदं॥३३॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा
यदगादरण्यं॥ मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरुष ते चरणारविंदं॥३४॥ रामराम

च॥३३॥ इदानीं स्वयमाप्तकामत्वान्निरपेक्षं भक्तार्थं च सापेक्षतां दर्शयन् श्रीरामचंद्रं स्तौति॥ त्यक्त्वेति॥ अ
र्थः सुदुस्त्यजा या सुरेप्सिता राज्यलक्ष्मीः तां त्यक्त्वा यदिति यदित्यर्थः यः अरण्यमगात्। किं राज्यवैक-
ल्यदर्शनेन न धर्मिष्ठः कुतः आर्यस्य गुरोर्दशरथस्य वचसा किं च एवं राज्यं त्यक्त्वापि भक्तवात्सल्येन द-
यितया सीतया ईप्सितं मायामृगं स्वर्णकारं योऽन्वधावत्॥ तस्य भगवतश्चरणारविंदं वंदे। यद्वा हे ध-
र्मिष्ठेति संबोधनं॥ तथाप्यविवक्षितत्वाद्यदर्थपदेन संधिर्न भवति॥ तथा यदगादिति चरणारविन्द-
मेवोच्यते। यच्च मायामृगमन्वधावत्॥ तन्नेपदारविंदं वंदे इत्यन्वयः॥ अन्यत्समानं॥३४॥ राम रामराम

एतदेवकैमुत्यन्यायेनस्फुटयति। वैरेणेति। शयनासनादौ वैरेणापिध्यायंतः तस्यगतिविलासादेः आत्तदत्त
धियः तत्तदाकाराधीर्येषां तेतत्साम्यमपुः किंपुनर्वक्तव्यमनुरक्तधियांतत्साम्यंभवतीति ॥४८॥ ननुपु
त्रस्नेहश्चेन्मोक्षहेतुः तर्हिसर्वेमुच्येरन्। तत्राह। मापत्यबुद्धिमिति। अपत्यमितिबुद्धिं माकृथाः अउ

वैरेणयंनृपतयः शिशुपालपौंडुशाल्वादयोगतिविलासविलोकनाद्यैः॥ ध्यायंतआत्तधियः शय
नासनादौ तत्साम्यमापुरनुरक्तधियांपुनः किं॥४८॥ मापत्यबुद्धिमकृथाः कृष्णेसर्वात्मनीश्वरे॥ माय
यामनुष्यभावेनगूढैश्वर्येपरेव्यये॥४९॥ भूभारासुरराजन्यहंतवेगुप्तयेसतां॥ अवतीर्णस्यनि
र्वृत्यैयशोलोकेवितन्यते॥५०॥ श्रीशुकउवाच॥ एतच्छ्रुत्वामहाभागोवसुदेवोतिविस्मितः॥ देव
कीचमहाभागाजहतुर्मोहमात्मनः॥५१॥ इतिहासमिमंपुण्यंधारयेद्यःसमाहितः॥ सविधूये
हशमलंब्रह्मभूयायकल्पते॥५२॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेजायंतेयनिमिसंवा
देपंचमोध्यायः॥५॥

गमः छांदसः॥५०॥ ननुकथमीश्वरोमानुषः स्यात्। कथंवातस्यविश्वसृष्ट्यादिकर्तुः पूतनाशोषणा
दिकर्माश्चर्यमिवनिरूप्यते। तत्राह। भूभाररूपाअसुराएवराजन्यास्तेषांहंतवेतानहंतुं। निर्वृ
त्यैमोक्षाय॥५१॥ इहअस्मिन्नेवदेहेशमलंमोहंविधूयब्रह्मत्वायकल्पते॥५२॥ इत्येकादशेपंचमः॥५॥

27

विहितकर्म्मणि वृत्तस्यापि कानिषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह। स्वपादमूलमिति॥ त्यक्तः अन्यस्मिन्देहादौ देवतांतरे
वा भावो येन॥ अतएव तस्य विकर्म्माणि प्रवृत्तिर्न संभवति। यच्च कथंचित्प्रमादादिना उत्पतितं भवति तदपि हरिर्धुनो
ति। ननु यमस्तं न मन्येत। तत्राह। परेशः। ननु च श्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात्तस्याज्ञाभंगं कथं सहेत
तत्राह। प्रियस्य। ननु नायं पापद्यपार्थं भजते तत्राह। हृदि संनिविष्टः। नहि वस्तुशक्तिरर्थिनामपेक्षते त्यर्थः

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः॥ विकर्म्म यच्चोत्पतितं कथंचिद्धुनोति सर्व्वं हृदि स
न्निविष्टः॥४२॥ नारद उवाच॥ धर्म्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः॥ जायंतेयान्मुनीन्प्रीतः सो
पाध्यायो ह्यपूजयत्॥४३॥ ततोंतर्दधिरे सिद्धाः सर्व्वलोकस्य पश्यतः॥ राजा धर्म्मानुपातिष्ठन्नवापप
रमां गतिं॥४४॥ त्वमप्येतान्महाभाग धर्म्मान्भागवतान्श्रुतान्॥ आस्थितः श्रद्धया युक्तो निःसंगो यास्य
से परं॥४५॥ युवयोः खलु दंपत्योर्यशसा पूरितं जगत्॥ पुत्रतामगमद्यद्वां भगवानीश्वरो हरिः॥४६॥
दर्शनालिंगनालापैः शयनासनभोजनैः॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्व्वतोः॥४७॥ रामराम

४२॥ जायंतेयान् जयंत्याः पुत्रान्॥४४॥ उपातिष्ठन् अनुतिष्ठन्॥४५॥ निःसंगो भूत्वा॥४६॥ शास्त्रपवि
येयमुक्ता युवां तु संगत एव कृतार्थावित्याह। युवयोरिति। वां युवयोः॥ न च सर्व्वकर्म्मपर्व्वणादिभा
गवतधर्म्मैरन्येषामिव युवयोः सत्वशुद्धिरापादनीया। पुत्रोपलालनेनैव भागवतधर्म्माः सर्व्वे स्वनिष्पा
न्ना इत्याह॥ दर्शनेति। कृष्णे पुत्र इति स्नेहं प्रकुर्व्वतोः वां तस्य दर्शनादिभिरात्मा पावितः शोधितः॥४७॥

बुद्धीन्द्रियादिभिर्दर्शनादिनाम्नाणेनचवत्नहेतुनादंडवत्प्रणिपातेननतावयंनमस्कृतवंतःस्मेतिविस्म
ये। यथाहुः दोर्भ्यांपदाभ्यांजानुभ्यामुरसाशिरसादृशा। मनसावचसाचेतिप्रणामोष्टांग ईरित इति
स्मरणाद्योक्तविस्मयायविशेषणं। कर्ममयादुरुपाशान्मुमुक्षुभिर्भावयुक्तैरयियत्केवलमंतर्हृ
दिचिंत्यते। ननुदृश्यते। तदद्यंननाः अहोभाग्यमितिस्पर्थः॥७॥ ननुममापिदृष्टादृष्टकर्मकरणात्कु
तोमत्पदारविंदचिंतनंकर्मपाशान्मुमुक्षुभिःक्रियते। तत्राहुःत्वमिति। हे अजित आस्तामिदानी

द्वाऊचुः॥ नताःस्मतेनाथपदारविंदंबुद्धीन्द्रियप्राणमनोवचोभिः॥ यच्चिंत्यतेंतर्हृदिभावयु
क्तैर्मुमुक्षुभिःकर्ममयोरुपाशात्॥७॥ त्वंमाययात्रिगुणयात्मनिदुर्विभाव्यंव्यक्तंसृजस्यव
सिलुंपसितद्गुणस्थः॥ नैतैर्भवानजितकर्मभिरज्यतेवैयत्स्वेसुखेव्यवहिते॰ भिरतोनवद्यः॥८

तत इदं अत्यंकर्मत्वंव्यक्तंमहदादिप्रपंचंसृजसिपालयसिसंहरसिच। तदप्यात्मन्येव। नपृ
थक्। दुर्विभाव्यंमनसाप्यन्यैरवितर्क्यंतद्गुणस्थः तस्यामायायागुणेषुनियंतृत्वेनस्थितः॥ अ
थचएतैः कर्मभिः भवान्नाज्यतेनलिप्यते। कुतःयोभवान् अनवद्यःरागादिरहितःयतःस्वे आ
त्मरूपेसुखेअव्यवहितेऽनावृतेभिरतः अतस्त्वंकर्मकुर्वन्नप्यात्मारामःपरमेश्वरइतिमुमु
क्षुभिश्चिंत्यतइतिभावः॥८॥

28

पद्मेन्व ब्रह्मादिभिः स्तुत्वा गंतुं विज्ञापितं दर्शि। उद्धवः प्रार्थयामास स्वधाम नय मामिति ॥१॥ अतः परमतिविस्तरे
णात्मविद्यां निरूपयितुं तत्प्रस्तावमाह। अथेति। आत्मजैः सनकादिभिः। अभ्यगात् द्वारकामिति चतुर्थे
नान्वयः ॥१॥ ननु तेषामुपेंद्रादिरूपं भगवंतं नित्यं पश्यतां केयमतिदिदृक्षा अत आह। वपुषेति। येन व

श्रीबादरायणिरुवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोभ्यगात् ॥ भवश्च भूतभव्येशो ययौ भूत
गणैर्वृतः ॥१॥ इंद्रो मरुद्भिर्भगवानादित्या वसवोश्विनौ ॥ ऋभवोंगिरसो रुद्रा विश्वे साध्याश्च देवताः
२॥ गंधर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ॥ ऋषयः पितरश्चैव सविद्याधरकिन्नराः ॥३॥ द्वारका
मुपसंजग्मुः सर्वे कृष्णदिदृक्षवः ॥ वपुषा येन भगवान्नरलोकमनोरमः ॥ ४ ॥ यशो वितेने लोके
षु सर्वलोकमलापहं ॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः ॥५॥ व्यचक्षताऽवितृप्ताक्षाः कृष्ण
मद्भुतदर्शनं ॥ स्वर्गोद्यानोपगैर्माल्यैश्छादयंतो यदूत्तमं ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरं ॥६॥

पुषा नरलोकमनोरमः सन् ॥४॥ सर्वलोकेषु यशो वितेने। तदतिसुंदरं वपुर्दिदृक्षवः ॥५॥ व्यचक्षत
अपश्यन् ॥ स्वर्गोद्यानस्थैर्माल्यैः चित्राणि अर्थरत्नबंधप्रायाणि पदानि अर्थाश्च यासु ताभिर्गी
र्भिः ॥६॥

भा॰ए॰
२६

किंच। नयनपाशिभिः संयतहस्तैः हविर्गृहीत्वा अध्वराग्नौ आहवनीयादौ याज्ञिकैर्यश्चिंत्यते। ननु य
स्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति वचनात्तत्तद्देवताः चिंत्यंते अत आहुः त्वय्या
निरुक्तेन विधिनाइंद्रादिरूपेण वयत्तपुरुषश्चिंत्यत इत्यर्थः॥ उत किंच अध्यात्मयोगे आत्माधि

यश्चिंत्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा॥ अध्या
त्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परमभागवतैः परीष्टः॥ ११॥ ॥

२७

कारे योगे योगिभिरपि आत्मनस्तव माया अणिमादिस्तां जिज्ञासुभिस्त्वत्कामैर्यश्चिंत्यते॥ परमभागव
तैर्मुक्तैर्यः परीष्टः सर्वतः पूजितः सत्तवांघ्रिर्नोशुभाशयधूमकेतुः स्यादिति पूर्वेणान्वयः॥ ११॥ राम

राम
२६

न चात्मारामस्य किं कर्मजं करणं न अत आह शुद्धिरिति। हे ईड्य हे ऋषभ। दुराशयानां रागिणां विद्याउपास
ना विद्यादिभिस्तथा शुद्धिर्न भवति। सत्वात्मनां सतां ते यशसि श्रवणेन संभृतया परिपुष्टया अभिवृद्ध
या सच्छ्रद्धया यथा स्यात्।। एवं पावनस्य यशसो चिन्तनाय तव कर्माचरणमिति भावः ॥९॥ तदेवं त्वद्य
शः श्रद्धे न शुद्धि हेतुः॥ ऽस्माभिस्तु तवाङ्घ्रिर्दृष्टः अतस्तवाङ्घ्रिर्नोऽस्माकं अशुभाशयानां विषयवास

शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः॥ सत्वात्मना
मृषभ ते यशसि प्रवृद्ध सच्छ्रद्धया श्रवणसंभृतया यथा स्यात्॥९॥ स्यान्नस्तवाङ्घ्रिरशु
भाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः॥ यः सात्वतैः समविभूतय
आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्वरतिक्रमाय ॥१०॥ ॥ ॥

नानां धूमकेतुः तद्दाहकः स्यात्। कथंभूतः यः क्षेमाय मोक्षाय मुनिभिर्मुमुक्षुभिः प्रेमार्द्र हृदा ऊह्य
मानश्चिन्त्यमानः यश्च सात्वतैर्भक्तैः समविभूतये समानैश्वर्याय वासुदेवादि व्यूहे अर्चितः। तेषु
च कैश्चिदात्मवद्भिर्धीरैः स्वरतिक्रमाय स्वर्गमतिक्रम्य वैकुण्ठप्राप्तये सवनशस्त्रिकालमर्चितः
॥१०॥

ननु युद्धे देवासुरादयः परस्परं जयंति जीयंते वा किमहं तत्र त्वत्पर आह । नसीति । मिथुर्मिथः । अर्द्यमानाः क्षुधादिभिः पीड्यमाना ब्रह्मादयोपि यस्य तव वशे भवंति । न तु जयपराजयेनास्वतंत्राः । कइव नसि नासिकायां ऊताः नासिकामाविध्य बद्धाः गावो बलीवर्दा इव । कुतः कालस्य कलयितुः प्रवर्त्तकस्य । तदेव कुतः प्रकृतिपुरुषयोरपि परस्य ते पुरुषोत्तमस्य पादो नः शं तनोतु ॥१४॥ प्रकृतिपुरुषाभ्यां परत्वमुप

नस्योतगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः । कालस्य ते प्रकृतिपुरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य ॥१४॥ अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः । सोयं त्रिनाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वं ॥१५॥ राम

30

पादयन् कालत्वेन पुरुषोत्तमत्वमाह । अस्येति । अस्य जगतः उदयादीनां हेतुरसि । कुतः अव्यक्तं प्रकृतिः जीवः पुरुषः महान् महत्तत्त्वं तेषां कालं नियंतारं त्वामाहुः । अक्षरात्परतः परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति श्रुतेः । किंच । अयं संवत्सरात्मको यः कालः त्रिनाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य सोपि त्वमेव । अतस्त्वमुत्तमपुरुष इति । तथा च गीतासु यस्मात्क्षरमिति ॥१५॥

एतेषां च मुनिसात्वतादीनां सेवकानां मध्ये परमभागवतेषु तल्लब्धा अपि न न प्रीतिरधिकेति स्तुवंति ॥ पर्युष्टयेति द्वा
भ्यां चक्रांदसः ॥ अहं चात्र वसामि । न त्वं च वक्षसि पर्युषितापीयं च सतीति प्रतिपत्निवत्सपत्नीवत् श्रीः संस्पर्द्ध
माना भवति । तथापि तोस्पर्द्धमानामनादृत्य यो भवान् पर्युषितयापि अमुया वनमालया भक्तैरर्पितया
मिति प्रीत्या सुप्रणीतं सुष्ठु संपादितं यथा भवति तथा अर्हणं पूजां आददत् स्वीकृतवान् सुप्रणीतमित्यर्हणवि
शेषणं वा ॥ तस्य त्वं वाङ्घ्रिर्नोऽशुभाशयधूमकेतुः स्यात् त्वदंघ्रिः ॥ अमुया अर्हणं आददत् । स नोऽशुभाशयधू
मकेतुः स्यादित्यन्वयः ॥ अथ चैवं संबंधः ॥ एतेभ्यो ध्यानार्चनादिनिष्ठेभ्योपि त्वदंघ्रिसि सुप्रतिष्ठ संस्तुतः श्रद्धावत एव
कृतार्थाः भगवतो यशःप्रियत्वादित्याहुः पर्युष्टया वशीकांता चित्यस्मात् परितः सर्वांगेषु स्थया कांतया शोभि

पर्युष्टया तव विभो वनमालयेयं संस्पर्द्धिनी भगवती प्रतिपत्निवत् श्रीः यः सुप्रणीतममुयार्हणमाददन्
नो भूयात्सदांघ्रिरशुभाशयधूमकेतुः ॥ १२ ॥ केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽ
सुरदेवचम्वोः ॥ स्वर्गाय साधुषु खलेष्वितराय भूमन् पादः पुनातु भगवन्भजतामघं नः ॥ १३ ॥ राम

तया वनमालया वक्षसि एकदेशे वर्त्तमाना श्रीः संस्पर्द्धमाना भवति । तथाप्यनादृत्य मधुव्रते वेदुस्थावर्त्तिनया कीर्ण
र्णमयापि जयसा वनमालयैव यो भवान् सुप्रणीतमर्हणं आददत् दित्यादि पूर्ववत् ॥ १२ ॥ त्वच्चरण स्वभक्तप
त्नपतः प्रसिद्ध एवेति स्तुवंतः प्रार्थयंते केतुरिति ॥ बलिबंधने त्रिभिर्विक्रमैर्युक्तः तत्र द्वितीयविक्रमे सत्य
लोकं गतस्तव पादः केतुः अत्युन्नतो विजयध्वजइव । तस्य पादस्यैति । त्रिपतत्पताकः त्रिधा पतंती त्रिषु लो
केषु वापतंती गंगा पताका यस्य सः ॥ तथा असुरदेवचम्वोः तत्सेनयोः भयाभयकरः ॥ साधुषु सुरेषु स्वर्गाय खल
लेषु असुरेषु इतराय अधोगमनाय । एवं केतुरूपस्ते पादः भजतां नोऽघं पुनातु शोधयतु अघादिति पाठे भजतां
नः इति कर्मणि षष्ठी ॥ अघात् भजतोस्मान् पुनात्विति । तथा च श्रुतिः ॥ चरणं पवित्रं विततं पुराणं येन पूत
स्तरति दुष्कृतानि ॥ तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम । लोकस्य द्वारमर्च्चिमत्पवित्रं ज्यो
तिष्मद्भ्राजमानं महस्वत् ॥ [illegible] दधिन्तं ददात्विति ॥ १३ ॥ रामस

तत्तस्मात्तव अमलरूपाया कथायास्तदेव उदं उदकं यद्वहंती नितथा कीर्त्तिनद्यः तथा पादावनेजसरितो गंगा
याश्च त्रिलोक्याः शमलानि हंतुं विभ्वः केन प्रकारेण। आनुश्रवं गुरोरुच्चारणमनुश्रूयत इति श्रुत

विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि हंतुं ॥ आनु
श्रवं श्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयं शुचिषदस्त उपस्पृशंति ॥१९॥ बादराय
णिरुवाच ॥ इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिं ॥ अभ्यभाषत गोविंदं प्रणम्यां
बरमाश्रितः ॥२०॥ श्री ब्रह्मोवाच ॥ भूमेर्भारावतारायपुरा विज्ञापितः प्रभो ॥ त्वम
स्माभिरशेषात्मंस्तत्तथैवोपपादितं ॥२१॥ धर्म्मश्च स्थापितस्सत्सु सत्यसंधेषु वै
त्वया ॥ कीर्त्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा ॥२२॥ ॥ ॥

श्रवो वेदस्तत्र भवं कीर्त्तिरूपं तीर्थं श्रुतिभिः श्रवणेंद्रियैः। अंघ्रिजं चांगसंगैः एवं शुचिषदः स्वाश्रम
धर्मस्थिताः तव तीर्थद्वयं उपस्पृशंति सेवंत इति ॥१९॥ विबुधैः सह ॥२०॥ विक्षिप्ता विस्तारिता ॥२

त्वमेव प्रकृत्यादिद्वारा जगत्सर्गादिहेतुरित्युक्तं तत्त्वेन प्रकारेण तदाहुः ॥ त्वत्त इति । त्वत्तः पुरुषो वीर्यं शक्तिं
समधिगम्य प्राप्य यया मायया स्वस्य महान्तं धत्ते । किमिव । अस्य विश्वस्य गर्भमिव । सोयं महान्तयैव माय
यानुगतः सन् आत्मनः सकाशादंडकोशं ससर्ज । त्वयानुगत इति पाठेपि तया मायया त्वयाधिष्ठितः
सन्नित्यर्थः ॥ १६ ॥ न चैवं भूतमीश्वरं त्वं मम कुतो वगतं तदाहुः ॥ तदिति । तत्तस्मात्तस्थुषः स्थावर
स्य जगतो जंगमस्य च भवानधीशः ॥ यच्च स्मान्मायया उत्था उज्जृंभिता ये गुणा विक्रिया इंद्रियह

त्वत्तः पुमान्समधिगम्य यया स्ववीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः ॥ सोयं तयानुगत आत्म
न आंडकोशं हैमं ससर्ज बहिरावरणैरुपेतं ॥ १६ ॥ तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययो
त्थगुणविक्रिययोपनीतान् ॥ अर्थान् जुषन्नपि हृषीकपते न लिप्तो येन्ये स्वतः परिहृतादपि बि
भ्यति स्म ॥ १७ ॥ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु
षोडशसहस्रमनंगबाणैर्यस्येंद्रियं विमथितुं करणैर्न विभ्व्यः ॥ १८ ॥

त्रिः तयोपनीतान् अर्थान् विष-
यान् जुषमाणोपि हे हृषीकपते न लिप्तस्त्वं ये त्वन्ये जीवा योगिनो वा स्वतः परिहृतादपि विषमा-
नानुसक्ता ह्यविषयजोषणाद्बिभ्यति । वासनामात्रेणैव बध्यंत इत्यर्थः ॥ १७ ॥ अलिप्तत्वमाहुः स्मायेति । स्मा
यावलोकः मंदस्मितविलसितो वलोकः तस्य लवः कटाक्षः तेन दर्शितो यो भावो भिप्रायः तेन मनोहारि
यद्भ्रूमंडलं तेन प्रहिता ये सौरता मंत्राः तैः शौंडैः प्रगल्भैः अनंगबाणैः कामस्य बाणैः संमोहनैः करणैः का
मकलाभिः षोडशसहस्रं पत्न्यः यस्येंद्रियं मनः विमथितुं क्षोभयितुं न विभ्व्यः न समर्थाः । सम्भवान्त्वि

पद्यावलीटीका: ॥ १८ ॥

वैकुंठंयास्यन्नत्वभवनंयास्यामि॥३१॥प्रभासंयास्यामइतिवदतोयमभिप्रायः एतेदेवांशाःस्वाधिकार

इदानींनाशआरब्धःकुलस्यद्विजशापतः॥यास्यामिभवनंब्रह्मन्नेतदंतेतवानघ॥३१॥श्री
शुकउवाच॥इत्युक्तोलोकनाथेनस्वयंभूःप्रणिपत्यतं॥सहदेवगणैर्देवःस्वधामस
मपद्यत॥३२॥अथतस्यांमहोत्पातान्द्वारवत्यांसमुत्थितान्॥विलोक्यभगवानाह
यदुवृद्धान्समागतान्॥३३॥श्रीभगवानुवाच॥एतेवैसुमहोत्पाताव्युत्तिष्ठंतीहसर्वतः
शापश्चनःकुलस्यासीद्ब्राह्मणेभ्योदुरत्ययः॥३४॥नवस्तव्यमिहास्माभिर्जिजीवि
षुभिरार्यकाः॥प्रभासंसुमहापुण्यंयास्यामोद्यैवमाचिरं॥३५॥यत्रस्नात्वादक्षशा
पाद्गृहीतोयक्ष्मणोडुराट्॥विमुक्तःकिल्बिषात्सद्योभेजेभूयःकलोदयं॥३६॥

नेवारईतिनतुसद्योमोदृंद्वारवत्यांतुमताविमुच्येरन्नतस्मादभ्युदयफलंप्रभासंनेष्यामीति॥३५॥दक्ष
शापाद्यक्ष्मणागृहीतश्चंद्रोयत्रस्नात्वैवकिल्बिषात्तद्रोगदुःखात्सद्योमुक्तःसन्कलाविवृद्धिंभेजे॥३६॥

त्र द्दामानि वृत्तानि विक्रमायेषु तानि कर्म्माणि ॥२३॥ वीर्य्यशौर्य्ययुक्तया श्रिया ॥२९॥ उद्वेलेन त्वं चिनमर्प्यादिन
॥३०

अवतीर्य्य यदोर्वंशे बिभ्रद्रूपमनुत्तमं ॥ कर्म्माण्युद्दामवृत्तानि हिताय जगतोऽकृथाः
॥२३॥ यानि ते चरितानीश मनुष्याः साधवः कलौ ॥ शृण्वंतः कीर्त्तयंतश्च तरिष्यं
त्यंजसा तमः ॥२४॥ यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम ॥ शरच्छतं व्यतीयाय
पंचविंशाधिकं प्रभो ॥२५॥ नाधुना तेऽखिलाधार देवकार्य्यावशेषितं ॥ कुलं च वि
प्रशापेन नष्टप्रायमभूदिदं ॥२६॥ ततः स्वधाम परमं विशस्व यदि मन्यसे ॥
सलोकान् लोकपालान्नः पाहि वैकुंठ किंकरान् ॥२७॥ श्रीभगवानुवाच ॥ अ
वधारितमेतन्मे यदात्थ विबुधेश्वरा ॥ कृतं वः कार्यमखिलं भूमेर्भारोऽवतारि
तः ॥२८॥ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं ॥ लोकं जिघृक्षद्रुद्धं मे वेलये
व महार्णवः ॥२९॥ यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलं ॥ गंतास्म्यनेन लोको
यमुद्वेलेन विनंक्ष्यति ॥३०॥ ॥ ॥ ॥ ॥

सप्तमेतदुद्धवायात्मज्ञानसिध्ये हरिः स्वयं अवधूते निहासोक्तगुरुषट्कमवर्णयत् ॥१॥ यदात्थेत्यं संदर्त्येत्तत्कुलमि तिस्वर्वासं वैकुंठवासं गतिः ॥२॥ त्वं च सर्वत्यागेन आत्मनिष्ठो भवेति वक्तुमाह कुलमिति त्रयेण ॥३॥ तदेवा यं नष्टमंगलो भविष्यतीति ॥ न वस्तव्यमेव त्वया ॥४॥ ननु गुणदोषाभ्यां विषमे लोके कुतः समदृष्टिः स्याम

श्रीभगवानुवाच ॥ यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेभिकां क्षिणः ॥१॥ मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ यदर्थमवतीर्णोहमंशेन ब्रह्मणार्थितः ॥२॥ कुलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रः सप्तमे ह्येनां पुरीमाप्लावयिष्यति ॥३॥ यर्ह्येवायं मया त्यक्तो लोकोयं नष्टमंगलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥४॥ न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले ॥ जनो धर्मरुचिर्भद्र भविष्यति कलौ युगे ॥५॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु ॥ मय्यावेश्य मनः सम्यक् समदृक् विचरस्व गां ॥६॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं गृह्य माणं च विद्धि मायामनोमयं ॥७॥ पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदोषभाक् ॥ कर्माकर्मविकर्मेति गुणदोषधियो भिदा ॥८॥

तत्राह ॥ यदिदमिति ॥ मन आदिभिर्गृह्यमाणं मनोमयत्वान्मायेति विद्धि ॥ तदपि न स्थि रं ॥ किं तु नश्वरं च विद्धि ॥७॥ मनोमयत्वे हेतुः ॥ पुंस इति ॥ अयुक्तस्य विक्षिप्तमनसः नानार्थो भेद विषयो भ्रमः ॥ स भ्रम एव गुणदोषभाक् ॥ ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्यतोक्ता ॥ न भ्रमविजृंभित गुणदोषबु द्धेः पुंसः कर्म विहितं अकर्म तल्लोपः विकर्म निषिद्धमिति भेदः ॥ अविद्यावद्विषयाण्येव वेद इत्यर्थः ॥८॥

गरिजः कमनीयान् । अंघ्रसा अंजसेन ॥ ३७ ॥ अस्तेति । यथा सुक्षेत्रे बीजमुप्तं बहुफलं भवति तथा दानं सत्पात्र इति द्योतय
ति ॥ ३८ ॥ लोके मर्त्यलोके ॥ ४२ ॥ न प्रत्यहन् । न प्रतिहतवान् ॥ ४३ ॥ शय्यादिषु त्वां भक्ता नित्यं सेवितवंतो वयं कथं
वयं च तस्मिन्नात्मलुप्तप्रर्यथित्वापि स्त्वन्सुरान् ॥ भोजयित्वो शिज्जो विप्रान्नानागुणावतांधसा ॥ ३७ ॥ तेषु दानानि
पात्रेषु श्रद्धयोप्त्वा महांति वै ॥ वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवं ॥ ३८ ॥ शुक उवाच ॥ एवं भगवतादिष्टो
यादवाः कुलनंदन ॥ गंतुं कृतधियस्तीर्थं स्पंदनान्समयूयुजन् ॥ ३९ ॥ तन्निरीक्ष्योद्धवो राजन् श्रुत्वा भगवतोदि
तं ॥ दृष्ट्वारिष्टानि घोराणि नित्यं कृष्णमनुव्रतः ॥ ४० ॥ विविक्त उपसंगम्य जगतामीश्वरेश्वरं ॥ प्रणम्य शिरसा
पादौ प्रांजलिस्तमभाषत ॥ ४१ ॥ उद्धव उवाच ॥ देवदेवेश योगेश पुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलं नूनं
लोकं संत्यक्ष्यते भवान् ॥ ४२ ॥ विप्रशापं समर्थोपि प्रत्यहन्न यदीश्वरः ॥ नाहं तवांघ्रिकमलं क्षणार्धमपि केशव
॥ ४३ ॥ त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ॥ तव विक्रीडितं कृष्ण नृणां परममंगलं ॥ कर्णपीयूषमास्वा
द्य त्यजत्यन्यस्पृहां जनः ॥ ४४ ॥ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु ॥ कथं त्वां प्रियमात्मानं वयं भक्ता
स्त्यजेमहि ॥ ४५ ॥ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः ॥ उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥
४६ ॥ वातरशना य ऋषयः श्रमणा ऊर्ध्वमंथिनः ॥ ब्रह्माख्यं धाम ते यांति शांताः संन्यासिनोमलाः ॥ ४७ ॥ वयं
त्विह महायोगिन् भ्रमंतः कर्मवर्त्मसु ॥ त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ ४८ ॥ स्मरंतः कीर्तयंतस्ते कृतानि
गदितानि च ॥ गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडंबनं ॥ ४९ ॥ एवं विज्ञापितो राजन् भगवान्देवकीसुतः ए
कांतिनं प्रियं भृत्यमुद्धवं समभाषत ॥ ५० ॥ इति ६ षष्ठोध्यायः ॥ त्यजेम ॥ ४५ ॥ त्वत्कुमशक्नुवन्त्याश्चर्यं येन माया भ
यादित्याद त्वयेति । चर्चिता अलंकृताः ॥ निक्षिप्तं जयेम ॥ ४६ ॥ संन्यासिनो हि ब्रह्मचर्यादिक्लेशैः कथंचित्तरं
ति । वयं त्वनायासेनैव तरिष्याम इत्याह [illegible] ॥ तावकैर्भक्तैः सह त्वद्वार्तया

उवाच

त्वं तु सर्वं परित्यज्य त्यागाद्युपदेशमात्मनो योगं प्रमन्वानः पृच्छति योगेशेति॥ योगफलदातृ हे योगवित् दां न्यासः न्यासो नाम त्यागो निक्षेपविशेषः॥ यद्वा योगो विन्यस्यते क्रियते यस्मिन् योगात्मन् योगे आत्मा प्रकटो भवति यस्य योगस्वरूपेति वा॥ योगस्य संभवो यस्मात्। चतुर्भिरेतैः संबोधनैः स्वमहिम्ना केवलं त्वयोपदिष्टं न तु मदधिकारं पर्यालोच्येति द्योतितं तदाह निःश्रेयसायेति॥ न चायं स्वपारार्थं सर्वस्वदानादिवदयं त्यागः किंतु संन्यासलक्षणः अप्रत्यापन्निरूपः॥१४॥१५॥ एवं प्रति त्यागाद्युपदिष्टं सोऽहं मृतमतिः कुतः ममेति अहमिति च

श्रीउद्धव उवाच॥ योगेश योगविन्यास योगात्मन् योगसंभव॥ निःश्रेयसाय मे प्रोक्तस्त्यागः संन्यासलक्षणः॥१४॥ त्यागोऽयं दुष्करो भूमन् कामानां विषयात्मभिः॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः॥१५॥ सोऽहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे॥ तत्त्वंजसा निगदितं भवता यथाहं संसाधयामि भगवन्ननुशाधि भृत्यं॥१६॥ सत्यस्य ते स्वदृश आत्मन आत्मनोऽन्यं वक्तारमीश विबुधेष्वपि नानुचक्षे॥ सर्वे विमोहितधियस्तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः॥१७॥

सानुबंधे पुत्रादिसहिते त्वन्मायया विरचिते आत्मनि देहे विगाढो निमग्नः अतः तत् तु भगवता निगदितं यथाहमंजसा संसाधयामि तथा भृत्यं मामनुशाधि शिक्षय॥१६॥ मया संक्षेपतउक्तं विस्तरतस्त्वन्यान्पृच्छेति चेत् अत आह सत्यस्येति। स्वदृशः स्वप्रकाशस्य सत्यस्यात्मनः आत्मनो मां प्रतिवक्तारं ते त्वत्तः अन्यं नानुचक्षे न पश्यामि। स्वदृशः स्वतःसिद्धज्ञानात्तत्त्वत्तोऽन्यमिति वा॥ कुत इत्यत आह सर्व इति। बहिरर्थभावा विषयेष्वर्थबुद्धयः॥१७

कथमात्मनि परिच्छिन्ने विततं जगद्दीक्षणीयं तत्राह। आत्मानमिति॥ मयि ब्रह्मणि तद्रूपे ऽस्त्वीक्षस्व॥९॥ ननु एवं युक्त-
चित्तत्वेन कर्माकरणे देवादयो विघ्नं करिष्यन्ति तत्राह ज्ञानेति। ज्ञानं वेदतात्पर्यनिश्चयः विज्ञानं तद-
र्थानुभवः ताभ्यां सम्यक् युक्तः ततः आत्मानुभवेनैव तुष्टं चित्तं अतः शरीरिणां देवादीनां आत्मभूतः
अतएवैर्न प्रतिहन्यसे अयं भावः यावदनुभवं यथासंभवं कर्माणि कुर्यादेव॥ तदनन्तरं सर्वेषा-

तस्माद्युक्तेन्द्रियग्रामो युक्तचित्त इदं जगत्॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे॥९॥ ज्ञानवि-
ज्ञानसंयुक्त आत्मभूतः शरीरिणाम्॥ आत्मानुभवतुष्टात्मा नान्तरायैर्विहन्यसे॥१०॥ दोषबुद्ध्योभया-
तीतो निषेधान्न निवर्तते॥ गुणबुद्ध्या च विहितं न करोति यथार्भकः॥११॥ सर्वभूतसुहृच्छान्तो ज्ञान-
विज्ञाननिश्चयः॥ पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः॥१२॥ श्रीशुक उवाच॥ इत्यादिष्टो
भगवता महाभागवतो नृप॥ उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युतम्॥१३॥

मात्मभूतत्वान्न को-
पि विघ्नाचरतीति। तथा च श्रुतिः। तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति॥१०॥ न
चोत्पन्नज्ञानस्यापि यथेष्टाचरणप्रसंग इत्याह॥ दोषबुद्ध्येति। गुणदोषबुद्ध्यतीतोऽपि प्राक्तनसंस्का-
रान्निषेधान्निवर्तत एव किंतु न दोषबुद्ध्या विहितं च प्रायशः करोति न गुणबुद्ध्या च॥ यथार्भकः
संकल्पविकल्परहितः किंचित्करोति कुतश्चिन्निवर्तते तद्वत्॥११॥ एवंभूतस्य न पुनः संसार
इत्याह॥ सर्वभूतेति। न विपद्येत न पुनः संसरेत्॥१२॥ ॥ग ॥

भा॰
२५

अतः पुरुषत्वं स्तौति। एकेति ॥२२॥ अनुमानमाह। अत्र पौरुष्यां पुरि युक्ता अप्रमत्ता अग्रात्यं ग्राह्यो भ्यो हंकारा
दिभ्यो व्यतिरिक्तं मां अद्धा साक्षात् मगयंति मार्गणप्रकारद्वयमाह ॥ गत्यमात्तैर्बुद्ध्यादिभिर्गुणैः हेतुभिः जडा
नां प्रकाशः स्वप्रकाशं मे कं विनान घटत इत्यनुपपत्तिमुखेन लक्षकैः ॥ तथा तैरेव लिंगैः व्याप्तिमुखेनानु-
मानं ईश्वरं प्रवर्त्तकं मगयंते ॥ बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वात् वाश्यादिवदिति तद्

एकद्वित्रिचतुःपादो बहुपादस्तथापदः ॥ बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥२२॥ अत्र मां मा
र्गयंत्यद्धा युक्ता हेतुभिरीश्वरं ॥ गत्यमात्तैर्गुणैर्लिंगैरग्राह्यमनुमानतः ॥२३॥ अत्राप्युदाहरंतीमम् इ-
तिहासं पुरातनं ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥२४॥ अवधूतं द्विजं कंचिच्चरंतमकुतोभयं
कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्म्मवित् ॥२५॥ यदुरुवाच ॥ कुतो बुद्धिरियं ब्रह्मन्नकर्त्तुः सुविशा

35

रदा ॥ यामासाद्य भवाल्लोकं विद्वांश्चरति बालवत् ॥२६॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः
हेतुनैव समीहंते आयुषो यशसः श्रियः ॥२७॥

कं भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्यादि
भिर्द्रष्टा लक्षणैरनुमापकैरिति। न चैतावता आनुमानिक आत्मेति मंतव्यं देहादिव्यतिरिक्तत्वे परार्थश्रु
ति मात्रस्यैवानुमानेन विवक्षितत्वात् ॥२३॥ भूयोन्वयव्यतिरेकाभ्याम् असंभावनादिनिवृत्ता वितिहास
माह। अत्रापीति ॥२४॥२५॥ सुविशारदा अतिनिपुणा ॥२६॥ सर्वलोकवैलक्षण्यमेवाह प्राय इति
धर्मादिषु विवित्सायां आत्मविचारे च मानवाः समीहंते प्रवर्तंते तत्रापि आयुरादेर्हेतुना कामनयैव ॥२७॥

राम
३५

केचिद्दुःशीला भवंति केचित्सेविताः फलकाले विनश्यंति केचिद्दत्ताः केचिद्दाताऽसमर्थाः केचित्तुच्छ-
स्थानभ्रष्टाः तद्व्यावृत्त्यर्थमनवद्यमित्यादीनि पंच विशेषणानि ॥ न अंतः कालतः पारं देशतश्च यस्य तत् ।
कालादिभिरकुंठो विकुंठलोको धिष्ण्यं स्थानं यस्य तं ॥ अहे भगवन्नह स्फुटं निर्वेदहेतुः वृजिनैर्दुःखै-
रभितप्तः । हकार गौरवाय उकारो सुन्त इव पठनीयः ॥ न चानवद्यत्वादीनि कुतो मम तदाह नारायणमिति
अनुकंपितामाह । नरो जीवस्तस्य सखा यं भजन् तं शरणं प्रपद्ये ॥ १७ ॥ न देवमसंभावनाविपरीतभावनाभ्या-

तस्माद्वंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं ॥ निर्विण्णधीरहमुह वृजिनाभित-
प्तो नारायणं नरसखं शरणं प्रपद्ये ॥ १८ ॥ श्रीभगवानुवाच ॥ प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः ।
समुद्धरंति ह्यात्मानमात्मनैवाशुभाशयात् ॥ १९ ॥ आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः । यत्प्रत्य-
क्षानुमानाभ्यां श्रेयोऽसावनुविंदते ॥ २० ॥ पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः ॥ आविस्तरां प्रपश्यं-
ति सर्वशक्त्युपबृंहितं ॥ २१ ॥

मुपादिष्टं तत्त्वमनवगाहमानं प्रति तन्निर्बंधे ऽयं गुरूपदेशं विनापि स्वान्व-
यव्यतिरेकाभ्यामेव तत्त्वप्रतिपत्तिर्भवतीति दर्शयितुमाह ॥ प्रायेणेति लोकतत्त्वस्य विचक्षणाः परीक्षकाः ।
अशुभाशयात् विषयवासनातः ॥ १९ ॥ तदुपपादयति आत्मन इति पश्वादिशरीरेऽप्यात्मैवाहिताहितज्ञाने गुरुः ॥ २० ॥
तत्र प्रत्यक्षं दर्शयति पुरुषत्वे चेति तथा च श्रुतिः पुरुषत्वे चाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञा-
तं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशना-
पिपासे एवाभिविज्ञानमिति ॥ २१ ॥

भा.ए०
३६

नाहृणोत्याति: ॥३६॥ क्षितेः तमां शिक्षितवानस्मीत्याह भूतैरिति ॥ आक्रम्यमाणः संपीड्यमानः ॥ न हि विद्वान् भूतानां दै
ववशवर्त्तित्वं विद्वान् ॥ व्रतं नियमं ३७ ॥ पर्वतरूपात् वृक्षरूपाच्च यो पृथिवी तस्याः शिक्षितमाह शश्वदिति स
र्वेहा परार्था: परोपकारार्था: सर्वा ईहा यस्य सः परार्थ एवैकान्ततः संभवो यस्य सः भूभृत्तः पर्वतान्नगशि
ष्यस्तस्माणा निर्भरप्रस्रवक्रियाः परार्था एव यथा तद्वत् ॥ तथा नगशिष्यः वृक्षशिष्यः सन् परात्मतां पराधीना
त्मतां वृक्षो यथा परैरवखंड्योत्पाट्य वा नयनमप्यनुमन्यते तद्वत् ॥ वायुरपि द्विविधः प्राणो बाह्यश्च तत्

यतो यदनुशिक्षामि यथा वा नाहुषात्मज । तत्तथा पुरुषव्याघ्र निबोध कथयामि ते ॥३६॥ भूतैराक्रम्य
माणोपि धीरो दैववशानुगैः ॥ तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतं ॥३७॥ शश्वत्परार्थसर्वेहः प
रार्थैकांतसंभवः ॥ साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मतां ॥३८॥ प्राणवृत्त्यैव संतुष्येन्मुनि
र्नैवेंद्रियप्रियैः ॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ॥३९॥ विषयेष्वाविशन्योगी नाना
धर्मेषु सर्वतः ॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ॥४०॥ पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणा
श्रयः ॥ गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक् ॥४१॥

अप्राणस्य गुरुत्वमाह ॥ प्राणवृत्त्येति ॥ प्राणो
स्याहारादिमात्रेण प्रवर्त्तते न तु रूपरसादीनिंद्रियविषयांस्तु नापेक्षते ॥ तथा मुनिरपि भवेदित्यर्थः ॥ अ
सांतरकरणे मनोविकल्पेन ज्ञाननाशः स्यात् अतो देहनिर्वाहः कर्त्तव्यः गुणलिप्सया तु वाङ्मनश्चवि
क्षिप्येत अतो नाधिकं लिप्सेदित्याह ज्ञानमिति नावकीर्येत न विक्षिप्येत ॥३९॥ विषयान्सेवमानोपि तेष्व
नासक्तिं बाह्याद्वायोः शिक्षितेत्याह विषयेष्विति नाना धर्मेषु शीतोष्णादिधर्मकेषु नहि वायुर्वनेदहने
वसज्जते तद्वत् ॥ यथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोपि वस्तुतो न तद्योगी एवं देहादिधर्मयो
गेणाहं कृत्यये प्रतीयमानोप्यात्मा न तद्धर्मवानिति संभावितमित्याह वायोरेव शिक्षितमित्याह पार्थिवेष्विति ॥४१॥

36

राम.
३६

त्वंतुनचस्यचितकर्मणः कर्त्ताभवसिनचकिंचिदीहसइच्छसि। नचशक्त्यावा अज्ञानेनवा अनैपुण्येनवावि
रूपत्वेनवा अवाग्मितयावा औदासीन्यंचरतएवनेत्याहकल्पइत्यादिना॥२८॥महानानंदश्चतत्रकुतइति
पृच्छतिजनेष्विति॥२९॥स्पर्शविहीनस्य विषयभोगरहितस्य। अत्रहेतुः केवलात्मनः कलत्रादिशून्यस्य

त्वंतुकल्पःकविर्दक्षःसुभगोमृतभाषणः॥नकर्त्तानेहसेकिंचित्जडोन्मत्तपिशाचवत्॥२८॥जनेषुद
ह्यमानेषुकामलोभदवाग्निना॥नतप्यसेग्निनामुक्तोगंगांभस्थइवद्विपः॥२९॥त्वंहिनःपृच्छतांब्रह्मन्ना
त्मन्यानंदकारणं॥ब्रूहिस्पर्शविहीनस्यभवतःकेवलात्मनः॥३०॥श्रीभगवानुवाच॥यदुनैवंमहा
भागोब्रह्मण्येनसुमेधसा॥पृष्टःसभाजितःप्राहप्रश्रयावनतंद्विजः॥३१॥ब्राह्मणउवाच॥संतिमे
गुरवोराजन्बहवोबुद्ध्युपाश्रिताः॥यतोबुद्धिमुपादायमुक्तोटामीहतांशृणु॥३२॥पृथिवीवायु
राकाशमापोग्निश्चंद्रमारविः॥कपोतोजगरःसिंधुःपतंगोमधुकृद्गजः॥३३॥मधुहाहरिणोमीनः
पिंगलाकुररोर्भकः॥कुमारीशरकृत्सर्पऊर्णनाभिःसुपेशकृत्॥३४॥एतेमेगुरवोराजंश्चतुर्विंशति
राश्रिताः॥शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः॥३५॥

॥३१॥बुद्ध्योपाश्रिताः स्वीकृतानन्तपरदेशे
न अटामिपर्यटामि॥३२॥शोभनंरूपंकीटस्यकरोतीतिसुपेशकृत्॥३४॥मेमयाआश्रिताःनदाहृ॥एतेषां
वृत्तिभिः आत्मनःशिक्षाःशिक्षणीयानर्थान्हेयोपादेयादीन्अन्वशिक्षंअनुशिक्षितवानस्मि॥३५॥

अग्नेरेव शिखानां तस्माद् क्वचिदिति॥ यथाग्निः परेकृ येव हविर्भुक्त्वा तिनथा मुनिरित्याह॥ दातॄणामिति॥ प्राग्
उत्तरं शुभं भूतं भविष्यच्च पापं॥४६॥ आत्मनो देहोपाधिकमेवोच्चनीचत्वादिन स्वाभाविकमित्यग्निदृष्टां
तेन संभावितमित्याह स्वमाययेति॥ स्वमायया स्वाविद्यया सृष्टं सदसल्लक्षणं देवतिर्यगादिरूपं
विग्रहमुड्डादिरूपं वा॥४७॥ आत्मनो जन्मादिषड्विकाराभावश्चंद्रदृष्टांतेन संभावितइत्याह॥ विसर्गा
द्याइति॥ विसर्गो जन्म श्मशानं नाशः॥ तत्रेयं ज्योतिःशास्त्रप्रक्रिया॥ आप्यमंडलं चंद्रः तेजोमयं मंड
लमादित्यः तयोरेकनक्षत्रावस्थाने चंद्रो न दृश्यते॥ चतुर्दश्यादित्यमंडलेन समदेशस्थितेनाव

क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रेय इच्छतां॥ भुंक्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभं॥४६॥ स्वमा
यया सृष्टमिदं सदसल्लक्षणं विभुः॥ प्रविष्ट ईयते तत्तत्स्वरूपोग्निरिवैधसि॥४७॥ विसर्गाद्याः
श्मशानांता भावा देहस्य नात्मनः॥ कलानामिव चंद्रस्य कालेनाव्यक्तवर्त्मना॥४८॥ रामराम

धानात्सा अमावास्या अथ षष्टिघटिकाभिश्चंद्रो नक्षत्रांतरं गच्छति आदित्यस्तु त्रयोदशभिरहोरात्रैः॥ अ
तः प्रतिपदमारभ्य विषमस्थितस्य आदित्यमंडलस्य पंचदशः पंचदशो भाग आप्यमंडले प्रतिबिंबितो
दृश्यते सा कलेत्युच्यते॥ एवं पंचदशे ह्नि त्रयोदशभिर्नक्षत्रैरंतरमिति राशिचक्रस्य सप्तविंशतिनक्ष
त्रात्मकस्य मध्ये संमुखौ चंद्रादित्यौ तिष्ठतः। तदा संपूर्णप्रतिबिंबं भच्छाया लांछितं दृश्यते सा पू
र्णिमा तस्याममावास्याप्रतिबिंबेन सह षोडशकलश्चंद्र उपचर्यते। ततः पुनः प्रतिपदमारभ्य मंडल
योर्विषमीभावात्कलाह्रासः तत्र यथा कला[illegible]त्पत्त्यादयो नाप्यमंडलस्य तथात्मनोपीत्याह। क

आकाशाच्छिक्षितं संभावनाद्वयमाह अंतर्हितश्चेति द्वयेन ॥ अंतर्हितश्च देहांतर्गतोपि मुनिरात्मनो देहा-
द्यसंगं अत एवाव्यवच्छेदं च भावयेत् कुतः स्थिरजंगमेषु समन्वयेन या व्याप्तिस्तया ॥ किं मणिषु सूत्रस्ये-
व व्याप्तिः न चिततस्य सर्वगतस्य तत्त्वतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया ॥ तत्त्वमसीतिश्रुतेः ॥ न-
न्वेतत्सर्वं कथं संभवति तत्राह ॥ नभस्त्वं तत्तुल्यत्वं संभावयेत् यथा नभसः सर्वगतस्य घटादिभिः संगः परिच्छे-
दो वा । एवमात्मनोपि संभवतीति ॥ ४२ ॥ किंच दूरस्थस्यात्मनो नागमापायि देहादिसंबंध इत्याह ॥ तेजोब-

अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन ॥ व्याप्त्याव्यवच्छेदमसंगमात्मनो मुनिर्नभस्त्वं वि-
ततस्य भावयेत् ॥ ४२ ॥ तेजोबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः ॥ न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः
पुमान् ॥ ४३ ॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणाम् ॥ मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकी-
र्तनैः ॥ ४४ ॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः ॥ सर्वभक्ष्योपि युक्तात्मा नादत्ते मलमग्निवत् ॥ ४५ ॥

बन्नमयैः ॥ तेजश्च आपश्च अन्नं पृथिवी च तन्मयैः कालसृष्टैः गुणैर्देहादिभिः पुमान्न संस्पृश्यते तद्वन्नभो-
वत्संभवतीति ॥ ४३ ॥ स्वच्छत्वादिभिर्गुणैः उदकं जगत्पुनातीति तत्र गुणाम्मया शिक्षिता इत्याह ॥ स्वच्छः नि-
र्मलः प्रकृतितः स्वभावतः स्निग्धः जनेषु अनुरागवान् माधुर्यः मधुरालापी । नृणां तीर्थभूः तीर्थस्थानं । अपां
मित्रं उदकतुल्यः अघादिभिर्मारे सरवायं पापात्पुनाति स्वच्छत्वादिगुणैर्या उदकसादृश्यं ज्ञातव्यं ॥ ४४ ॥
अग्नेः शिक्षितमाह ॥ तेजस्वी ज्ञानातिशयवान् विशेषतः तपसा दीप्तः दुर्धर्षः अक्षोभ्यः सचासावुदर-

विस्रब्धो निःशंको ॥ ५५ ॥ सा कपोती तर्प्पयंती सहासची द्विताला पादिभिः प्रीणयंती ॥ अत एव ते ना
नुकंपिना सती यंयंवा छ तितंतं कामं समनयत्ना संपादयामासा राजन्निति । त्वंयथेति स्र्चितं ॥

शय्यासनाटनस्थानवार्त्ताक्रीडाशनादिकं ॥ मिथुनीभूयविस्रब्धौ चेरतुर्वनराजिषु ॥ ५५ ॥
यंयंवांछति सा राजंस्तर्प्पयंत्यनुकंपिता ॥ तंतं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ॥ ५६ ॥
कपोती प्रथमं गर्भं गृह्णती काल आगते ॥ अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ॥ ५७ ॥
तेषु काले व्यजायंत रचितावयवा हरेः ॥ शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः ॥ ५८ ॥
प्रजाः पुपुषतुः प्रीतौ दम्पती पुत्रवत्सलौ ॥ शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ॥ ५९ ॥
तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः ॥ प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ॥ ६० ॥

५६ ॥ तेषु जलभरिते षंडेषु हरेः स्वभावकर्म्मादिशक्तिभिः रचितावयवाः पक्षिणः कोमलान्यंगानि
तनूरुहाश्च येषां ते ॥ ५८ ॥ पतत्रैः पक्षैः अदीनानां त्वद्यानां ॥ ६० ॥ ॥ ॥

सिद्धावलोकनेनाग्निदृष्टान्तेनैव देहानां क्षणभंगुरतया वैराग्यं प्रदर्शितमित्याह। कालेनेति। ओघवद्वेगो यस्य तेन आत्मनः संबंधिनां भूतानां देहानामित्यर्थः॥ अर्चिषां ज्वालानां॥४९॥ आदित्याच्छिक्षितमाह गुणैरिति। गुणैरिंद्रियैर्गुणान् विषयान् उपादत्ते यथाकालं अर्थिष्वागतेषु सत्सु विमुंचति च। न तेषु युज्यते। त्वचमिति दत्तमिति वा। अभिनिवेशं न करोति। गोभिः रश्मिभिः गाः सलिलानि गोपतिः सूर्यो यथा॥५०॥ स्वतो भेदशून्यस्याप्यात्मनो

कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ॥ नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषां॥४९॥ गुणैर्गुणानुपादत्ते यथाकालं विमुंचति॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः॥५०॥ बुध्यते स्वे न भेदेन व्यक्तिस्थ इव तद्गतः॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत्॥५१॥ नातिस्नेहः प्रसंगो वा कर्त्तव्यः क्वापि केनचित्॥ कुर्वन्विंदेत संतापं कपोत इव दीनधीः॥५२॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ॥ कपोत्या भार्यया सार्द्धमुवास कतिचित्समाः॥५३॥ कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ॥ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः॥५४॥

भेदप्रतीतिरुपाधिवशादित्यादित्यदृष्टान्तेनैव संभावितमित्याह बुध्यत इति। स्वे स्वस्वरूपे अवस्थित आत्मा भेदेन न बुध्यते। अभिव्यनक्तीति व्यक्तिरुपाधिः व्यक्तिस्थः उपाधौ प्रतिबिंबितः सन् तद्गतः उपाधिं प्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते॥ अर्कवदित्युभयत्र॥ ५१॥ कपोताच्छिक्षितमाह नातिस्नेह इति। स्नेहः प्रीतिः प्रसंगः उपलालनायासक्तिः॥५२॥ दृष्टान्तं प्रपंचयति। कपोतः कश्चनेति॥५३॥ तयोर्मिथः स्नेहप्रसंगौ दर्शयति कपोताविति त्रयेण। स्नेहगुणितं निबद्धं

दार्थ्यांतिके योजयति एवमिति। एवं गृहासक्तिस्तिरश्चामप्यनर्थहेतुः। मनुष्यस्य तु नितरां निंदितेत्याह यः प्राप्ये
ति॥७२॥ एकादशे सप्तमः॥ अष्टमेऽजगरादिभ्यो नवभ्यः शिक्षितं हरिः। अवधूतगिरा प्राह विवेकाय यदृ

सोहं शून्ये गृहे दीनो मृतदारो मृतप्रजः॥ जिजीविषे किमर्थं वा विधुरो दुःखजीवितः॥७०॥ तांस्तथै
वावृतान् शिग्भिर्मृत्युग्रस्तान्विचेष्टतः॥ स्वयं च कृपणः शिक्षु पश्यन्नप्यबुधोपतत्॥७१॥ तं लब्ध्वा लुब्ध
कः क्रूरः कपोतं गृहमेधिनं॥ कपोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहं॥७२॥ एवं कुटुंब्यशांतात्मा
द्वंद्वारामः पतत्रिवत्॥ पुष्णन्कुटुंबं कृपणः सानुबंधोवसीदति॥७३॥ यः प्राप्य मानुषं लोकं मु
क्तिद्वारमपावृतं॥ गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः॥७४॥ इति श्रीभागवते महापुराणे
एकादशस्कंधे सप्तमोध्यायः॥ ब्राह्मण उवाच॥ सुखमैंद्रियकं राजन् स्वर्गे नरक एव च देहिनां
यद्यथा दुःखं तस्मान्नेच्छेत्तद्बुधः॥१॥ ग्रासं सुमृष्टं विरसं महांतं स्तोकमेव वा॥ यदृच्छयैवाप
तितं ग्रसेदाजगरोऽक्रियः॥२॥

39

च्छं प्रति॥१॥ प्रारब्धकर्मभोगस्यावश्यंभावित्वात्तदर्थोद्यमे नैराश्यमुक्त्वा
योऽवश्याकर्तव्य इति अजगराच्छिक्षितमित्याह॥ सुखमित्यादिना। यदैंद्रियकं सुखं तत् स्वर्गे नरके
च भवत्येव॥ यथा दुःखं तस्माद्बुधस्तन्नेच्छेत॥१॥ शरीरनिर्वाहमात्रं तु यथालब्धेन कर्त्तव्यमित्याह
ग्रासं त्विति। आजगरः अजगरवृत्तिः। अक्रियः उदासीनः॥२॥ ॥ ॥

शिशून्बालान्प्रजाः पुत्रान् ॥६१॥ स्वालयांतिके। चरतः क्रीडतः तान् कपोतपुत्रान् आतत्य प्रसार्य ॥६३॥ उ
त्सुकत्वादेव वचनन्योपघातार्थं गतौ संतौ। पोषणं भक्ष्यं ॥६४॥ शिचा जालेन ॥६६॥ आत्मानुरूपां भार्यां च वि

स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया ॥ विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः ॥६१॥ ए
कदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ ॥ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं ॥६२॥ दृष्ट्वा तान्लु
ब्धकः कश्चित् यदृच्छातो वनेचरः ॥ जगृहे जालमातत्य चरतः स्वालयांतिके ॥६३॥ कपोतश्च कपो
ती च प्रजापोषे सदोत्सुकौ ॥ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ॥६४॥ कपोती स्वात्मजान्वीक्ष्य
बालकान् जालसंवृतान् ॥ तानभ्यधावत्क्रोशंती क्रोशतो भृशदुःखिता ॥६५॥ सासकृत्स्नेहगुणि
ता दीनचित्ताजमायया ॥ स्वयं चाबध्यत शिचा बद्धान्पश्यंत्यपस्मृतिः ॥६६॥ कपोतश्चात्मजान्बद्धा
नात्मनोप्यधिकान्प्रियान् ॥ भार्यां चात्मसमां दीनो विललापातिदुःखितः ॥६७॥ अहो मे पश्यतापा
यमल्पपुण्यस्य दुर्मतेः ॥ अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ॥६८॥ अनुरूपानुकूला च
यस्य मे पतिदेवता ॥ शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ॥६९॥ ॥ ॥

ललाप। अशोच विलापमाह। त्रयेण। अहो इति। अतृप्तस्य दुःखे। अकृतार्थस्य अर्थ
मसंपादयतः ॥६७॥ तानावृतान् पश्यन्नपि शिग्भिः जालेषु ॥६९॥ ॥ ॥

मधुकराकृतिमाह स्तोकमिति ॥ गृहान् गृहस्थान् ॥ अहिंसन् अपीडयन् । अयं भावः यथा मधुकरो विशिष्टगंध लोभेनैकस्मिन्नेव पद्मे वसन्तत्समये मुकुलिते तस्मिन् बध्यते । एवं मुनिरपि गुणलोभेनैकमेव गृहमाश्रितस्तन्मोहेन बध्यत इति ॥ ९ ॥ किंच ॥ अणुभ्यश्चेति द्विविधो मधुकृत् । मधुकृत् तत्पुष्पादाहृत्य गृह्णातीति मधुकृत् भ्रमरः मधु करोति आहारत्वेन स्वरूपेण चेति मधुमक्षिका च ॥ तत्र प्रथमाकृतिमुक्तं ॥ १० ॥ द्वि

स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता ॥ गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ॥ ९ ॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ॥ सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥ १० ॥ सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षितं ॥ पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही ॥ ११ ॥ सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षितं मक्षिका इव संगृह्णन्सह तेन विनश्यति ॥ १२ ॥ पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि स्पृशन्करीव बध्येत करिण्या अंगसंगतः ॥ १३ ॥ नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः ॥ बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा ॥ १४ ॥

तीयाकृतिमाह । सायमिदं भोक्ष्ये श्व इदं भोक्ष्ये इति भिक्षितमन्नादि न संगृह्णीत ॥ किंतु । पाणिपात्रस्तन्मात्रग्राही । यद्वा । उदरमेवामत्रं यस्य सः ॥ एकभिक्षायां तु उदरपात्रग्राही भवेत् संग्रही तु मक्षिकेव न भवति । न जीवतीत्यर्थः ॥ ११ ॥ एतद्विवृणोति पुनः सायंतनमिति ॥ १२ ॥ स्पर्शासक्तिर्नाशहेतुरिति गजाकृतिमित्याह पदापीति ॥ पादेनापि । दारवीं दारुमयीमपि ॥ गजो हि करिण्याः प्रदर्शनेन पिहिते गर्ते निपात्य बध्यते ॥ १३ ॥ किंच नाधिगच्छेदिति नोपगच्छेत् ॥ १४ ॥ रामराम

यदा नायतनं तदा किं कर्तव्यं तत्राह शयीतेति ॥ अनुपक्रमः निरुद्यमः दिष्टभुक् दैवमेव प्रापकमिति धैर्यवान् ३
ननु समर्थोऽपि शयीत तत्र किं उ मित्याह ओज इति ॥ ओजः इन्द्रियबलं सहः मनोबलं ॥ बलं शारीरमेवं तद्युक्तोऽ
पि देहमकर्मकमेव बिभ्रत् शयान एव भवेत्। वीतनिद्रः स्वार्थे दत्तदृष्टिश्च भवेत्। न पुनरीहेत। इन्द्रिय
वानपीति दर्शनादिव्यापारमपि निवारयति ॥ ४ ॥ समुद्राच्छिक्षितमाह मुनिरिति द्वाभ्यां प्रसन्नः स्वच्छः
गंभीरश्च ॥ दुर्विगाह्यत्वाच्च एवंभूत इति परिकल्पयितुमशक्यः अन्तर्भावमिप्राय तान्। दुरत्ययः अनति
क्रमणीयः तेजस्वित्वात् ॥ अनन्तपारः कालतो देशतश्चापरिच्छेद्यस्वरूपाविर्भावात् ॥ अक्षोभ्यः। अवि

शयीताहानि भूरीणि निराहारोऽनुपक्रमः ॥ यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक् ॥ ३ ॥ ओजःसहो
बलयुतं बिभ्रद्देहमकर्मकं ॥ शयानो वीतनिद्रश्च नेहेतेन्द्रियवानपि ॥ ४ ॥ मुनिः प्रसन्नगंभीरो दुर्वि
गाह्यो दुरत्ययः ॥ अनन्तपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ॥ ५ ॥ समृद्धकामो हीनो वा नारायणपरो मु
निः ॥ नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ॥ ६ ॥ दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ॥ प्रलोभि
तः पतत्यन्धे तमस्यग्नौ पतंगवत् ॥ ७ ॥ योषिद्धिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः ॥ प्रलो
भितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः ॥ ८ ॥

कार्यः रागाद्यभावात् ॥ स्तिमितोदः निश्चलोद
कोऽर्णवो यथा तद्वदेतैर्गुणैर्भवेदित्यर्थः ॥ ५ ॥ किंच वर्षासु सरिद्भिः समृद्धोऽपि सागरो यथा नोत्सर्पेत्
ग्रीष्मे तद्विहीनोऽपि न शुष्येत् ॥ तथा समृद्धकामस्तद्धीनो वा नन्दयेत न च शोचेदित्यर्थः ॥ अत्र हेतुः नारा
यणपरायणः न तु विषयपर इति ॥ ६ ॥ रूपगंधस्पर्शशब्दरसैः पंचभिर्विषयैर्मोहिताः पतंगभृंगकुर
गजहरिणमीना हताः अतस्तेषु नासक्तोऽपि चेत् एकः तद्वत्। पतंगमातंगकुरंगभृंगमीना हताः पंचभिरे
व पंच। एकः प्रमादी स कथं न हन्यते यः सेवते पंचभिरेव पंच चेति ॥ तत्र रूपविलासमोहितो यतिर्नश्यती
ति पतंगाच्छिक्षितमाह दृष्ट्वेति ॥ तमसि भावे पतति भित्तः ॥ ७ ॥ स्त्रियमुपलक्षितानि कल्पितत्वादप्रपंचयति ॥ योषिदिति ॥ प

२

पिंगलाया नैराश्यं शिक्षितमित्युक्तं तदाख्यानमाह॥ पिंगलेत्यादिना। मे मया शिक्षितं॥२२॥ स्वैरिणी कामचारिणी॥ संकेते रतिस्थाने॥२३॥ तान्वित्तवतः सधनान्॥ अन्तः वस्तु लक्षदान्। मूल्यदान्। कांतान्। सुरतार्हान्॥२४॥ अपिसंभावनायां अन्यो पि मामुपैष्यतीत्येवं दुराशया ये सुन्नरेणान्वयः॥२५॥ द्वार्यवर्त्तमाना

तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान्॥ न जयेद्रसनं यावज्जितं सर्वं जिते रसे॥२१॥ पिंगला नाम वेश्यासीद्विदेहनगरे पुरा॥ तस्या मे शिक्षितं किंचिन्निबोध नृपनंदन॥२३॥ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती॥ अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमं॥२४॥ मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ॥ तान्शुल्कदान्वित्तवतः कांतान्मेनेर्थकामुका॥ आगतेष्वपयातेषु सा संकेतोपजीविनी॥२५॥ अप्यन्यो वित्तवान्कोपि मामुपैष्यति भूरिदः॥ एवं दुराशया ध्वस्तनिद्रा द्वार्यवलम्बती॥२६॥ निर्गच्छंती प्रविशति निशीथं समपद्यत॥ तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः॥२७॥ निर्वेदः परमो जज्ञे चिंताहेतुः सुखावहः॥ तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम॥ २८॥ निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः॥ न ह्यंगाजातनिर्वेदो देहबंधं जिहासति॥२९॥

पुनः प्रविशति पुनर्निर्गच्छति। एवं कुर्वती निशीथं अर्द्धरात्रं प्राप॥२६॥ निर्वेदः अलंबुद्धिः। वित्तचिंतैव हेतुर्यस्य सः॥ यथा॥ यथावत्। मम। मत्तः शृणु॥२७॥ ननु किं निर्विण्णाया गीतश्रवणेन। तत्राह हि यस्मात्पुरुषस्याशापाशानां निर्वेदो यथा असिस्तथा छेत्ता तत्र हेतुः। नहीति। अंग हे राजन्॥२८॥

त्यागभोगविहीनो धनसंचयः परगामी भवतीत्यत्र मधुहा गुरुरित्याह नदेयमिति ॥ तदन्यो बलवानुभुंक्ते। तदप्य
न्यस्तत्र्यान्यः ॥ मक्षिकाभिः संचितं मधु यथा भुंक्ते न हंत ॥ ननु सुगुप्तं धनं कथमन्यो ज्ञास्यति हरिष्यति चेति
तत्राह अर्थवित ॥ निगूढस्थं तदुपायं च वेत्तीत्यर्थवित् ॥ यथा मधुहा तरुकोटरादिगतं मधु वेत्ति हरति च
१५ ॥ स्वाद्यामं विनापि भोगः संभवतीत्यत्रापि स एव गुरुरित्याह सुदुःखेति ॥ आशासानानामिति वक्त
व्ये वर्णलोप आर्षः यतिर्ब्रह्मचारी च पक्वान्नस्वामिना बुभो ॥ तयोरग्रमदत्वानुभुंक्त्वा चांद्रायणं च

नदेयं नोपभोग्यं च लुब्धैर्यत् दुःखसंचितं ॥ भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु ॥ १५ ॥ सुदुःखोपार्जि
तैर्वित्तैराशासानां गृहाशिषः ॥ मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनां ॥ १६ ॥ ग्राम्यगीतं न शृणुयाद्यतिर्व
नचरः क्वचित् ॥ शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात् ॥ १७ ॥ नृत्यवादित्रगीतानि जुषन्ग्राम्याणि
योषिताम् ॥ आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः ॥ १८ ॥ जिह्वयातिप्रमाथिन्या जनो रसविमोहि
तः ॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा ॥ १९ ॥ इंद्रियाणि जयंत्याशु निराहारा मनीषिणः ॥ वर्जयि
त्वा तु रसनं तन्निरन्नस्य वर्द्धते ॥ २० ॥

रेतदानि गृहिणामावश्यकत्वेन दानविधानात् ॥ १६ ॥ हरिणाच्छिक्षे
तमाद्ग्राम्येति। भगवद्गीतं श्रृणुयादेव। मृगयोर्लुब्धकस्य ॥ १७ ॥ हरिणशावादेव हरिणीसुतः ऋष्यशृंगोपि
गुरुर्ज्ञानव्यद्त्याह नृत्येति। वश्यो वश्यो भवेदिति शेषः ॥ १८ ॥ रसासक्तिर्नाशहेतुरिति मीनाच्छिक्षितमाह जिह्वये
ति। अतिप्रमाथिन्या अनितोभित्या। दुर्जयया ऋच्छति। प्राप्नोति। बडिशैः आमिषयुक्तैर्लोहकंट
कैः ॥ १९ ॥ दुर्जयत्वमुपपादयन्निंद्रियाणीति निराहाराः। अयं भावः यथाहारस्त्यज्यते तेन तदन्येंद्रियजयः केव
लं भवति। रसनेंद्रियं तु वर्द्धते। यदि तस्य जयते तर्हि पुनश्च रसासक्त्या सर्वेंद्रियक्षोभः स्यात्। अतो रसास
क्तिं परित्यज्य पथ्यवद्भुंजीत। प्राणावृत्त्यैव संतुष्येदित्यत्रोक्तमपि रसनस्यातिदुर्जयत्वज्ञापनायोच्यते

भा० ए०
४२

संतुष्टा गतोस्त्यामप्यहो मम मोहः इत्याह विदेहानामिति ॥ याहमसती ॥ अच्युतादन्यं कामं भोगमिच्छन्ती ॥ ३४ ॥ साए
वं निर्विण्णा सती अतः परमेवं करिष्यामीत्याह । सुहृदिति । अयमीश्वरः आत्मनैव आत्मानमेव निवे
दयतं विक्रीय विशिष्टेनाक्रीत्वा अनेनैव सह रमे । रमा लक्ष्मीर्यथा ॥ ३५ ॥ अन्यस्यासेवया त्वदर्शयति कि
यदिति । आद्यन्तवन्तो ये कामाः विषयाः कामदा नरा वा देवा वा कालकलिताः ॥ भार्यायाः कियत्प्रि

विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ॥ यान्यमिच्छन्त्यसत्यस्मादात्मदात्काममच्युतात् ॥ ३४ ॥ सुहृत्
प्रेष्ठतमो नाथ आत्मा चायं शरीरिणां ॥ तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥ ३५ ॥ कियत्प्रियं ते व्य
भजन्कामा ये कामदा नराः ॥ आद्यन्तवन्तो भार्याया देवा वा कालविद्रुताः ॥ ३६ ॥ नूनं मे भगवान्प्री
तो विष्णुः केनापि कर्मणा ॥ निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ॥ ३७ ॥ मैवं स्युर्मंदभाग्य
याः क्लेशा निर्वेदहेतवः ॥ येनानुबंधं निर्हृत्य पुरुषः शममृच्छति ॥ ३८ ॥ तेनोपकृतमादाय शि
रसा ग्राम्यसंगताः ॥ त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं ॥ ३९ ॥ संतुष्टा श्रद्दधत्येतद्यथालाभे
न जीवती ॥ विहराम्यमुनैवाहमात्मरमणेन वै ॥ ४१ ॥

42

यं कृतवंतः ॥ न किंचित् । अतो नेहामुत्र वा
तद्व्यतिरिक्तः कोपि सेव्योस्तीत्यर्थः ॥ ३६ ॥ एवं निश्चित्य स्वभाग्यमभिनंदति नूनमिति । दुष्टा आशा य
स्यास्तस्या मे ॥ ३७ ॥ ननु धनाद्यात्याज्ञिक्रोसि कथं विष्णुः प्रीतः तत्राह मैवमिति । मंदभाग्याया वेदहं स्यात्
र्ह्येवं निर्वेदहेतवः क्लेशा न स्युरित्यर्थः ॥ येन निर्वेदेन अनुबंधं गृहादिकं निर्हृत्य परित्यज्य ॥ ३८ ॥ अतः
तेन श्रीविष्णुना उपकृतं कृतमुपकारं निर्वेदलक्षणं ॥ ग्राम्येषु नरेषु विषयेषु वा संगताः ॥ ३९ ॥ कथं व्रजामि

राम
४२

अविजितात्मत्वे हेतुः ॥ याः इं वालिशा विवेकरहितास्तासां कुतः येन कारणेन असतः तुच्छान्नरात् कामं कामये ॥२०॥ वालिशत्वं प्रपंचयति। सन्तमिति चतुर्भिः ॥ समीपे संतं। अन्तर्यामित्वात्। इमं अपरोक्षमीश्वरं ॥ अतिविगर्ह्या विनिंद्या यात्वानर्जीविकातया कुतः श्रांकेत्येन याचन्तिः तया ॥ बहुधा हि गुणास्तु विशेषाणं वा ॥ परितापं प्रपंचयति ॥ स्त्रैणादिति। स्त्रीत्वं परात् ॥ अथ च। अर्थतः प्रसुवात्। अत एवानुशोचांतरा

पिंगलोवाच ॥ अहो मे मोहविततिं पश्यताविजितात्मनः ॥ या कान्तादसतः कामं कामये येन वालिशा ॥३०॥ सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय ॥ अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ॥३१॥ अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्यातिविगर्ह्यवार्तया ॥ स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात् क्रीतेन वित्तं रतिमात्मनेच्छती ॥३२॥ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धं ॥ क्षरन्नवद्वारमगारमेतद्वि[illegible]मूत्रपूर्णं मदुपैति कान्या ॥३३॥

त्वायाहं वित्तं रतिं वेच्छती ॥ तया मयात्वयात्मा परितापितः। केन वित्तमिच्छती। तेन नरेण क्रीतेन स्वयं विक्रीतेनात्मना देहेन ॥३२॥ अहो धिङ्मां या मयात्वयात्मा परितापितः ॥ केन वित्तमिच्छती। तेन नरेण क्रीतेन स्वयं वि क्रीतेनात्मना देहेन ॥३२॥ अहो धिङ्मां या हमतिबीभत्सितं भजामीत्याह यदिति ॥ वंशो नामस्थूणासु निहितस्तिर्यग्वेणुः ॥ वंश्यास्तस्मिंस्तु भयतो निहितावेणवः ॥ अस्थिभिरेव निर्मिता वंशादयो यस्मिन् तत्। तत्र पृष्ठे दीर्घमस्थि यत्स वंशः ॥ पार्श्वास्थीनि वंश्यानि। स्थूणा हस्तपदास्थीनि ॥ तथा रोमभिर्नखैश्च पिनद्धं छादितं ॥ तथापि क्षरंति नवद्वाराणि यस्मिन् तत्

भा॰ ए॰
४३

कुमार्याः शिक्षितं वक्तुमाख्यायिकामाह। क्वचिदित्यादिना। वृणानान् स्ववरणाय आगतान् बंधुषु पित्रादिषु ॥५॥ शंखाः शंख
वलयाः। महद्यथा भवति तथा स्वनं चक्रुः ॥६॥ सा महती बुद्धिमती। तत्स्वयं शाल्यवहननं जुगुप्सितं दारिद्र्यद्योतक
त्वेन। एकशः क्रमेण एकैकं बभंज। करद्वये द्वौ द्वौ रक्षितवती ॥७॥ निरभिदत्। पृथक्कृतवती ॥८॥ न नु कुमार्याः स्तव वृ
त्तेन कथं संगतिस्तत्राह। लोकान् इति ॥९॥ वासे इति पूर्वमानपाठे कलहः कलहहेतुः। वार्ता गोष्ठी हेतुर्भवेदित्यर्थः
॥१०॥ चित्तैकाग्रताहेतोः स्फुटिलक्षणं समाधिहेतुरिति शरकारात् शिक्षितमित्याह। मन इति। तत्रोपायमाह। जिते
ति। आसनजयश्वासजयः। तस्य जयः श्वासाधीनं मनो निश्चलं भवति। ननु तेन निश्चलं सदपि मनो विषयवा

क्वचित्कुमारी त्वात्मानं वृणानान् गृहमागतान्। स्वयं तानर्हयामास क्वापि यातेषु बंधुषु ॥५॥ तेषामभ्यवहा
रार्थं शालीन् रहसि पार्थिव। अवघ्नंत्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत् ॥६॥ सा तज्जुगुप्सितं मत्वा मह
ती व्रीडिता ततः। बभंजैकैकशः शंखान्द्वौ द्वौ पाण्योरशेषयत् ॥७॥ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म शं
खयोः। तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः ॥८॥ अन्वशिक्षमिमं तस्या उपदेशमरिंदम। लोकाननुचरन्ने
तान् लोकतत्वविवित्सया ॥९॥ वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि। एक एव चरेत्तस्मात्कुमार्या इव कं
कणः ॥१०॥ मन एकत्र संयुंज्याज्जितश्वासो जितासनः। वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः ॥११॥ यस्मि
न्मनो लब्धपदं यदेतच्छनैः शनैर्मुंचति कर्मरेणून्। सत्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनं
॥१२॥ तदैवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा। यथेषुकारो नृपतिं व्रजंतमिषौ गतात्मा न ददर्श पा
र्श्वे ॥१३॥ सनपायदिविक्षिप्येत सुषुप्त्या विवसर्जयेत् वा लीयेत वा तदा किं तत्राह। वैराग्येति। वैराग्येण विक्षिप्यमाणं॥
अभ्यासयोगेन लये ध्रियमाणं स्थिरीक्रियमाणं ॥११॥ एकत्रेति कुत्रेत्यत आह। यस्मिन्निति। यत्तल्लयविक्षेपात्मकं मनः य
स्मिन्परमानंदरूपे श्रीभगवति लब्धास्पदं सत् कर्मरेणून् कर्मवासनाः मुंचति तस्मिन्। ननु कर्मवासनात्यागेपि सुषुप्ति
लययोर्द्वारः नसत्वेनेति। वृद्धेन उपशमात्मकेन। रजस्तमसोरभावे विक्षेपलययाभावात् निर्वाणं अवृत्तिकं ध्येयाकारेणाव
स्थानमुपैति कुतः॥ अनिंधनं। इंधनं गुणास्तत्कार्यं च तद्रहितं। तदुक्तं योगशास्त्रे। मनसो वृत्तिशून्यस्य ब्रह्माकारतया

43

राम
४३

ननु ब्रह्मादीन् हित्वा अमुनैव तितिक्षोर्यं नियमः तत्राह संसारेति ।। मुषितेक्षणं ।। अपहृतविवेकं ।। ४१ ।। तर्हि किमात्मना
णः पापिनाम् नोस्ति न तत्र सर्वत्रो निर्विद्य भगवद्भजनमत्र तस्यात्मन एव सामर्थ्यत्वादित्याह आत्मैवेति ।।
यदा एवं जगत् पश्यन् ततश्चाप्रमत्तः सन् निखिलात् ।। इहामुत्र भोगान्निर्विद्येत ।। तदा हि आत्मनैवात्मनो

संसारकूपे पतितं विषयैर्मुषितेक्षणं ।। ग्रस्तं कालाहिनात्मानं कोन्यस्त्रातुमधीश्वरः ।। ४१ ।। आत्मैव ह्यात्मनो गो
प्ता निर्विद्येत यदाखिलात् ।। अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ।। ४२ ।। ब्राह्मण उवाच ।। एवं व्यव
सितमतिर्दुराशां कांततर्षजां ।। छित्वोपशममास्थाय शय्यामुपविवेश सा ।। ४३ ।। आशा हि परमं दुःखं नैरा
श्यं परमं सुखं ।। यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला ।। ४४ ।। इति श्रीभागवते महापुराणे एकादश
स्कंधे अष्टमोध्यायः ।। ब्राह्मण उवाच ।। परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृणां ।। अनंतं सुखमाप्नोति त
द्विद्वान्यस्त्वकिंचनः ।। १ ।। सामिषं कुररं जघ्नुर्बलिनो ये निरामिषाः ।। तदामिषं परित्यज्य स सुखं समविंद
त ।। २ ।। न मे मानापमानौ स्तो न चिंता गेहपुत्रिणां ।। आत्मक्रीड आत्मरतिर्विचरामीह बालवत् ।। ३ ।। द्वावेव चिं
तया मुक्तौ परमानंद आप्लुतौ ।। यो विमुग्धो जडो बालो यो गुणेभ्यः परं गतः ।। ४ ।।

गोत्पच्चयः ।। अतः ।

केवलं प्रेम्णैव भजामीति भावः ।। ४२ ।। कांतस्य तर्षोभिलाषस्ततो जातां ।। फलितमाह ।। आशा हीति ।। ४४ ।। एकाद
शे अष्टमः ।। नवमे कुररादिभ्यो देहतश्चापि शिक्षितं ।। श्रुत्वा यदुः कृतार्थोभूदिति कृष्णेन वर्णितं ।। १ ।। कुररा शि
क्षितमाह ।। परिग्रहो हीति ।। यद्यत्प्रियतमं तस्य तस्य परिग्रहः तद्विद्वान् परिग्रहो दुःखमिति विद्वान्सन्
यस्त्वकिंचनः त्यक्तपरिग्रहः ।। न तु दरिद्रः ।। १ ।। तदाहासामिषमिति ।। २ ।। अर्भकशिक्षितमाह नेति गेहपुत्रिणां त
चिंताया भवति चिंता सा च मे नास्ति ।। आत्मनैव क्रीडा यस्य सः ।। आत्मनि रतिः प्रीतिर्यस्य सः ।। ३ ।। ननु तत्र सर्वे
तयोः किं सादृश्यं नेच्छितं परमसुखमित्याह ।। द्वाविति ।। विमुग्धः अज्ञः जडः अनुद्यमः एवंभूतो यो बालः

भा॰ए॰
५४

सूत्रंक्रियाशक्तिप्रधानंमहत्तत्त्वंसृजति।जीवसंसारहेतुभूतेसूत्रेसर्वेऽपित्वंमाभैषीरितिसंबोधयति॥अरिंदमा अरी-
न्रागादीन्दमयितुंसमर्थस्तस्यैवव्यक्तिशब्देनोच्यमानत्वमितिस्त्रीलिंगेनपरामर्शः॥त्रिगुणाव्यक्तिगुणा-
त्रयस्यकार्यं॥अतएवविश्वतोमुखंनानाविधंत्रिगुणात्मकंविश्वमहंकारद्वारेणसृजंती॥२०॥त्रिगुणाकार्य-
स्यसूत्रसंज्ञायांकारणमाह॥यस्मिन्निति॥कारणभूतेसमष्टिरूपेयस्मिन्निदंविश्वंप्रोतंग्रथितं॥वायुर्वैगौ-
तमतत्सूत्रंवायुनावैगौतमसूत्रेणायंलोकःपरश्चलोकःसर्वाणिभूतानिसंदृब्धानीतिश्रुतेः॥येनवाय्वात्मना

संक्षोभयन्सृजत्यादौतयासूत्रमरिंदम॥तामाहुःत्रिगुणव्यक्तिंसृजंतींविश्वतोमुखं॥२०॥यस्मिन्प्रोतमिदं
विश्वंयेनसंसरतेपुमान्॥यथोर्णनाभिर्हृदयादूर्णांसंतत्यवक्त्रतः॥२१॥तयाविहृत्यभूयस्तांग्रसत्येवंमहेश्व-
रः॥यत्रयत्रमनोदेहीधारयेत्सकलंधिया॥स्नेहाद्द्वेषाद्भयाद्वापियातितत्तत्स्वरूपतां॥२२॥कीटःपेशस्कृ-
तंध्यायन्कुड्यांतेनप्रवेशितः॥यातितत्सात्मतांराजन्पूर्वरूपमसंत्यजन्॥२३॥एवंगुरुभ्यएतेभ्यएषा
मेशिक्षितामतिः॥स्वात्मोपशिक्षितांबुद्धिंशृणुमेवदतःप्रभो॥२४॥

44

णरूपेणजीवःसंसरति॥तदेवंशिक्षितमर्थ-
मुक्त्वादृष्टांतमाह॥यथेति।हृदयाद्गृहीतांवक्त्रतःवक्त्रेणसंतत्यप्रसार्यविहृत्यक्रीडित्वा॥२२॥भगवद्ध्यानपरा-
णांतत्सारूप्यंनचित्रमितिपेशस्कृतोभ्रमरविशेषात्ज्ञानमित्याह॥यत्रयत्रेति॥सकलंएकाग्रं॥कुड्यांप्रवे-
शितःनिरुद्धःभयेनध्यायन्सात्मतांतत्सारूप्यं॥साम्पतामितिपाठेत्वार्षता॥पूर्वरूपमसंत्यजन्नित्यस्याभि-
प्रायःयदातेनैवदेहेनान्यसारूप्यंदृश्यतेतदाकिंवक्तव्यंदेहांतरेणसारूप्यंघटतइति॥२३॥स्वदेहादेवशिक्षि-

राम॰
५४

सर्पाद्विदितमाह॥ एकचारीति। योगिसंमर्दस्यापि त्यायेकमारी गुरुः। जनसंगत्यागेपि सर्पाः सयथा जनाद्वंकमाना एकाकी
विचरंति नियतनिकेतनरहितश्च। सदाप्रमत्तश्च। एकांतवासी च॥ आचारैर्गतिभिः सविषो निर्विषो वेति न लक्ष्यते च। अस
हायश्च॥ मितभाषी च नह्यनुनिर्वर्तनं तत्पर्यः॥१४॥ किंच गृहारंभ इति॥ अध्रुवात्मनः॥ नश्वरदेहस्य। सुखं यथा भवति
धावर्द्धते॥१५॥ कारकसामग्रीनिरपेक्षात्कैवल्यादीश्वराद्विश्वस्य संहारादूर्णनाभिदृष्टांतेन मया संभावितमिति

एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः॥ अलक्ष्यमाण आचारैर्मुनिरेकोऽल्पभाषणः॥१४॥ गृहारंभो हि दुःखा
य विफलश्चाध्रुवात्मनः॥ सर्पः परकृतं वेश्म प्रविश्य सुखमेधते॥१५॥ एको नारायणो देवः पूर्वसृष्टं स्वमा
यया॥ संहृत्य कालकलया कल्पांत इदमीश्वरः॥१६॥ एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः। कालेना
त्मानुभावेन साम्यं नीतासु शक्तिषु॥१७॥ सत्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः॥ परावराणां परम आ
स्ते कैवल्यसंज्ञितः॥१८॥ केवलानुभवानंदसंदोहो निरुपाधिकः। केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकां॥१

वक्तुं प्रथमं संहारप्रकारमाह॥ एक इति सार्द्धत्रयेण॥ एकः कारकनिरपेक्षः॥ पूर्वसृष्टमिदं जगत्कालकलया का
लशक्त्या संहृत्य॥१६॥ एक एवाद्वितीयः सजातीयविजातीयभेदशून्यो भूत्वा॥ कारणभूतासु सत्वादिशक्तिष्वपि सा
म्यं नीतासु सतीषु॥१७॥ गुणसाम्यं प्रधानं तदुपाधिः पुरुषः तयोरीश्वरः परावराणां परे ब्रह्मादयः। अवरे अन्ये च
मुक्ता जीवास्तेषां परमः प्राप्य आस्ते॥ कुतः कैवल्यसंज्ञितः॥ मोक्षशब्दाभिधेयः॥१८॥ तत्र हेतुः केवलेति। निर्विष
यः स्वप्रकाशः॥ आनंदानां संदोहः समूहः परमानंद इत्यर्थः॥ कुतः निरुपाधिकः। ननु केवलादेव सृष्टिं दर्शयति

भा०ए०
४५

तदेवं देहो गुरुरित्यादि त्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्याति दुर्लभत्वं दर्शयन्नीश्वरनिर्मितं विधत्ते। स
सृष्ट्वेति द्वाभ्यां। पुराणि शरीराणि पुरुषं पुरुषदेहं। ब्रह्मावलोकाय अपरोक्षाय धिषणा बुद्धिर्यस्मिन्तं। तदुक्तं। ता
सामेभ्यः पुरुषमानयत्ताभ्यो गामानयत्ता अब्रुवन् न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन् सुकृतं बतेति । विश्वा
सृष्टवान्ताश्च तृप्तिभोगार्थं शरीरमयाचत सचताभ्यो गोशरीरमश्वशरीरं पुरुषशरीरं यथाक्रममानीतवान्ततस्ता
देवताः सोऽब्रवीद्यथायतनं चक्षुरादिस्थानमस्मिन्देहे प्रविशतेति। तदाह। ताभ्यो गामानयत्ता अब्रुवन् न वै
यमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति च॥२८॥ तस्माद्ब
हूनां संभवानां जन्मनामंते मनुष्यं अनित्यमप्यर्थदं पुरुषार्थप्रापकं देवादित्वचाऽइदं अन्ते मृत्युं। अन्वनु निरंतरं मृत्युः

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्। तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्र
ह्मावलोकधिषणं मुदमाप देवः॥२८॥ लब्ध्वा सुदुर्लभमिदं बहुसंभवान्ते मानुष्यमर्थदमनित्यमपीह धीरः। तूर्णं यते
त न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात्॥२९॥ एवं संजातवैराग्यो विज्ञानालोक आत्मनि।
विचरामि महीमेतां मुक्तसंगोऽनहंकृतिः॥३०॥ न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं। ब्रह्मैतदद्वितीयं
वै गीयते बहुधर्षिभिः॥३१॥ श्रीभगवानुवाच॥ इत्युक्त्वा स यदुं विप्रस्तमामंत्र्य गभीरधीः। वन्दितोऽभ्यर्चितो रा
ज्ञा ययौ प्रीतो यथागतं॥३२॥ वोयस्यतत्॥ यावन्न पतेत्तावदेव तूर्णं निःश्रेयसाय यतेत न विषयार्थं पुनः सर्वतः प
श्वादियोनिष्वपि स्यादेव॥२९॥ तदेवं हेयोपादेयविवेकं बहुधा निरूप्येदानीं यदुक्तं। त्वं तु कल्पः कविर्दक्ष इत्यादि तत्रा
त्तरमाह। एवमिति। एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्य सः स संपन्नवैराग्यो विशेष
णं॥ आत्मनिष्ठितश्चैवमहं विचरामि। ननु किं बहुभिर्गुरुभिः न हि श्वेतकेतुप्रभृतिषु ब्रह्मैवगुरवः आश्रिताः त
त्राह न ह्येकस्मादिति। बहुधा सप्रपञ्चनिःप्रपञ्चभेदाभेदादिभिः॥ अयं भावः॥ नैते परमार्थोपदेशगुरवः। किं तु
अन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रनिवर्तकाः तेषां च बहुत्वं युक्तमेवेति ज्ञानप्रदस्तु गुरुरेक एव यदपि
मदभिन्नं गुरुं शान्तमुपासीत तदात्मकमित्युक्तं च तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममिति। विप्रो दत्तात्रेयः॥३०॥ यो गाहि
मां पुरुषमयी यदुहेहया द्या इत्युक्तत्वात्। यथागतं तथैव च यदृच्छया ययावित्यर्थः॥३२॥

राम
४५

45

गुरुत्वे हेतुः । विरक्तिविवेकयोर्हेतुः ॥ चिरं निर्हेतुत्वमाह । सत्त्वनिधनं । उत्पत्तिविनाशौ बिभ्रत्स्म । किं च । सततं संत
तं । आर्त्युदर्कं । दुःखमेवोत्तरफलं बिभ्रत् । यद्वा । सततानि रेव उदर्क उत्तरफलं यस्य तत्सत्त्वनिधनं बिभ्रत् । विवेक
हेतुत्वमाह तत्त्वानीति । यथायथावत् ॥ एवमप्युपकारित्वेपि देहे नैवास्था कर्त्तव्येत्याह । पारक्यं श्वसृगालादिभक्ष्य
मिति निश्चितवान् ॥ २५ ॥ सततार्त्युदर्कत्वं प्रपंचयति । जायेति द्वाभ्यां । यस्य देहस्य प्रियचिकीर्षया भोगसंपादनेच्छया जा
यादिवर्गान् वितन्वन् पुष्णाति पुरुषः कथंभूतः । सकृच्छ्रं यथा भवति तथा । बहु द्वानि संचितानि धनानि येन सः

देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कं ॥ तत्त्वान्यनेन विमृशामि यथा तथापि
पारक्यमित्यवसितो विचराम्यसंगः ॥ २५ ॥ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया
वितन्वन् ॥ स्वान्ते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा ॥ २६ ॥ जिह्वैकतोऽमुमप
कर्षति कर्हि तर्षा शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ घ्राणोन्यतश्चपलदृक्क च कर्मशक्तिर्बह्व्यः सपत्न्य इव
गेहपतिं लुनन्ति ॥ २७ ॥

देहविशेषणं स देहः स्वान्ते स्वस्यावसाने अवसीदति नश्यति ॥ किं च देहनाशेपि न
दुःखसमाप्तिरित्याह । अस्य पुरुषस्य देहान्तरबीजं कर्म सृष्ट्वेति । वृक्षस्येव धर्मो यस्य सः ॥ २६ ॥ किं च । जिह्वेति
अमुं देहं ॥ तदभिमानिनं पुरुषं वा ॥ एकतः रसं प्रति जिह्वा अपकर्षति ॥ आकर्षति ॥ कर्हिचित् कदाचित् । तर्षा पि
पासा । जलं प्रति । शिश्नो वनितां प्रति । त्वक् स्पर्शं प्रति । उदरं अन्नं ॥ अन्नं प्रति । श्रवणं शब्दं प्रति । घ्राणो गंध
प्रति । चपलदृक् रूपं प्रति ॥ क्व च क्वचित् स्वस्वविषयं प्रति कर्मशक्तिः । अन्यदपि कर्मेंद्रियं लुनंति दारयंति ॥ २७ ॥

भा॰ए॰
४६

किंतु यमानेव अहिंसादीन्। अभीक्ष्णमादरेण सेवेत। शौचादींस्तु नियमान् कांश्चिद्यथाशक्ति आत्मज्ञानाविरोधेन यमान् द्वादश। नियमाश्चैकोन विंशोध्यायेवक्ष्यति॥ किंच यमेष्वप्यादरं परित्यज्य गुरुमुपासीतेत्याह मद इति॥ मदात्मकं मद्रूपं॥५॥ गुरुसेवकस्य धर्मानाह। अमानीति। दक्षः। अनलसः। निर्ममः। जाया दिषु ममताशून्यः गुरौ तु दृढसौहृदः॥ असत्वरः॥ अव्यग्रः। अमोघवाक्। व्यर्थालापरहितः एतान्येव शिष्यस्य लक्षणानि ज्ञेयानि॥६॥ ननु स्वजायादिषु कथं निर्ममः स्यादित्यत्राह॥ जायेति। औदासीन्य हेतुं विवेकं दर्शयति॥ आत्मनोर्थं प्रयोजनं सर्वत्र सममिव पश्यन्निति। अयं भावः॥ सर्वदेहेष्वात्मन एकत्वात् जायादिदेहेष्वपि स्वदेहे आत्मनोऽर्थः सुखादिः समएव॥ केन विशेषेणातेष्वेव ममत्वाभिनिवेश

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित्॥ मदभिज्ञं गुरुं शांतमुपासीत मदात्मकं॥५॥ अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः॥ असत्वरोर्थजिज्ञासुरनसूयुरमोघवाक्॥६॥ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु॥ उदासीनः समं पश्यन्सर्वेष्वर्थमिवात्मनः॥७॥ विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक्॥ यथाग्निर्दारुणो दाह्याद्दाहकोन्यः प्रकाशकः॥८॥ निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान्॥ अंतः प्रविष्ट आधत्त एवं देहगुणान्परः॥९॥ इत्येवमुदासीनः सन्गुरुं प्रपद्येतेति॥७॥ अहो कोसौ दे

46

हव्यतिरिक्त आत्मा यस्यैकत्वादर्थः सर्वेषु समः स्यात्। तमाह। विलक्षण इति। स्थूलसूक्ष्मदेहद्वयादात्मान्यः यतो विलक्षणः। द्वैधा वैलक्षण्यं दर्शयति। ईक्षिता स्वदृगिति। दृश्याद्दि द्रष्टा विलक्षणः। स्वप्रकाशश्च जडाद्वि लक्षणः तयोरन्यत्वे दृष्टांतः। यथाग्निर्दाहकः प्रकाशकश्च दाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदिति॥८॥ अनेनैव दृष्टांतेन अनित्यत्वनानात्वविभुत्वैकत्वादयोपि सिद्धा इत्याह॥ निरोधेति। यथा च दारुष्वन्तः प्रविष्टो ग्निस्तत्कृतान्नाशादीन्प्राप्नोति॥ ननु स्वतो नाशादिमान्। एवं देहगुणान्नित्यत्वादीन्देहात्परो नित्यादिस्वरू पोप्यात्मानुभवति। ततश्चानित्यत्वादिभिरपि विलक्षणमादन्यत्वमिति भावः॥९॥ ॥

रामः
४६

भावान्स्त्रीयं त्वयाचिन्तकुलमितिमन्त्राचरतो नः पूर्वेषां पूर्वज इति ॥३३॥ अत्र संग्रहश्लोकाः कपोतमीनहरिणकुमारीग
जपन्नगाः। पतंगः शरकृच्चाश्चेदेयार्थे गुरवो मताः॥ मधुकृन्मधुहर्ता च पिंगला चिह्नयोस्त्रयः उपादेयार्थविज्ञाने
शेषाः पश्चादयोम्नाः तदत्तान्तरं भेदश्चानन्तरं तत्रस्फुटीकृतः॥ अध्यायत्रितये चात्र नवोध्यावीक्षिताः क्रमात्॥३४॥ ए
कादशनवमः॥ चतुर्विंशतिगुर्वाख्यानान्न संभावना भुवः। उद्धवस्यात्मतत्त्वार्थे साधनोक्तिरतः परं॥१॥ दशमे देह
संबंधात्संसृतिर्न्नात्मनः स्वतः। इत्येतद्वर्णयामास समतान्तरनिरासतः॥२॥ तदेवमन्वयव्यतिरेकाभ्यामुत्पन्नविवेकस्या
नस्यतत्त्वज्ञानायादित आरभ्य साधनान्युपदिशति भगवान्। मयोदितेष्विया पंचरात्राद्युक्तवेदवधर्मेष्ववहितः॥ अ

अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः॥ सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह॥३३॥ इति श्रीभागवते महा
पुराणे एकादशस्कंधे भगवदुद्धवसंवादे अवधूतगीतं नाम नवमोऽध्यायः॥ श्रीभगवानुवाच॥ मयोदिते
ष्ववहितः स्वधर्मेषु मदाश्रयः॥ वर्णाश्रमकुलाचारमकामात्मा समाचरेत्॥१॥ अन्वीक्षेत विशुद्धात्मा देहिनां
विषयात्मनां॥ गुणेषु तत्त्वध्यानेन सर्वारंभविपर्ययं॥२॥ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः॥ नानात्म
कत्वाद्विफलस्तथा भेदात्मधीर्गुणैः॥३॥ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत्॥ जिज्ञासायां संप्रवृत्तो नाद्रिये
त्कर्मचोदनां॥४॥

अमत्तः सन् तदविरोधेन वर्णाद्याचारमनुतिष्ठेत्॥१॥ कथमकामात्मता संभवति तत्राह अन्वी
क्षेतेति। स्वधर्मैर्विशुद्धचित्तः सन् देहिनां विषयेषु सत्यत्वाभिनिवेशेन ये सर्वे आरंभाः तेषां फलवैपरीत्यं पश्यन्
एवं फलवैपरीत्यादकामः स्यात्॥२॥ किंच। काम्यविषयाणां मिथ्यात्वादपीत्याह। सुप्तस्येति। विफलः अर्थशू
न्यः॥ अत्रैव प्रयोगः। इंद्रियैर्या वै देहिनां नानाबुद्धिः सा विफला॥ नानात्मकत्वादैंद्रियकत्वाद्वा स्वप्नजन्यस्वप्न
मनोरथवदिति॥३॥ मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः। नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेति स्मृ
तेः॥ अतः प्रवृत्तं काम्यं कर्म त्यजेत् निवृत्तं नित्यनैमित्तिकमेव कुर्यात्। आत्मविचारे तु सम्यक् प्रवृत्तो निवृत्तकर्मचो

रा॰ ए॰
47

तदेवं श्रुतिसमन्वयेन निर्णीतेप्यर्थे मतान्तरविरोधेन संदेहो माभूदिति । तन्मतं निराकर्तुं संभावयति । अथेति । अ-
थ मन्यसे एषां जीवात्मनां कर्मकर्तॄणां सुखदुःखयोः भोक्तॄणां च नानात्वमिति । एवं हि जैमिनीया मन्यन्ते । अ-
हंप्रत्ययज्ञेय आत्मा स च प्रतिशरीरं भिन्नः कर्तृभोक्तृरूपश्च । न तु तत्स्वरूपभूतो निर्विकार एकः परमा-
त्मास्तीति । यथाहुः । अहंप्रत्ययविज्ञेयो ज्ञातव्यः सर्वदेव हीति । तथा च वैराग्यं च न संभवति । तथा हि भो-
गस्थानानामनित्यत्वाद्धि वैराग्यं भवेत् । भोगकालस्य वा । तदुपायकर्मबोधकागमस्य वा भोक्तुरात्म-
नो वा न त्वेतदस्तीत्याह । अथ नित्यत्वं लोककालागमात्मनां मन्यस इति । १४ । न च भोग्यानां विच्छेदान्माया-
मयत्वाद्वा वैराग्यं स्यादित्याह । मन्यस इति । सर्वभावानां स्रक्चंदनादीनां संस्था स्थितिः । औत्पत्तिकी प्रवाह-

अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः । नानात्वमथ नित्यत्वं लोककालागमात्मनां ॥ १४ ॥ मन्यसे सर्वभा-
वानां संस्थां ह्यौत्पत्तिकीं यथा । तत्तदाकृतिभेदेन जायते भिद्यते च धीः ॥ १५ ॥ एवमप्यंग सर्वेषां देहिनां दे-
हयोगतः । कालावयवतः सन्ति भावा जन्मादयोसकृत् ॥ १६ ॥ रूपेण नित्या । तथा च वदंति । न कदाचिदनीदृ-
शं जगदिति । अतस्तत्कर्ता कश्चिदीश्वरोपि नास्तीति भावः । किं च । यथा यथावत् ननु मायामयीत्यर्थः । न चा-
त्मस्वरूपभूतं नित्यमेकं ज्ञानमस्तीत्याह तत्तदिति घटपटाद्याकारभेदेन धीर्जायते । अतो नित्या भिद्यते च ।
अयं गूढोभिप्रायः । नहि नित्यज्ञानरूप आत्मा । अपि तु ज्ञानपरिणामवान् । न च विकारित्वेन नित्यत्वप्रसं-
गः । यथाहुः । विक्रिया ज्ञानरूपास्य न नित्यत्वविरोत्स्यत इति । अतो मुक्तावि इंद्रियादिरहितस्य परिणामासंभ-
वाज्जडत्वेन तन्मात्रे पुरुषार्थत्वात्प्रवृत्तिरेव श्रेयसी न निवृत्तिरिति ॥ १५ ॥ तन्न तावत्तदुक्तमंगीकृत्य वैरा-
ग्योपपादनाय प्रवृत्तिमार्गस्यानर्थहेतुत्वं प्रपंचयति एवमपीत्यादिना लोकानां लोकपालानामित्यतः
प्राक्तनेन ग्रंथेन । अंग हे उद्धव । कालावयवात्संवत्सरादिरूपात् ॥ १६ ॥ ॥

राम
47

तत्वगर्दारुसंयोगात्तद्धर्मभाक्त्वं घटते॥ आत्मनस्त्वसंगत्वात्कथं देहेन तद्धर्मैर्वा संबंधः संबंधे वा कुतस्तन्निवृत्तिस्तत्रा
हयोसाविति॥ पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योसौ सूक्ष्मः अयं च स्थूलो देहो विरचितः। पुंसो जीवस्यायं सं
सारः तन्निबंधनः तदध्यासकृतः॥ हि यस्मादेवं तस्मादात्मविद्या तन्निवर्त्तिकेत्याह॥ आत्मनो विद्या विज्ञानं त
स्याश्छित् छेत्री। आच्छिदिति वा पदच्छेदः॥१०॥ यस्मादेवं तस्मात् जिज्ञासया विचारेण आत्मस्थं आत्मनि कार्यका
रणसंघातेऽवस्थितं। सम्यक् ज्ञात्वा॥ ततस्मिन् देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निरसेत् त्यजेत्॥११॥ एवंचे
वा विद्या अविद्यातत्कार्यनिरसनक्षमेति स्फुटीकर्तुं विद्योत्पत्तिं रूपकेण निरूपयति। आचार्य इति। आ

योसौ गुणैर्विरचितो देहोयं पुरुषस्य हि॥ संसारस्तन्निबंधोयं पुंसो विद्याच्छिदात्मनः॥१०॥ तस्मात् जिज्ञास
यात्मानमात्मस्थं केवलं परं॥ संगम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमं॥११॥ आचार्योरणिराद्यः स्यादंतेवास्युत्त
रारणिः॥ तत्संधानं प्रवचनं विद्यासंधिः सुखावहः॥१२॥ वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुण
संप्रसूतां॥ गुणांश्च संदह्य यदात्ममेतत्स्वयं च शाम्यत्यसमिद्यथाग्निः॥१३॥ द्यः अधरः तत्संधानं

तयोर्मध्यमं मंथनकाष्ठं॥ प्रवचनमुपदेशः॥ विद्या तु संधिः संधौ भवोग्निरिव तथा च श्रुतिः॥ आचार्यः पूर्वरू
पं अंतेवास्युत्तररूपं विद्या संधिः प्रवचनं संधानमिति॥१२॥ अग्निसादृश्यमेवाह वैशारदीति। विशारदो निपु
णः तेन शिष्येण प्राप्ता तेन गुरुणा प्रदिष्टा वा। अतिविशुद्धा च बुद्धिः। गुणकार्यरूपां मायां निवर्त्तयति। यदा
त्मकमेतद्विश्वं जीवस्य संसृतिनिमित्तं तान् गुणान् अदग्ध्वा॥ असमिन्निरिंधनः। तस्मात्कार्यकारणेन विद्य
याच व्यवधानाभावात् साक्षात् परमानंदरूपो भवतीति एवं तावत्स्वप्रकाशज्ञानस्वरूपो नित्य एक एवात्मा।
कर्तृत्वादयश्च धर्मास्तस्य देहोपाधिकाः तद्व्यतिरिक्तं च सर्वं मिथ्या मायामयं च॥ अतः सर्वतो विरक्तः सन्ना
त्मज्ञानेन मुच्यत इत्युक्तं। विलक्षणः स्थूलसूक्ष्मादित्यादिना॥१३॥ ॥ ॥

स्वपुण्येनोपचिते सर्वभोगसंपन्ने । देवीनां मध्ये विहरन् गंधर्वैरुपगीयते ॥२४॥ कामेन इच्छया गच्छता विमानेन किं
किणीजालमालिना क्रीडन् घंटिकासमूहशोभिना । सह स्त्रीभिः सुराक्रीडेषु नंदनादिषु क्रीडन्नात्मपातनं वेद ॥
२५ कालेन चालितः पातितः ॥२६॥ प्रवृत्तिर्द्विविधा । विद्यानुसारेण काम्यकर्मणि वा । तत्र द्वयघनेनाधर्मे वा ।
तत्र काम्यप्रवृत्तेर्गतिरुक्ता । अधर्मप्रवृत्तेर्गतिमाह ॥ यदीति । यदि चेत्पन्नयः अजितेंद्रियत्वात्कामात्मा ।

स्वपुण्योपचिते शुभ्रे विमान उपगीयते । गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् ॥२४॥ स्त्रीभिः कामगया
नेन किंकिणीजालमालिना क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः ॥२५॥ तावत्प्रमोदते स्वर्गे याव
त्पुण्यं समाप्यते । क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः ॥२६॥ यद्यधर्मरतः संगादसतां वाजितें
द्रियः । कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः ॥२७॥ पशूनविधिनालभ्य प्रेतभूतगणान्यजन् ।
नरकानवशो जन्तुर्गत्वा यात्युल्बणं तमः ॥२८॥ कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः । देह
माभजते तत्र किं सुखं मर्त्यधर्मिणः ॥२९॥ लोकानां लोकपालानां मद्भयं कल्पजीविनां । ब्रह्मणोऽपि
भयं मत्तो द्विपरार्धपरायुषः ॥३०॥

अतः कृपणः । अतो लुब्धो भोगतृष्णाकुलः अतः स्त्रैणः स्त्रीलंपटः ।
तदर्थं भूतविहिंसकः ॥२७॥ दुष्टजनप्रलोभितो धनाद्यर्थं पशूनविधिना हत्वा । तमः स्थावरतां याति
२८ एवं कर्मसु प्रवृत्तस्य न सुखं न च निवृत्तिरित्युपसंहरति कर्माणीति ॥२९॥ तथापि लोकानां नित्यत्वा
दमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेन्न तत्राह लोकानामिति । द्वौ परार्धौ परमायुर्यस्य तस्य ब्र
ह्मणोऽपि । तथा च श्रुतिः । भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पं
चम इति । अतः प्रवृत्तिमार्गस्यैवमनर्थहेतुत्वाद्विरक्तानां ततो निवृत्तिरेव युक्तेति तात्पर्यार्थः । एतेनैव

48

तत्रापीतिष्वात्तं आपन्नेदुःखमौणेदुःखभोगस्यचासंभवादित्यर्थः ॥१७॥ ननुयेसम्यक्कर्म्मकर्त्तुंजानंतितेसुखिनएवयि
तुनजानंतितएवदुःखिनइतिचेत्तत्राह। नेति। विदुषामपिनचित्सुखंनविद्यते। तथामूढानामपिदुःख
नविद्यते। अतोवयंकर्म्मकुशलत्वात्सुखिनइतिप्राकृतंबलंतथैवाहंकारइत्यर्थः ॥१८॥ अंगीकृत्याप्याह।
यदीति। तेयोगंउपायंनविदुर्येनसाक्षान्मृत्युर्नप्रभवेत् ॥१९॥ तथापियावज्जीवंसुखंभविष्यतीतिचेत्। ने

तत्रापिकर्म्मणांचातुरस्यातंत्रंचवन्त्यते॥ मोनुष्यसुखदुःखयोः कोन्वर्थोविवशंभजेत॥१७॥ नदेहिनांसुखं
किंचिद्विद्यतेविदुषामपि॥ तथाचदुःखंमूढानांवृथाहंकरणंपरं॥१८॥ यदिप्राप्तिंविघातंचजानंतिसुख
दुःखयोः॥ तेप्यद्धानविदुर्योगंमृत्युर्नप्रभवेद्यथा॥१९॥ कोन्वर्थःसुखयत्येनंकामोवामृत्युरंतिके॥ आघा
तंनीयमानस्यवध्यस्येवनतुष्टिदः॥२०॥ श्रुतंचदृष्टवद्दुष्टंस्पर्द्धासूयात्ययव्ययैः॥ बह्वंतरायकामत्वा
त्कृषिवच्चापिनिःफलं॥२१॥ अंतरायैरविहितोयदिधर्म्मःस्वनुष्ठितः॥ तेनापिनिर्जितंस्थानंयथागच्छति
तच्छृणु॥२२॥ इष्ट्वेहदेवतायज्ञैःस्वर्लोकंयातियाज्ञिकः॥ भुंजीतदेववत्तत्रभोगान्दिव्यान्निजार्जितान्॥२३॥

त्याह। कोन्विति। यतः। अंतिकेवर्त्तमानोमृत्युर्नतुष्टिंददाति। आघातंवधस्थानंप्रति॥२०॥ एवमस्मिंल्लोकेसुखंना
स्तीत्युक्तंलोकांतरेपितथैवेत्याह। श्रुतमिति। श्रुतंस्वर्गादि। तदपिदुष्टंस्पर्द्धापरसुखासहनं॥ असूयापरगुणे
दोषाविष्करणं। अत्ययोनाशः। व्ययोपचयः। तैर्दुष्टं। यद्वा। व्ययोनाशः। अत्ययोऽवस्पातिशयः। तं दृष्ट्वातदप्राप्त्या
दुःखमित्यर्थः। किंचबहवोंतरायावैगुण्यादिरूपाविघ्नायस्मिन्कामेसुखेतस्यभावस्तत्त्वं। तस्मात्कृषिर्य
थाबहुविघ्नातद्वत्बहुसुखत्वेनश्रुतमपिनिःफलं॥२१॥ विघ्नवैगुण्याद्यभावमंगीकृत्यापिनाशदुःखंपरिहरंमि

भा०ए०
४६

एवं तर्हि एक एवात्मा तस्य च गुणकार्यदेहसंबंधकृतः संसारः। आत्मज्ञानाच्च मुक्तिरित्युक्तं। विलक्षणः स्थूलसू
क्ष्मादित्यादिना। तदेवं च मतांतरनिरासेन दृढीकृतं अथ धर्मित्यादिना। तत्र पृच्छति। गुणेष्विति। अयमर्थः। गुणे
ष्वसत्सु मुक्तिः सत्स्वेव वा। आद्ये ज्ञानसाधनाभावान्न मुक्तिः। द्वितीये च गुणेषु वर्तमानोपि तत्कार्ये देहे
षु कर्मसु सुखादिषु च कथं न बध्यते तथापि तिर्यगाकाशवदनावृतत्वान्न बध्यत इति चेत्। तर्हि बंधो न संभ
वतीत्याह। अनपावृतः कथं बध्यत इति ॥३५॥ यदि तु सत्स्वेव तु देहकारणैर्बद्धस्तेन ते निवृत्त्या च मुच्यत इति म
तं। तर्हि तल्लक्षणं ज्ञातव्यमिति पृच्छति। बद्धो मुक्तो वा कथं वर्तेतेत्यादि। किं भुंजीत कथं भुंजीतेत्यर्थः ॥३६॥
ननु एतद्विषयं प्रश्नः किं च एक एवात्मा अनादिगुणसंबंधान्नित्यबद्धः। मुक्तेर्जन्यत्वे अनित्यत्वप्रसंगान्नि

त्यमुक्तश्च ॥ गुणेषु वर्तमानोपि देहजेष्वनपावृतः ॥ गुणैर्न बध्यते देही बध्यते वा कथं विभो ॥३५॥ कथं
वर्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः ॥ किं भुंजीतोत विसृजेच्छयीतासीत याति वा ॥३६॥ एतदच्युत मे ब्रूहि
प्रश्नं प्रश्नविदां वर ॥ नित्यबद्धो नित्यमुक्त एक एवेति मे भ्रमः ॥३७॥ इति श्रीभागवते महापुराणे एका
दशस्कंधे भगवदुद्धवसंवादे दशमोऽध्यायः ॥ श्रीभगवानुवाच ॥ बद्धो मुक्त इति व्याख्या गुणतो मे न व
स्तुतः ॥ गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनं ॥१॥ त्यमुक्त इत्यप्यंगीकार्यं स्यात्। तत्र मे भ्रमो भवतीत्या
ह। नित्यबद्ध इति ॥३७॥ एकादशे दशमः एकादशे तु बद्धानां मुक्तानां चाथ लक्षणं। साधूनां वत भक्ते
श्च वर्णनं हरिणेरितं ॥१॥ नित्यबद्धो नित्यमुक्त एक एवेति मे भ्रम इति यदुक्तं तत्किं वस्तुतो विरोधः प्रतीतिर्वा
नाद्यः बंधमोक्षयोर्वास्तवत्वाभावादित्याह। बद्धो मुक्त इति द्वाभ्यां। आत्मा बद्धो मुक्तश्चेति मे गुणतः मदधीनस
त्त्वादिगुणोपाश्रितः न तु वस्तुतः। न वै औपाधिकत्वेपि तद् तल्पकादिवद्वास्तवत्वं किं न स्यात् तत्राह गुणस्य
मायामूलत्वाद् बंधनं नास्ति। अत एव मोक्षश्च नास्तीति। ननु कथं सर्वशास्त्रविरुद्धमुच्यते तत्राह इति मे
व्याख्येति। एवं मत्कृतो निर्णयः। अलमतिकुतर्कैरित्यर्थः। अथ नेतुमद्वचः। आत्मा बद्धो मुक्त इति या व्याख्या
उक्तिः सा मे गुणतः मद्गुणपारतंत्र्यात्। अयं तु तत्त्वेन गुणा नियंतरि स्वस्मिंस्तद्व्यतिरेकमाह। अत एवं तमेवं

49

राम
४६

अस्मदपि मोक्षापवर्गमेगीकृतं निराकरोति चतुर्भिः। तत्र यदुक्तं कर्त्ता भोक्ता रूप्याणवात्मेति तन्निराकरोति गुणा इति गुणा। गुणा इंद्रियाणि कर्म्माणि सजंति। नत्वात्मा आत्मेवेंद्रियाणि प्रवर्त्तयन्कर्म्माणि करोतीति चेन्नेत्याह। गुण इति। गुणाः सत्वादिः गुणानिंद्रियाणि अनुसजते। प्रवर्त्तयति नत्वात्मा॥ अतः कर्त्तत्वं तावन्नास्ति। भोक्तृत्व मप्यौपाधिकमित्याह जीवस्त्विति। गुणसंयुक्त इंद्रियादिसंयुक्तः कुतद्रूत्पत्त आह। असौ तेषु अहंकारवा नित्यर्थः॥३१॥ यच्चोक्तमात्मनो नानात्वं तदप्यौपाधिकमित्याह॥ यावत्स्यादिति। गुणानां वैषम्यं अहंकारा

यावत्स्या

गुणाः सजंति कर्म्माणि गुणोनुसजते गुणान्॥ जीवस्तु गुणसंयुक्तो भुंक्ते कर्म्मफलान्यसौ॥३१॥ यावत्स्या गुणवैषम्यं तावन्नानात्वमात्मनः॥ नानात्वमात्मनो यावत्पारतंत्र्यं तदेव हि॥३२॥ यावदस्यास्वतंत्रत्वं तावदीश्वरतो भयं॥ य एतत्समुपासीरंस्ते मुह्यंति शुचार्पिताः॥३३॥ काल आत्मागमो लोकः स्वभावो धर्म्म एव च॥ इति मां बहुधा प्राहुर्गुणव्यतिकरे सति॥३४॥

दिकार्यरूपं। न चात्मन एकत्वे कथं पारतं त्र्यमुक्तं कथं वा लोकपालादीनामपि भयमित्युक्तं। तत्राह। नानात्वमिति॥३२॥ यच्च गतठ ममभिप्रेतं प्र न्तिरिवश्रेयसीति तत्राह य एतदिति। एतद्गुणवैषम्यं तत्कृतं भोगं कर्म्म चेत्यर्थः॥ उपासीरन्। सेवेरन्। तेलोकादीनामनित्यत्वात् शुचार्पिताः प्राप्ताः सन्तो मुह्यंति॥३३॥ न केवलमनित्यतामात्रं किंतु मायामयत्व मपीत्याह॥ काल इति। स्वभावो देवत्वादि परिणामहेतुः। धर्म्मस्तज्जन्य गकारणं गुणव्यतिकरे मायाक्षो भे सति मामेव प्राहुः नतु मद्व्यतिरिक्ताः सन्निनतो नित्यक्ति हेतुत्वात् श्रेयसीति सिद्धं॥३४॥ ॥

भा०ए०
५०

तदेवं प्रवस्थामुपपाद्य कथं वर्त्तेनेत्यादि वैलक्षण्यप्रश्नस्योत्तरमाह। अथेति। तत्र वैलक्षण्यं द्विविधं जीवेश्वरयोरेकं जीवानां चैकं। तत्र जीवेश्वरयोर्वैलक्षण्यमाह। विरुद्धधर्मिणोरिति सार्धद्वयेन। शोकानंदधर्मवतोः एकस्मिन् धर्मिणि शरीरे नियम्यनियंतृत्वेन स्थितयोः॥५॥ सुपर्णौ चेतनात्पक्षिणौ विवरदेहात्पृथग्भूतौ। सदृशौ चिद्रूपत्वात् सखायौ अवियोगादेकमत्याद्वा। यदृच्छया अनिरुक्तया मायया वृक्षतद्दृति वृ

अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते॥ विरुद्धधर्मिणोरत्र स्थितयोरेकधर्मिणि॥५॥ सुपर्णावेतौ सदृशौ सखायौ यदृच्छया कृतनीडौ च वृक्षे॥ एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान्॥६॥

50

क्षो देहः॥ ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रतीति श्रुतेः। ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययमिति स्मृतेश्च। तस्मिन् कृतं नीडं निकेतनं हृदयरूपं याभ्यां तौ। तयोर्मध्ये एको जीवः पिप्पलान्नं पिप्पलोऽश्वत्थः देहस्तस्मिन्नदनीयं कर्मफलमित्यर्थः॥ खादति भक्षयति। अन्य ईश्वरः निरन्नः अभोक्तापि। निजानन्दतृप्तो बलेन ज्ञानादिशक्त्या। भूयान् अधिकः। श्रुतिश्च। द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥६॥ ॥

राम०
५०

त्वं कारणाभूतगुणनामायामयत्वात्तत्कार्यसंसृतिर्मायिकीति प्रपंचयति। शोकमोहाविति। यथा स्वप्न आत्मनः बु-
द्धेः ख्यातिः विवर्तः न तु तत्त्वतः अतो वस्तु विरोधस्तावन्नास्ति ॥२॥ प्रतीतिस्त्वौपाधिकी घटत इत्याह विद्याविद्ये
इति। तन्यते मोक्षबंधावाभ्यामिति तनू शक्ती। कुतः मे मायया विनिर्मिते। मायाया निरूपत्वात्। बंधमोक्ष-
करीत्येकवचनं द्विवचनार्थे। ननु तत्कार्यत्वे बंधमोक्षयोरनादित्वनित्यत्वे न स्यातां। न। आद्ये। अनादी अ-
नादि यावदविद्यां प्रवर्त्तयामि तावद्बंधः यदा विद्यां ददामि तदा मोक्षः स्फुरतीत्यर्थः। तथा च स्कंदपुराणे। बं-
धको भवपाशेन भवपाशाच्च मोचकः। कैवल्यदः परं ब्रह्म विष्णुरेव सनातन इति ॥३॥ तत्र शरीरिणामिति।
बहुवचननिर्देशाद्विषयभेदेनाविरोधस्तत्र इति भ्रान्तिं वारयन् बंधमोक्षव्यवस्थामुपपादयति। एकस्यैवेति।

शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया। स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥२॥ विद्यावि-
द्ये मम तनू विद्ध्युद्धव शरीरिणां। मोक्षबंधकरी आद्ये मायया मे विनिर्मिते ॥३॥ एकस्यैव ममांशस्य जी-
वस्यैव महामते। बंधोऽस्याविद्ययानादिर्विद्यया च तथेतरः ॥४॥

तर्हि किमात्माभेदात्तवापि बंधः नहीत्याह। अंशस्य जीवस्यैवेति। न चात्माभेदे जीवो नाम कोऽप्यस्ति पृथक् कथं च बंधमोक्षसुखदुःखादिव्यवस्था
तत्राह मम अंशस्येत्ययं भावः। यथैकस्यापि चंद्रादेर्जलाद्युपाधिना बिंबप्रतिबिंबरूपो भेदः। यथा च तत्र जल-
कृताः कंपादयः प्रतिबिंबस्यैव न बिंबस्य यथा च तत्र प्रतिबिंबानामप्युपाधिभेदेन भेदादेकस्मिन्नुदकुंभे भग्ने तद्गत
प्रतिबिंबस्यैव बिंबैक्यं नान्यगतस्य तथा अविद्यायां प्रतिबिंबितस्य मदंशस्य जीवस्यैव तत्कृतो बंधः न मम
चोपाधितो भेदाच्च व्यवस्थेति। तथा चाहुः। यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते। न सर्वे संप्रयुज्यं-
ते तद्वज्जीवाः सुखादिभिरिति। एतच्चातिरहस्यं स्वबुद्ध्या निश्चेतव्यमिति संबोधयति। हे महामते। इतरो मोक्षः ॥४॥

भा०ए०
५१

एतैस्त्रिभिः श्लोकैः कथं वर्त्तेतेत्यस्य प्रश्नस्य सुखदुःखयोरन्यो निरभिमानश्च देहे वर्त्तेतेत्युत्तरमुक्तं भवति। वै
लक्षण्येन खदन् किं भुंजीतेत्यादिप्रश्नस्योत्तरमाह। एवमिति त्रिभिः॥११॥ अन्यपरगतमेव कर्म मां बध्नाती।
त्येवं विरक्तो विद्वान्। तथा विद्वानिव शयनासनादिषु न बध्यते कुतः। तत्र तत्र विषयेषु गुणान् इंद्रि
याणि आदयन् भोजयन् तत्साक्षित्वेन वर्त्तमानः न तु स्वयमदन् एतदेव कुतः। तत्राह। प्रकृतिस्थो

एवं विरक्तः शयन आसनाटनमज्जने॥ दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु॥११॥ न तथा बध्यते
विद्वांस्तत्र तत्रादयन् गुणान्॥ प्रकृतिस्थोऽप्यसंसक्तो यथा खं सविताऽनिलः॥१२॥ वैशारद्येक्ष
यासंगशितया छिन्नसंशयः॥ प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्त्तते॥१३॥ यस्य स्युर्वीतसंकल्पाः
प्राणेंद्रियमनोधियां॥ वृत्तयः स विनिर्मुक्तो देहस्थोऽपि हि तद्गुणैः॥१४॥ ॥ ॥

ऽपीति सार्द्धेन। यथा खं सर्वत्र स्थितमपि न सज्जते यथा सविता जले प्रतिबिंबितोऽपि यथाऽनिलः सर्वत्र सं
चरन्नपि तद्वत्॥१२॥ असंगेन वैराग्येण शितया तीक्ष्णया छिन्नाः संशया असंभावनादयो यस्य सः॥
नानात्वात्। देहादिप्रपंचात्॥१३॥ कथं विहरेदित्यस्योत्तरत्वेन वैलक्षण्यं तरमाह यस्य स्युरिति। त
द्गुणैः देहगुणैः। संकल्पशून्याभिः प्राणादिवृत्तिभिर्विहरन् मुक्त इत्यर्थः॥१४॥ ॥

52

राम
५१

वलाधिक्यमेवाह आत्मानमिति अतः यो विद्यया युक्तः स तु नित्यबद्धः। अनादिबद्धः। यस्तु विद्याप्रधानः स तु नि
त्यमुक्तः। मायाया अनावरकत्वात्। आश्रयाभ्यामोहकत्वाच्च ॥७॥ इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्य
माह देहस्थोऽपीति दशभिः विद्वान्मुक्तः संस्कारवशेन देहस्थोऽपि देहस्थो न भवति। यथा स्वप्नादुत्थितः स्वप्न
माणो स्वप्नदेहे स्थितोऽपि तत्रस्थो न भवति। तद्गतसुखदुःखाद्यभावात्। तथा वस्तुतः अदेहस्थोऽपि कुम
तिः अविद्वान्देहस्थः तन्निमित्तसुखदुःखभाक्। यथा स्वप्नगत इति। अत्र हेतुत्वेन वैलक्षण्यं तरमाह

आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः ॥ यो विद्ययायुक्त स तु नित्यबद्धो विद्यामयो यः
स तु नित्यमुक्तः ॥७॥ देहस्थोऽपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः ॥ अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृ
ग्यथा ॥८॥ इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च ॥ गृह्यमाणेष्वहंकुर्यान्न विद्वान्यस्त्वविक्रियः ॥९॥ दैवाधी
ने शरीरेऽस्मिन्गुणभाव्येन कर्मणा ॥ वर्तमानोऽबुधस्तत्र कर्तास्मीति निबध्यते ॥१०॥

शाभ्यां। इन्द्रियैरिन्द्रि
यार्थेषु गृह्यमाणेष्वपि यस्तु विद्वान्सः नाहं कुर्यात् अहं करोमीति मतिं न कुर्यादित्यर्थः॥ कुतः गुणैर्गु
णेषु गृह्यमाणेषु। अतः एव अविक्रियः रागादिशून्यः। तदुक्तं गीतासु। तत्त्ववित्तु महाबाहो गुणकर्मवि
भागयोः। गुणा गुणेषु वर्तन्त इति मत्वा न सज्जत इति। अबुद्धस्तु पूर्वकर्माधीनेऽस्मिन् शरीरे वर्तमानः गु
तोरिन्द्रियैर्भाव्येन कर्मणा तत्र देहादौ निबध्यते। कुतः कर्तास्मीत्यहंकारेण। तदुक्तं तत्रैव। प्रकृतेः
क्रियमाणानि गुणैः कर्माणि सर्वशः॥ अहंकारविमूढात्मा कर्ताहमिति मन्यत इति ॥१०॥ रामरामराम

एतदेवान्यार्थैर्निदर्शनैः प्रपंचयति । गामिति दुग्धदोहामिति दोहः पयः दुग्धो दोहो नोत्तरत्र दोग्ध्री ऽस्ति यस्याः तां
अर्थशून्यां । असतीभार्यां कामशून्याः देहं पराधीनं प्रतिदिनं दुःखहेतुं असत्प्रजां दृष्टादृष्टसाधनशून्यपुत्रां ।
अतीर्थीकृतं आगतेपात्रेऽदत्तं वित्तं दुःखीनिंदुरितापादकं । अंग हे उद्धव दुःखानंतरं दुःखमेव यस्य सः
रक्षति ॥१९॥ मयाहीनां वाचमित्युक्तं विवृणोति ॥ यस्यां मे जगतः शोधकं चरित्रं न स्यात् ॥ किं तत् । अस्य
विश्वस्य स्थित्यादिरूपं तद्धेतुरित्यर्थः ॥ लीलावतारेषु ईप्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म

गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च । वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया
रक्षति दुःखदुःखी ॥१९॥ यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य । लीलावतारेप्सि
तजन्म वा स्याद्वंध्यां गिरं तां बिभृयान्न धीरः ॥२०॥ एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि उपार
मेत विरजं मनो मय्यर्प्य सर्वगे ॥२१॥ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलं । मयि सर्वाणि
कर्माणि निरपेक्षः समाचर ॥२२॥ श्रद्धालुर्मे कथाः शृण्वन् सुभद्रा लोकपावनीः । गायन्ननुस्म
रन् कर्म जन्म चाभिनयन्मुहुः ॥२३॥

52

वा न स्यात् तां निष्फलां गिरं धीरो धीमान् न धारयेत् ॥२०॥ उक्तं ज्ञान
मार्गमुपसंहरति । एवं निश्चित्य विचारेणात्मनि नानात्वभ्रमं देहाद्यध्यासं निरस्य निर्मलं मनो मयि स
र्वगे परिपूर्णे समर्प्य संधार्य उपारमेत् न किंचित् कुर्यात् न शास्त्रपांडित्यमात्रेणेत्यर्थः ॥२२॥ यद्यनी
शः अशक्तः तर्हि आस्तामिदं ॥ मद्भक्त्यैव कृतार्थो भविष्यसीत्याह मयीति । मदर्पणेन कर्मभि
र्विशुद्धसत्त्वस्यांतरंगां भक्तिमाह ॥ श्रद्धालुरिति ॥ अभिनयन् स्वयमनुकुर्वन् ॥२३॥ राम राम

एवंतावद्बद्धमुक्तयोः स्वसंवेद्यमेव वैलक्षण्यमुक्तं उदासीनैकैर्वा ज्ञायेत तल्लक्षणैरित्यस्योत्तरत्वयापरेऽपि सुखे
यं चेल्लक्षणमाह। यस्यात्मेति त्रिभिः। हिंस्रैर्दुर्जनैरन्यैर्वा प्राणिभिः॥ यस्यात्मा देहः पीड्यते यदृच्छया येन के
नापि क्वचित्कांचिदर्च्यते वा सः बुधश्चेत्तत्र न व्यतिक्रियते नातिविक्रियत इत्यर्थः॥ तदुक्तं या
त्त्वत्केन। यः कंटकैर्विनुदति चंदनैर्यश्च लिंपति॥ अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य चेति

यस्यात्मा हिंस्यते हिंस्रैर्येन किंचिद्यदृच्छया॥ अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः॥१५॥ न स्तु
वीत न निंदेत कुर्वतः साध्वसाधु वा॥ वदतो गुणदोषाभ्यां वर्जितः समदृङ्मुनिः॥१६॥ न कुर्यान्न वदे
त्किंचिन्न ध्यायेत्साध्वसाधु वा॥ आत्मारामोऽनया वृत्त्या विचरेज्जडवन्मुनिः॥१७॥ शब्दब्रह्मणि नि
ष्णातो न निष्णायात्परे यदि॥ श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः॥१८॥

॥१५॥ किंच॥ साध्वसाधु वा
कुर्वतो वदतो वा जनान्न स्तुवीत न च निंदेत्॥ यो लौकिकव्यवहारे विमुखः समुक्त इत्यर्थः॥१६॥
अपि च। न कुर्यादिति। यो देहिकेऽपि कर्मण्युदासीनः समुक्त इतरो बद्ध इत्यर्थः॥ एतान्येव सर्वा
णि मुमुक्षोः साधनानि ज्ञातव्यानि यस्तु केवलं शब्दब्रह्मण्येवाभिज्ञः पांडित्यमात्रश्लाघी न तु लक्षैः सा
धनैस्तदर्थं निःक्षोभवेत्तं निंदति॥ शब्दब्रह्मणि निष्णातः पारंगतोऽपि परे ब्रह्मणि निष्णायात् ध्या
नाद्यभियोगं न कुर्यात्तस्य शास्त्रश्रमः श्रमैकफलः न तु पुरुषार्थपर्यवसायी। अधेनुं चिरप्रसूतां॥१८

कामैरहतमतिः। चित्तः। दांतः संयतबाह्येंद्रियः। मृदुः अकठिनचित्तः॥ शुचिः सदाचारः अकिंचनः अप-
रिग्रहः अनीहः दृष्टक्रियाशून्यः मितभुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्वधर्मे मच्छरणः
मदेकाश्रयः॥ मुनिः मननशीलः॥३०॥ अप्रमत्तः सावधानः॥ गभीरात्मा निर्विकारः॥ धृतिमान् विप-
द्यप्यकृपणः जितषड्गुणः क्षुत्पिपासे शोकमोहौ जरामृत्यू च षड्ऊर्मयः॥ एते जिता येन सः॥ अमानी न
मानाकांक्षी॥ अन्येभ्यो मानदः कल्यः परबोधने दक्षः मैत्रः अवंचकः कारुणिकः करुणयैव प्रव-

कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः। अनीहो मितभुक्शांतः स्थिरो मच्छरणो मुनिः॥३०॥
अप्रमत्तो गभीरात्मा धृतिमान्जितषड्गुणः। अमानी मानदः कल्यो मैत्रः कारुणिकः कविः॥३१॥ आ-
ज्ञायैवं गुणान्दोषान्मयादिष्टानपि स्वकान्। धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः॥३२॥
ज्ञात्वाज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः। भजंत्यनन्यभावेन ते मे भक्ततमा मताः॥३३॥ राम

53

र्तमानः नदृष्टलोभेन कविः सम्यग्ज्ञानी॥३१॥ किंच मया वेदरूपेणादिष्टानपि स्वधर्मान्संत्यज्य
यो मां भजेत॥ सोऽप्येवंपूर्वोक्तवत्सत्तमः किमज्ञानान्नास्तिक्याद्वा। न धर्माचरणे सत्वशुद्ध्यादीन्
गुणान् विपक्षे दोषांश्च आज्ञाय ज्ञात्वाऽपि मद्ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्यतीति दृ-
ढनिश्चयेनैव धर्मान्संत्यजेत् यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य॥ अथवा विद्धैका-
दशीकृत्स्नैकादश्युपवासाद्युपवासानिवेद्यश्राद्धादयो ये भक्तिविरुद्धा धर्मास्तान्संत्यज्येत्यर्थः
३२॥ किंच यावान्देशकालापरिच्छिन्नः यश्च सर्वात्मा यादृशः सच्चिदानंदादिरूपः तं मां ज्ञात्वा
अज्ञात्वापि यद्वा विशेषतः पुनः पुनर्न ज्ञात्वा एकांतभावेन ये भजंतीति॥३३॥ ॥

आचरन्सेवमानः ॥२४॥ ततश्चानेन प्रकारेण मयि सत्संगेन लब्धया भक्त्या सद्भक्तः मां उपासिता ध्याता भवति। स
च ध्यानशीलः सद्भिर्दर्शितं वे निश्चितं सुखेनैव मे पदं स्वरूपं प्राप्नोति ॥२५॥ सत्संगलब्धया भक्त्योक्तं। त
त्र सतां भक्तिश्च विशेषं पृच्छति। साधुरिति। साधवः स्वस्वमतिपरिकल्पिताः संति बहवः। तत्र तु
कीदृशः संमतः ॥ भक्तिरपि च बहुविधा लोके ॥ कीदृशी पुनस्त्वय्युपयुज्येत ॥ सद्भिश्च नारदादिभिरा

मदर्थे धर्म्मकामार्थानाचरन्मदपाश्रयः ॥ लभते निश्चलां भक्तिं मय्युद्धव सनातने ॥२४॥ सत्संगल
ब्धया भक्त्या मयि मां स उपासिता ॥ स वै मे दर्शितं सद्भिरंजसा विंदते पदं ॥२५॥ श्रीउद्धव उवाच ॥ साधु
स्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो ॥ भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता ॥२६॥ एतन्मे पुरुषा
ध्यक्ष लोकाध्यक्ष जगत्प्रभो ॥ प्रणतायानुरक्ताय प्रपन्नाय च कथ्यतां ॥२७॥ त्वं ब्रह्म परमं व्योम पुरु
षः प्रकृतेः परः ॥ अवतीर्णोसि भगवन्स्वेच्छोपात्तपृथग्वपुः ॥२८॥ श्रीभगवानुवाच ॥ कृपालुर
कृतद्रोहस्तितिक्षुः सर्वदेहिनां ॥ सत्यसारोनवद्यात्मा समः सर्वोपकारकः ॥२९॥

७

दृता ॥२६॥ एतन्मे क
थ्यतां ॥२७॥ इदं चातिगुह्यं त्वयैव वक्तव्यमित्यैश्वर्यमाविष्करोति ॥ हे पुरुषाध्यक्षेत्यादिना ॥ ब्रह्मा
दिनियंतः ॥ अत्र हेतुः ॥ त्वमिति ॥ व्योमवदसंगः ॥ यतः प्रकृतेः परः ॥ स्वेच्छया उपात्तं पृथक् अप
रिमितं वपुर्येन सः ॥२८॥ तत्र त्रिंशल्लक्षणाः साधून्निरूपयति ॥ कृपालुरिति ॥ कृपालुरिति पंचभिः ॥ कृ
पालुः परदुःखासहिष्णुः ॥ सर्वदेहिनां केषांचिदप्यकृतद्रोहः तितिक्षुः ॥ क्षमावान् ॥ सत्यं सारः स्थिरं
बलं वा यस्य सः ॥ अनवद्यात्मा असूयादिरहितः सुखदुःखयोः समः ॥ यथाशक्ति सर्वेषामुपकारकः ॥२९॥

स्वयमन्येनवानिवेदितंनस्वीकुर्यादिति।।एतच्चसाधारणस्थावरविषयं।रागप्राप्तविषयंवाभक्त्यातुग्राह्य
मेव।।षड्मासोपवासेस्तुयत्फलंपरिकीर्तितं।विष्णोर्नैवेद्यसिक्थेनपुण्यंतद्भुंजतांकलौ।हृदिरूपंमुखे
नामनैवेद्यमुदरेहरेः।पादोदकंचनिर्माल्यंमस्तकेयस्यसोऽच्युतइत्यादिवचनेभ्यः।यद्वाअन्यस्मैनि
वेदितंमेनोपयुंज्यात्मह्यंननिवेदयेदित्यर्थः।।विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरं।पितृभ्यश्च

अमानित्वमदंभित्वंकृतस्यापरिकीर्तनं।।अपिदीपावलोकंमेनोपयुंज्यान्निवेदितं।।४०।।यद्यद
दिष्टतमंलोकेयच्चातिप्रियमात्मनः।।तत्तन्निवेदयेन्मह्यंतदानंत्यायकल्पते।।४१।।सूर्योग्निर्ब्रा
ह्मणोगावोवैष्णवःखंमरुज्जलं।।भूरात्मासर्वभूतानिभद्रपूजापदानिमे।।४२।।सूर्येतुविद्यया
त्रय्याहविषाग्नौयजेतमां।।आतिथ्येनतुविप्राग्र्येगोष्वंगयवसादिना।।४३।।वैष्णवेबंधुसत्कृ
त्याहृदिखेध्याननिष्ठया।।वायौमुख्यधियातोयेद्रव्यैस्तोयपुरस्कृतैः।।४४।।स्थंडिलेमंत्र
हृदयैर्भोगैरात्मानमात्मनि।।क्षेत्रज्ञंसर्वभूतेषुसमत्वेनयजेतमां।।४५।। ।। ।।

वत्तद्देयंतदानंत्यायकल्पते।पितृशेषंतुयोदद्याद्धरयेपरमात्मने।रेतोधाःपितरस्तस्यभवंतिक्लेश
भागिनइत्यादिवचनेभ्यः।।४०।।४१।।इदानीमेकादशपूजाधिष्ठानान्याह।।सूर्यइति।हेभद्र।।४२।।
अधिष्ठानभेदेनपूजासाधनान्याहसूर्यइतित्रिभिः।।त्रय्याविद्ययासूक्तैरुपस्थानादिना।अं
गहेउद्धव।यवसादिनातृणादिना।।४४।।बंधुसत्कृत्याबंधुवत्संमानेनहृदिखेहृदयाकाशे।मु
ख्यधियाप्राणदृष्ट्या।तोयेतोयादिभिर्द्रव्यैस्तर्पणादिनास्थंडिलेमुविमंत्रहृदयैरहस्यमंत्रन्यासैः।।४५।।

साधुत्वदाणामुक्त्वं भक्तेर्लक्षणमाह मल्लिंगेत्यष्टभिः। लिंगानि प्रतिमादीनि ॥३४॥ सर्वलाभोपहरणं सर्वस्वलब्धस्य समर्पणं ॥३५॥ पर्वाणि जन्माष्टम्यादीनि तदनुमोदनं ॥३६॥ बलिविधानं पुष्पोपहारादि समर्पणं। सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः ॥३७॥ उद्यानादिकरणेऽसामर्थ्ये सति स्वतः

मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं ॥ परिचर्यास्तुतिः प्रह्वगुणकर्मानुकीर्त्तनं ॥३४॥ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ॥ सर्वलाभोपहरणं दास्येनात्मनिवेदनं ॥३५॥ मज्जन्मकर्म्मकथनं मम पर्वानुमोदनं ॥ गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः ॥३६॥ यात्रा बलिविधानं च सर्ववार्षिकपर्वसु ॥ वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणं ॥३७॥ ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ॥ उद्यानोपवनाक्रीडपुरमंदिरकर्म्मणि ॥३८॥ संमार्जनोपलेपाभ्यां सेकमंडलवर्त्तनैः ॥ गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥३९॥

प्रसति चान्यैः संभूयोद्यमः ॥ उद्यानं पुष्पप्रधानं ॥ उपवनं फलप्रधानं वनं ॥ आक्रीडं क्रीडास्थानं ॥३८॥ संमार्जनं रजोपाकरणं। उपलेपः गोमयोदकादिभिरालेपनं। सेकः तैरेव शेचनं। मंडलवर्त्तनं सर्वतोभद्रादिकरणं। मह्यं मम ॥३९॥ ॥ ॥ ॥

व्रतानि। एकादश्युपवासादीनि। यज्ञः देवपूजा। छंदांसि रहस्यमंत्राः। अवरुंधे वशीकरोति ॥२॥ यातुधाना राक्षसाः। त्वाष्ट्रो वृत्रः। कयाधुनाम्नी दानवी तस्या अपत्यं कायाधवः प्रह्लादः ॥५॥ ऋक्षो जांबवान्। गजो गजेन्द्रः। गृध्रो जटायुः। वणिक्पथस्तुलाधारः। व्याधो धर्मव्याधः। यज्ञपत्न्यः दीक्षितभार्याः ॥६॥ नेषां सत्संगव्यतिरिक्तं साधनांतरमभूदित्याह। नाधीताः श्रुतिगणा यैः। तदर्थं च न उपासिता महत्तमा यैस्ते तथा। किंच। अव्रताऽतप्ततपसः। न व्रतानि येषां न च तप्तानि तपांसि यैः। ते च ते च तथा। मत्संगात् इति सद्भिः संगो नाम ममैव संग इत्यभिप्रायः।

व्रतानि यज्ञः छंदांसि तीर्थानि नियमा यमाः। यथावरुंधे सत्संगः सर्वसंगापहो हि मां ॥२॥ सत्संगेन हि दैतेया यातुधानाः खगा मृगाः। गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ॥३॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोंत्यजाः। रजस्तमः प्रकृतयस्तस्मिंस्तस्मिन्युगेनघ ॥४॥ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः। वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ॥५॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः। व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ॥६॥ ते नाधीतश्रुतिगणा नोपासितमहत्तमाः। अव्रतातप्ततपसो मत्संगान्मामुपागताः ॥७॥ केवलेन हि भावेन गोप्यो गावो नगा मृगाः। येन्ये मूढधियो नागाः सिद्धा मामीयुरंजसा ॥८॥

॥ यद्वा स्वसंगस्यापि सत्संगत्वं विवक्षन्स्वस्यापि सत्वात्। यद्वा मदीयसंगादित्यर्थः ॥७॥ तत्र वृत्रादीनां भवतु नाम कथंचित्साधनांतरं गोपीप्रभृतीनां न स्तीत्याह। केवलेनेति। सत्संगलब्धेन केवलेनैव भावेन प्रीत्या नगाः यमलार्जुनादयः। नागाः कालीयादयः। यद्वा। तदानीं तन सर्वतरुगुल्मादीनामपि भगवति भावोस्तीति गम्यते। तदुक्तं भगवतैव। अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणं। निमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतमित्यादि। सिद्धाः कृतार्थाः संतः ईयुः प्रापुः ॥८॥ ॥ ॥

सर्वाधिष्ठानेपुध्येयमाह। धिष्ण्येष्वेष्विति॥ इति अनेन प्रकारेण॥ एषु धिष्ण्येषु॥४६॥ उक्तायाः भक्तेः फलमाह। इष्टापूर्तेनेति॥ सद्भक्तिं दृढां भक्तिं॥ अस्या भक्तेरंतरंगसाधनमाह। इत्थं मत्स्मृतिः साधुसेवया भवति। यद् स्मृति ज्ञानं ततश्च दृढभक्तिमतः पुंसः साधुसेवया मज्ज्ञानं भवतीत्यर्थः॥४७॥ ज्ञानभक्तिमार्गानुक्त्वा त्र ज्ञानमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह। प्रायेणेति। सत्संगेन यो भक्तियोगः तेन विनोपायः संसारतरणे न विद्यते। सत्संगेन तत्त्वत्र हेतुमाह॥ हि यस्मात् सतामहं प्रायाणां॥ प्रकृष्टमयनं आश्रयः॥ अतः सत्संगो भक्त्यंतरंग इत्यर्थः॥४८॥ इदानीं सांख्ययोगादीनि साधनानि अंतरसव्यपेक्षाणि सव्यभिचाराणि च भव

धिष्ण्येष्वेष्विति मद्रूपं शंखचक्रगदांबुजैः॥ युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः॥४६॥ इष्टापूर्तेन मामेवं यो यजेत समाहितः॥ लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया॥४७॥ प्रायेण भक्तियोगेन सत्संगेन विनोद्धव॥ नोपायो विद्यते सम्यक् प्रायणं हि सतामहं॥४८॥ अथैतत्परमं गुह्यं शृण्वतो यदुनंदन॥ सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा॥४९॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे एकादशोध्यायः॥ श्रीभगवानुवाच॥ न रोधयति मां योगो न सांख्यं धर्म एव च॥ न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा॥१॥

दशा ३

न्ति सत्संगस्तु स्वतंत्र एव समर्थः फलाव्यभिचारी चेति वर्णयितुमाह अथेति। एतद्वक्ष्यमाणं परमं गुह्यं अतः शृण्वतः॥४९॥ एकादशे एकादशः। द्वादशे साधुसंगस्य महिमा वर्ण्यते पुरा। कर्मानुष्ठानत्यागश्च वस्याच ततः परं॥ नरोधयति। न वशीकरोति। योगः॥ आसनप्राणायामादिः सांख्यं तत्त्वानां विवेकः। धर्मः सामान्यतो हिंसादिः। स्वाध्यायो वेदजपः॥ तपः कृच्छ्रादि त्यागः सन्न्यासः। इष्टापूर्तं इष्टं च पूर्तं च॥ तत्र इष्टमग्निहोत्रादि। पूर्तं कूपारामादिनिर्माणं॥ दक्षिणा शब्देन सामान्यतो दानं लक्ष्यते।

यस्मादेवं मत्तो मद्भजनप्रभावः। तस्मात्त्वं चोदनां श्रुतिं प्रतिचोदनां स्मृतिं चाथ हा विधिं च निषेधं च उत्सृज्य मामेव शरणं याहि। मयैवाकुतोभयः स्याः भव ॥१४॥ पूर्वं तावन्मयोदितेन प्रवर्तितः स्वधर्मपरित्यागादिनाव र्म्मकर्त्तव्यमित्युक्तः इदानीं तु सर्वत्यागेनात्मैव शरणं प्राप्तव्य इत्युच्यते। तत्र किमात्मनः कर्त्तव्यमागतमिति नास्ति चेत्यात्मस्थः आत्मविषयः संशयो न निवर्त्तते ॥ यद्वा ॥ कर्म्म कार्यं त्याज्यं चेत्यात्मस्थः संशयो न नि

तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनां ॥ प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥१४॥ मामेकमेव शरणमात्मानं सर्वदेहिनां ॥ याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः ॥१५॥ उद्धव उवाच ॥ संशयः शृण्वतो वाचं तव योगेश्वरेश्वर ॥ न निवर्त्तत आत्मस्थो येन भ्राम्यति मे मनः ॥१६॥ श्रीभगवानुवाच ॥ स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ॥

वर्त्तन इति पठन्ति। संशय इति येन संशयेन ॥१६॥ उत्तरं स एष इत्यष्टभिः। अयं भावः। ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मना भाति न तत्प्रपंचाध्यासात् जीवानामनाद्यविद्यया कर्तृत्वादितत्तो विधिप्रतिषेधाधिकारस्तदानीं सत्त्वशुद्ध्यर्थं कर्माणि कुर्वित्युक्तं सत्त्वे च शुद्धे पुनः कर्म्मजाड्यपरिहाराय भक्तिविक्षेपकं कर्म्मादरं परित्यज्य दृढविश्वासेन भजेत्युक्तं जातायां तु विद्यायां न किंचित्कर्तव्यमस्तीति। तत्र तावदीश्वराद्वागादीन्द्रियद्वारा जीवसंसर्गकारणभूतप्रपंचोद्भवमाह सार्द्धैश्चतुर्भिः ॥ स एषः अपरोक्षः जीवयतीति जीवः परमेश्वरः ॥ अपरोक्षत्वे हेतुः विवरेषु आधारादिचक्रेषु प्रसूतिरभिव्यक्तिर्यस्य सः ॥ तामेवाभिव्यक्तिमाह घोषेणेति ॥ घोषेण पराख्येन नादवता प्राणेन सह गुहां आधारचक्रं प्रविष्टः सन् ॥ ॥ ॥ ॥

स्वप्राप्तेर्दुर्लभत्वमाह यमिति॥ योगादिभिः कृतप्रयत्नोपि यं न प्राप्नुयात्तं मामीयुरिति पूर्वेणान्वयः अत्र च प्रथमयायोगोप्यः पश्चाद्योवाम्रीकूतमेन सह संगतास्ते सन्तु संगान्वेषां सत्संगस्तेन चनेषां भक्तिरिति ज्ञातव्यं॥९॥ गोपीनां भावं प्रपंचयति रामेणेति चतुर्भिः॥ श्वाफल्किनाक्रूरेण मयि प्रणीते सति मेमत्तोन्यं सुखायन ददृशुः॥ कुतः वियोगेन तीव्रोद्य सह आधियासांताः॥ अत्र हेतुः॥ मयि विगाढेनात्यन्तदृढेन भावेन प्रेम्णा॥ अनुरक्तानि तत्संक्तानि चित्तानि यासां ताः॥१०॥ नीताः क्षिप्त्वव्यतिक्रान्तास्तादृशीति। मयासह या एवं क्षपाः रात्रयः क्षणार्द्धवन्नीतास्ता एव पुनर्मयाहीना

यन्नयोगेन सांख्येन दानव्रततपोध्वरैः॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि॥९॥ रामेण सार्द्धं मथुरां प्रणीते श्वाफल्किनामय्यनुरक्तचित्ताः॥ विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय॥१०॥ तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण॥ क्षणार्द्धवत्ताः पुनरंग तासां हीना मया कल्पसमा बभूवुः॥११॥ ता नाविदन्मय्यनुषंगबद्धधियः स्वमात्मानमदस्तथेदं॥ यथा समाधौ मुनयोब्धितोये नद्यः प्रविष्टा इव नामरूपे॥१२॥ मत्कामा रमणं जारमस्वरूपविदोऽबलाः॥ ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रशः॥१३॥

तासां कल्पसमा बभूवुः कथंभूतास्ताः वा वामगोचरादित्यर्थः॥११॥ किंच। एवं तीव्राधयस्ताः मोहमिषेण समाधिं प्राप्ता इत्याह ता इति। मयि अनुषंगेणासक्त्या बद्धा धियो याभिस्ताः स्वमात्मानं स्वदेहं॥ अदः दूरस्थं। इदं सन्निहितं च नाविदन्। यद्वा। स्वपतिपुत्रादि आत्मानं अहं कारास्पदं॥ अदः परलोकं इदं इमं लोकं नाविदन्निति। यथा मुनयः समाधौ नामरूपेन विदुः तद्वत् किंतु अब्धितोयेन द्यइव मयि प्रविष्टा इत्यन्वयः॥१२॥ एवं ता अबलाः केवलं मत्कामाः। अस्वरूपविदः स्वरूपं तु न जानंति तथापि सत्संगाजारं ब्रह्मजारबुद्धिवेद्यमपि ब्रह्म स्वरूपमेव मां पर

त्कां वाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तिं निर्दिशति। एवं गदिः। गदनं भाषणमेव्याक्तिरित्युपसंहारः कर्म हस्तयोर्वृत्तिः॥ गतिः पादयोः विसर्गः पायूपस्थयोरिति कर्मेंद्रियाणां। घ्राणः। अवघ्राणः रसो रसनं। दृक् दर्शनं। स्पर्शः स्पर्शनं॥ श्रुतिः श्रवणमिति ज्ञानेंद्रियाणां। संकल्पो मनसः विज्ञानं बुद्धिचित्तयोः। अभिमानोऽहंकारस्य। सूत्रं प्रधानस्य॥ सत्वरजस्तमसां विकारोऽधिदेवादि।

एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च। संकल्पविज्ञानमथाभिमानः सूत्रं रजः सत्वतमोविकारः॥२०॥ अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः। विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत्॥२१॥ ॥ ॥

त्रिविधः प्रपंचः मेव्याक्तिरिति पूर्वेणान्वयः॥२०॥ तस्मादीश्वराभिव्यक्तिरूपः प्रपंचो नेश्वराद्भिन्नोस्तीत्याह अयमिति॥ अयं जीव ईश्वरः॥ आदावव्यक्त एकः एक एव वयसा कालेन विश्लिष्टा विभक्ता वागादींद्रियरूपाः शक्तयो यस्याः यद्वा। विशेषेण श्लिष्टा आलिंगिता माया शक्तिर्येन सः बहुप्रकार इव भाति। यतः स एव आद्यः त्रिवृत्। त्रिगुणाश्रयः। अब्जयोनिः लोकपद्मस्य कारणभूतः। एकस्य बहुधाभाने दृष्टांतः योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति।२१

57

मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे च उपेत्य प्राप्य वक्त्रे मात्रा ह्र
स्वादिः स्वरः उदात्तादिः वर्णः अकारादिरित्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलो नानावेदशाखात्मको
भवति। तथा च श्रुतिः। चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि नि-
हितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति। अभिव्यक्तस्य लोकस्य। या सा मित्रावरुणा सदना दुच्चर

मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥१८॥ यथानलः खेऽनिलबन्धुरूष्माब
लेन दारुण्यधिमथ्यमानः ॥ अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी ॥१९॥

तीत्रिषष्टिं वर्णानन्तः प्रकटकरणैः प्राणसंगात्प्रसूते। तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वा
चं वक्त्रे करणविशदां वैखरीं च प्रपद्य इति ॥१८॥ अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृ
ष्टान्तः यथेति। यथाग्निः खे ऊष्मा अव्यक्तोष्मरूपः ॥ दारुणि अधिकं मथ्यमानः अनिलसहायः
सन्। अणुः सूक्ष्मो विस्फुलिङ्गादिरूपो भवति। पुनः प्रकृष्टो जातो हविषा संवर्द्धते। तथैवेयं वा
णी ममाभिव्यक्तिः ॥१९॥

त्वंचैवं ज्ञात्वा कृतकृत्यः सर्वसाधनं त्यजेत्याह। एवमिति। एकांतभक्त्या शितेन तीक्ष्णेन ज्ञानकुठारेण स्वतं
त्रभावो वा द्वयोः जीवोपाधिं त्रिगुणान्यकं लिंगशरीरं विवृश्च्य छित्वा परमात्मानं संपाद्य प्राप्य अथास्त्र
साधनं त्यजेति॥ एकादशो द्वादशः॥ त्रयोदशे अथ सत्वस्य वृद्ध्या विद्योदयक्रमः॥ हंसेतिहासतश्चित्त
गुणविश्लेषवर्णनं। विद्याकुठारेण जीवाशयं विवृश्च्य साधनं त्यजेत्युक्तं॥ ननु तत्र तमआदि
गुणत्रयवृत्तिप्रतिबंधे सति कथं विद्योत्पत्तिरित्याशंक्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह स

एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः॥ विवृश्च्य जीवाशयमप्रमत्तः संपद्य
चात्मानमथात्यजास्त्रं॥ २५॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे
द्वादशोध्यायः॥ श्रीभगवानुवाच॥ सत्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः॥ सत्वेनान्यतमौ
हन्यात्सत्वं सत्वेन चैव हि॥ १॥ सत्वाद्धर्मो भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः॥ सात्विकोपासया सत्वं
ततो धर्मः प्रवर्त्तते॥ २॥

त्वमिति सप्तभिः। तत्रयया नंदादिवदात्मधर्मा गुणाः स्युस्तर्हि तत्स्वरू
पत्वात्तेषां निवृत्तिर्न स्यात् न त्वेतदस्तीत्याह बुद्धेः प्रकृतेरेते गुणाः न त्वात्मन इति॥ अतः सत्वेन स
त्ववृद्ध्यान्यतमौ हन्यात्॥ जस्तमोवृत्तीर्जयेदित्यर्थः॥ सत्वं च सत्पदयादिवृत्तिरूपमुपशमात्मके
न सत्वेनैव हन्यात्॥ १॥ ननु गुणत्रयवृत्तीनां परस्परोपमर्दरूपत्वात्कथं सत्ववृत्त्यैवेतरवृत्तयो
नियमेन हंतव्यास्तत्राह सत्वादिति॥ मद्भक्तिं लक्षयति यो धर्मः सः भक्तिरूप एव वा। सत्वमे
व कथं वर्द्धेत तत्राह सात्विकानां पदार्थानामुपासया सेवया सत्ववृद्धं भवतीत्यर्थः॥ २॥ रामराम

५४

तस्मात्तन्मायाविलसितत्वात्तदाश्रयमिदं जगन्न ततः पृथगिति सदृष्टांतमाह यस्मिन्निति ॥ तन्तुवितानेसंस्थास्थिति र्यस्य सः पटो यथा। तथा यस्मिन्निदं विश्वं वर्त्तते दीर्घतन्तुषु पटइव प्रोतं तिर्यक्कृततन्तुष्विवोतम् एवंभूतं सम्यग्वि स्मात्मकं विश्वमविद्यायां तन्नपश्यस्तत्तद्रूपं जीवस्य कर्तृत्वादिसंसारहेतुः अतस्तद्विवेकज्ञानेन कर्मा दिसर्वत्यागं पमित्युक्तमिति आशयेनाह य एषइति साद्धैस्त्रिभिः पुराणः अनादिः कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफले भोगापवर्गौ कर्म्मतत्फले वा प्रसूते जनयति ॥२२॥ तत्तद्रूपकं प्रपंचयति द्वे इति। द्वे पुण्यपापे अ स्य बीजे। शतं मूलानि शतं अपरिमिता वासनामूलानि यस्य। त्रयो गुणा नालानि प्रकाण्डा यस्य॥ पंचभू

यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तन्तुवितानसंस्थः। य एष संसारतरुः पुराणः कर्म्मात्मकः पुष्प फले प्रसूते ॥२२॥ द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः। दशैकशाखो द्विसुप र्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः ॥२३॥ अदन्ति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदम् ॥२४॥

तानि यस्कंधा यस्य। पंचरसाः शब्दादिविष यास्तेषां प्रसूतिर्यस्मात् ॥ दशचएका च शाखा इंद्रियाणि यस्य द्वयोः सुपर्णयोः जीवपरमात्मनोर्नीडं यस्मि न्त्रीणि वल्कलानि त्वचः वातपित्तश्लेष्माणो यस्य। द्वे सुखदुःखे फले यस्य सः॥ अर्कं प्रविष्टः सूर्यमंडल पर्य्यंतं व्याप्तः। तन्निर्भिद्य गतस्य संसाराभावात् ॥२३॥ तत्फलभोक्तृनाह ॥ गृध्रवन्नीनि गृध्राः कामिनः ग्रामेचरा रागद्रस्थाः अस्य वृक्षस्यैकं फलं दुःखमदंति परिणामतः स्वर्गादेरपि दुःखस्वरूपत्वात्। हंसा विवेकिनो अरण्यवासाः संन्यासिन एकं फलं सुखमदंति एकं परमात्मानं मायामयमेवं बहुरूपं इज्यैः पूज्यैः गुरु भिः कृत्वा यो वेद स वेदं तत्त्वार्थं वेद ॥२४॥ ॥ ॥ ॥

भा॰ग॰
५९

ननुगुणव्यतिकराज्जातोदेहः कथंस्वाश्रयभूतान्गुणान्स्वजनयोत्पन्नयातिविद्ययापीत्याशङ्क्ययम
पुपरमेत्। तत्राह। वेणूनांसंघर्षणाज्जातोग्निर्यथास्वजनयोत्पन्नाभिर्ज्वालाभिस्तद्वनंसर्वंदग्ध्वास्व
यंशाम्यति। एवंदेहोपितत्क्रियः॥ तस्याग्नेरिवक्रियाव्यापारोयस्यसः॥७॥ ननुनियतेन्द्रियतया
सात्विकसेवयायामियानस्तिपुरुषार्थः॥ तथापिराजसादीन्विषयान्दुःखमितिजानंतोपि
कथंसेवंतइतिपृच्छति॥ विदंतीति॥ पदंस्थानंश्वानोयथाभर्त्स्यमानाअपिःखरायथापश्व

वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनं॥ एवंगुणव्यत्ययजोदेहःशाम्यतितत्क्रियः॥७॥ उद्ध
वउवाच॥ विदंतिमर्त्याःप्रायेणविषयान्पदमापदां॥ तथापिभुंजतेकृष्णतत्कथंश्वखराजव
त्॥८॥ श्रीभगवानुवाच॥ अहमित्यन्यथाबुद्धिःप्रमत्तस्ययथाहृदि॥ उत्सर्प्पतिरजोघोरंततोवै
कारिकंमनः॥९॥ ॥

59

ज्ञाताडमानाअपिखरीमनुधावंतः॥ अजायथानिर्लज्जाःहंतुमानीताअपितद्वत्॥८॥ मिथ्याभि
निवेशेनभुंजतइतिसहेतुकमाह। अहमितित्रिभिः॥ प्रमत्तस्यविवेकशून्यस्यदेहादावह
मितिमिथ्याबुद्धिर्हृदियथावदुत्सर्प्पति॥ ततोहंबुद्धेश्चवैकारिकंसत्वप्रधानमपिमनःप्र
तिघोरंदुःखात्मकंरजउत्सर्प्पति। मनोव्याप्नोतीत्यर्थः॥९॥ ॥

राम॰
५९

सत्वधर्मो रजस्तमसी हन्यात्॥ कुतः न विद्यते उत्तमो यस्मात् सः सर्वोत्तमः॥ यतः सत्ववृद्धिः सत्वस्य वृद्धि
र्यस्मिन् कारणे सः अन एव तत्कार्यं धर्मप्रतिबंधोपि नास्तीत्याह। तस्मिन्नुभयस्मिन् हते॥ तन्मू
लस्ते रजस्तमसी रागद्वेषादिना प्रमादालस्यादिना च मूलं यस्य सः॥३॥ सात्विकोपासनया सत्वं वर्द्धे
त इत्युक्तं तानेव सत्ववृद्धिहेतून् दर्शयितुं सामान्यतो गुणत्रयवृद्धिहेतूनाह। आगमः शास्त्रं। अपः
आपः॥ क्वचिदागमोथेइतिपाठः॥४॥ एषु सात्विकादि निर्णयमाह॥ एषामेव मध्ये प्रवृद्धते प्रशंसंति
यच्च निंदंति॥ तत्र त्तामसं। यत्तु तैर्वृद्धैरुपेक्षितं॥ नस्तुतं न च निंदितं तद्राजसं॥५॥ सात्विकान्येवैषि

त्व

धर्मो रजस्तमोहन्यात्सत्ववृद्धिरनुत्तमः॥ आशु नश्यति तन्मूलो ह्यधर्म उभये हते॥३॥ आगमोपः प्रजा॥
देशः कालः कर्म च जन्म च॥ ध्यानं मंत्रोथ संस्कारो दशैते गुणहेतवः॥४॥ तत्तत्सात्विकमेवैषां य
द्यद्वृद्धाः प्रचक्षते॥ निंदंति तामसं तत्तद्राजसं तदुपेक्षितं॥५॥ सात्विकान्येव सेवेत पुमान्सत्व
विवृद्धये॥ ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनं॥६॥ विवृत्तिशास्त्राण्येव सेवेत॥ न प्रवृत्ति
पाषंडशास्त्राणि तीर्थाप एव न गंधोदकसुराद्याः प्रजाजनाः। निवृत्तान्जनानुन प्रवृत्तदुराचारान्
विविक्तदेशं। न रथ्याद्युत देशान् कालं ब्राह्ममुहूर्तादिकं ध्यानादौ। न प्रदोषनिशीथादीन्॥ कर्म
च नित्यं। न काम्याभिचारादीनि॥ जन्म च वैष्णवशैवदीक्षालक्षणं। न शाक्तक्षुद्रदीक्षारूपं ध्यानं श्री
विष्णोः॥ न कामिनी विद्विषां। मंत्रं प्रणवादिकं। न काम्यक्षुद्रान् संस्कारं आत्मनः शोधकं। न तु केव
लं देहगृहादीनां॥ ननु ज्ञानं महता कालेन श्रवणादेर्वोत्पद्यते। किं तत्र सत्ववृद्ध्या धर्मेण वा। अत आ
ह॥ यावत्स्मृतिः॥ आत्मापरोक्ष्यं यावत्स्वदेहद्वयतत्कारणभूतगुणापोहः तावत्पर्यंतं ज्ञानं भवतीत्यर्थः॥६॥

भा॰ए॰
६०

मानसाः पुत्राः सूक्ष्मां दुर्ज्ञेयां। ऐकांतिकीं गतिं परां काष्ठां तदेवाह। गुणेष्विति। विषयेषु स्वभावतो रागादिवशा
च्चेतः प्रविशति तेन चानुभूता विषया वासनारूपेण चेतसि प्रविशंति॥ अतितितीर्षोः विषयानतिक्रमितुमि
च्छोः॥१७॥ एवमिति। महान्देवोपि स्वयंभूरपि भूतानां स्रष्टापि ध्यायमानः विचारयन्नपि प्रश्नस्य बीजं य

सनकादय
ऊचुः

श्रीभगवानुवाच॥ पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैकांतिकीं
गतिं॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो॥ कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः॥१७॥ श्री
भगवानुवाच॥ एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः॥ ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः।
१८॥ स मामचिंतयद्देवः प्रश्नपारतितीर्षया॥ तस्याहं हंसरूपेण सकाशमगमं तदा॥१९॥ दृष्ट्वा
मां त उपाव्रज्य कृत्वा पादाभिवंदनं॥ ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति॥२०॥ इत्य
हं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा॥ यदवोचमहं तेभ्यस्तदुद्धव निबोध मे॥२१॥ राम

60

दज्ञानादयं प्रश्नः तन्नाविदत् यतः कर्मविक्षिप्तधीः॥१८॥ प्रश्नस्य पारमुत्तरमभिप्रायो वा तस्य तिती
र्षया जिज्ञासया हंसरूपेणेति। यथा हंसो नीरं क्षीरं च पृथक् कर्तुं शक्तः एवमहं गुणांश्चेतश्च विवे
चयितुं हंसरूपेणागतोस्मीति॥१९॥ इत्यहं मुनिभिः पृष्ट इति पृथक् वाक्यं यदवोचमिति च पृथक्
अतोस्मत्कृद्वादशत्रिरदोषः॥ तेभ्यो यदवोचं तन्मे वचनं निबोध॥२१॥ ॥

राम
६०

दृढमेवंभोग्यमितिसविकल्पः संकल्पःस्यात्॥ ततश्च अहोरूपमहोभावइतिगुणध्यानात्दुर्द्धरःकामः स्यात्॥१०॥ततोविषयान्भोक्तुंकर्म्माणिकरोति॥११॥एवंचेन्नकस्यापिदुःखनिवृत्तिःस्यादित्याशंक्याह॥ यद्यपिरजस्तमोभ्यांविक्षिप्तधीःमूढधीश्चतथापिविद्वान्विवेकीपुनर्म्मनोनिरुंधन्नसज्जते॥१२॥ विषयदोषदृष्ट्यापिमनोनिरोधाशक्तौसुखंतन्निरोधोपायमाह॥ अप्रमत्तइति॥ अनिर्विण्णः अनलसः॥

रजोयुक्तस्यमनसःसंकल्पःसविकल्पकः॥ततःकामोगुणध्यानान्दुःसहःस्याद्धिदुर्म्मतेः॥१०॥ करोतिकामवशगःकर्म्माण्यविजितेंद्रियः॥दुःखोदर्क्काणिसंपश्यन्रजोवेगविमोहितः॥११॥रजस्तमोभ्यांयदपिविद्वान्विक्षिप्तधीःपुनः॥अतंद्रितोमनोयुंजन्दोषदृष्टिर्न्नसजते॥१२॥अप्रमत्तोनियुंजीतमनोमय्यर्पयन्छनैः॥अनिर्विण्णोयथाकालंजितश्वासोजितासनः॥१३॥एतावान्योगआदिष्टोमच्छिष्यैःसनकादिभिः॥सर्वतोमनआकृष्यमय्यद्धावेश्यतेयथा॥१४॥श्रीउद्धवउवाच॥यदात्वंसनकादिभ्योयेनरूपेणकेशव॥योगमादिष्टवानेतद्रूपमिच्छामिवेदितुं॥१५॥

यथाकालंत्रि षवणंमयिपरमानंदरूपेयेयन्समादध्यात्॥१३॥विषयैःसंग्रथितस्यमनसस्तद्वियोगेनेश्वरनि ष्ठत्वमसंभावितंमन्यमानंप्रतितन्निरूपणायेतिहासमुपक्षिपति॥ एतावानितियथावन्मय्या वेश्यतइत्येतावानित्यर्थः॥१४॥मच्छिष्यैरित्युक्तेतेषामतिज्यायसामनेनरूपेणनिरूपणासंभवा त्पृच्छति॥ यदेति॥ तंकालंतदेतद्रूपंवेदितुमिच्छामितदेतत्कथयेति॥१५॥ ॥

तस्मात् अभीक्ष्णं पुनः पुनर्गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं ते च पुनर्वासनारूपेण चित्ते प्रकर्षेण भवं
तीति तथा ते गुणाश्चेतश्च । एवं यदुभयं तन्मद्रूपः सन् त्यजेत् २६ ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थत्वम्
पतात्राह ॥ जाग्रदिति जागरः स्वप्नः सुषुप्तं चेति । बुद्धेरेता वृत्तयः । ता अपि न स्वाभाविकाः किंतु । सत्वाज्जागर
णं विद्याद्रजसा स्वप्नमादिशेत् । प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततम् इति निवृत्तप्रमाणक्रमेण गुण
ता एव । जीवस्तु विलक्षणः तदवस्थारहित एव विनिश्चितः कुतः तासां साक्षित्वेन ॥२७॥ ननु तर्हि कथमहं जा
गर्मीत्यादि प्रतीतिः तत्राह । यर्हीति । यर्हि यस्मात् । सम्यक् संसृतिः संसरणं मनयेति संसृतिर्बुद्धिः तया बंधो यमा

गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् ॥२६॥ जाग्रत्स्वप्नः सु
षुप्तं च गुणतो बुद्धिवृत्तयः ॥ तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥२७॥ यर्हि संसृतिबंधोयमा
त्मनो गुणवृत्तिदः ॥ मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां ॥२८॥ अहंकारकृतं बंधमात्मनोर्थ
विपर्ययं ॥ विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत् ॥२९॥ यावन्नानार्थधीः पुंसो न निवर्तेत
युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥३०॥ त्मनो गुणवृत्तीर्ददाति । तस्मात् मयि तुर्ये

स्थितः सन् इमं संसृतिबंधं जह्यात् ॥ तत्तदा गुणचेतसां गुणानां चेतसश्च त्यागः स्वतो भवति ॥२८॥
कथं संसृत्याबंधः ॥ कथं च तं जह्यात् । तदाह । अहंकारेण कृतं बंधं आत्मनः अर्थविपर्ययं आनंदा
द्यावरणेनानर्थहेतुं विद्वान् जानन् सन् निर्विद्य दुःखमेतदिति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिं
तां संसारो बुद्धिः तस्मिन् चिंतां अभिमानं तत्कृतां भोगचिंतां च त्यजेदिति ॥२९॥ यावदेवं न त्यजेत्
तावत्तस्य कर्मज्ञानादि सर्वं व्यर्थमित्याह ॥ यावदिति । यद्यपि जागर्ति कर्मादिषु तथापि स्वपन्
स्वप्नान्पश्यन्निव भवति । यतोऽज्ञः ॥ असम्यग्दर्शी ॥ अत्र जागरस्य स्वप्नत्वे दृष्टांतः ॥ स्वप्न इति ॥३०॥

देहादिविविक्तात्मज्ञाने सति तदिन्द्रियस्य रागाद्यसंभवात्स्वयमेव विषयचेतसोर्विश्लेषो भवतीति वक्तुं प्रश्नखंड
नमिषेणोत्तरमाचष्टे। आत्मानात्मविवेकमाह। वस्तुन इति। किमात्मनोऽयं प्रश्नः तदुपाधेर्भूतसंघस्य वा॥ यद्यात्
मनः तर्हि तस्य वस्तुनः परमार्थरूपस्य अनानात्वे सति हे विप्राः युष्माभिः कृतः ईदृशः प्रश्नः न घटते निर्वि
शेषरूपः कथं घटेत्। वक्तुः उत्तरदातुर्वा मम क आश्रयः॥ अविशेषे आत्मनि कं जातिगुणादिविशेषमा
श्रित्योत्तरं वक्ष्यामीत्यर्थः॥२२॥ भूतसंघविषयत्वेऽपि अयं वः प्रश्नः वाचारंभः वाङ्मात्रेणारब्धः॥ यतोऽनर्थ
कः॥ कुतः भूतेषु देवमनुष्यादिदेहेषु पंचभूतात्मकेषु॥ अतः समानेषु अभिन्नेषु पुनश्च वस्तुतः पर

वस्तुनो यद्यनानात्व आत्मनः प्रश्न ईदृशः॥ कथं घटेत वो विप्रा वक्तुर्वा मम क आश्रयः॥२२॥ पंचात्मकेषु भू
तेषु समानेषु च वस्तुतः॥ को भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः॥२३॥ मनसा वचसा दृष्ट्या गृह्यते
ऽन्यैरपीन्द्रियैः॥ अहमेव न मत्तोऽन्यदिति बुध्यध्वमंजसा॥२४॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्र
जाः॥ जीवस्य देह उभयं गुणाश्चेतो मदात्मनः॥२५॥

मकारणात्मना अभिन्नेषु। वाचारंभणं विकारो नाम
धेयं मृत्तिकेत्येव सत्यमिति श्रुतेः॥२३॥ न त्वयं पंचात्मकं भूतजातादि सिद्धमेवेति परमकारणाभेदमेवोपपादय
ति। मनसेति॥ मनआदिभिर्यद्गृह्यते तेन तदहमेवेत्यर्थः॥ अंजसा तत्त्वविचारेण एतेनैव सर्वात्म
कोऽहमित्यंजसाप्युत्तरमुक्तं भवति॥२४॥ एवं प्रश्नखंडनमिषेणात्मस्वरूपं सामान्यतो निरूप्य ब्रह्म
णोऽपि पुत्रैः परिहर्तुं यत्पृष्टं तत्र उत्तरमाह। गुणेष्वित्यादिना। यावदध्यायसमाप्ति॥ अयमभिप्रायः॥
यदि कर्तृत्वभोक्तृत्वादिरूपेण या विषयैः संग्रथितं चित्तं तु यदि शरीरवाच्यमेव जीवस्य स्वरूपं भ
वेत्॥ ततस्तद्वियोगो न घटेत। न त्वस्य तत्स्वरूपमहं ब्रह्मैव। विना ध्यासेन तु तत्त्वभावनया विषयैः
संग्रथितं अतः स्वस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधानेन सर्वतो निर्विद्य भगवंतं भ
जतो भवत्येव पुरि पूर्णस्वरूपावस्थानमिति। हे प्रजाः पुत्रकाः सत्यं गुणेषु चेत आविशति। गुणाश्चचेत
सि। एवं गुणाश्चेतश्च उभयं संग्रथितं। मदात्मनो जीवस्य स्वरूपस्य जीवस्य देहः अध्यस्त उपाधिः न तु स्वरूपं॥२५॥

अनुमानान्दर्शयति। इहेति। इदं जगद्विभ्रमं इहेतत्। तत्र हेतवः मनो विजृंभितत्वात्। दृश्यत्वात् विनाशि-
त्वाच्च स्वप्नवत्॥ अतिचंचलत्वाच्च अलातचक्रवत्। ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह। विज्ञानमि-
ति। निगमनं तस्मात्त्रिधायोऽयं गुणपरिणामकृतो विकल्पो भेदः समायेति॥३४॥ तस्मात्ततो दृश्यात्
दृष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवेत्। तन्नैश्चल्यार्थं निवृत्तस्पृहः तूष्णीं निरीहश्च भवेत्।
मनो वा मनोवाक्कायव्यापाररहित इत्यर्थः॥ ननु देहवतः सर्वथा देहदृष्टिप्रतिनिवर्त्तनायो-

ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं॥ विज्ञानमेकमुरु-
धेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः॥३४॥ दृष्टिं ततः प्रतिनिवर्त्य निवृ-
त्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः॥ संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्र-
माय न भवेत्स्मृतिरानिपातात्॥३५॥ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतो-
ऽध्यगमत्स्वरूपं॥ दैवादुपेतमुत दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः॥३६॥ राम

गात्पुनः संसारः स्यादेव तत्राह संसारः स्यादेव तत्राह संदृश्यत इति॥ क्वचिदावश्यकाहारादिषु
यद्यपीदं संदृश्यते। तथापि पूर्वमवस्तुबुद्ध्याय त्यक्तं न पुनर्मोहाय न भवेदेव। किंतु देहपातप-
र्यंतं स्मृतिः शिवस्मृतिः संस्कारमात्रेण च भासो भवेदित्यर्थः॥३५॥ एतदेवोपपादयति। देहमि-
ति॥ आसनादुत्थितं गत्वा यत्र तत्रैवावस्थितं वा ततः क्वचिदपेतं निर्गतं पुनस्तत्रैवोपेतं
वा देहमपि नानुसंधत्ते। कुतोऽन्यत्। यतः येन देहेन स्वरूपमध्यगमत् ज्ञातवान्तं देहं। य-
तः कारणादिति वा। परिकृतं परिहितं वासो गतं स्थितं वा यथा न वेत्ति तद्वत्॥३६॥ रामरा

62

न्नु कथं वेदप्रमितवर्णाश्रमकर्मादिनानात्वनिर्वर्तनेन तत्राह ॥ असत्त्वादिति ॥ भावानां देहादीनां तत्कृता भिदा वि
शेषो वर्णाश्रमादिरूपा । गतयः स्वर्गादिफलानि हेतवः कर्माणि चास्यात्मनो मृषा ॥ अविद्यावद्विषयो वेद इति
भावः ॥३१॥ युक्तिभिश्चोक्तं ॥ ता एव युक्तीराह ॥ य इति ॥ अर्थान्स्थूलान्देहादीन् समस्तकरणैश्चक्षुरा
दिभिर्भुङ्क्ते ॥ कथंभूतान् ॥ अनुक्षणधर्मिणः ॥ क्षणिकबाल्यतारुण्यादिधर्मवतः ॥ यश्च स्वप्ने हृदि जागर
दृशा तद्दशान्वासनामयान्भुङ्क्ते । यश्च सुषुप्ते तान्सर्वानुपसंहरति । स एकः ॥ कुतः ॥ त्रिगुणवृत्तिदृक् अव
स्थात्रयद्रष्टा । ननु जाग्रदवस्थां सर्वेन्द्रियाणि पश्यन्ति । स्वप्नं मनः । सुषुप्तिं तत्संस्कारशेषा बुद्धिः कथमा

असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा । गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥३१॥ यो जागरे
बहिरनुक्षणधर्मिणोऽर्थान्भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ॥ स्वप्ने सुषुप्त उपसंहरते स एकः स्मृ
त्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥३२॥ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इ
ति निश्चितार्थाः ॥ संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिं ॥३३॥

त्मनस्त्रयद्रष्टृत्वं तत्राह । इन्द्रियेशः ॥ ननु इन्द्रियेशा अपि विश्वतैजसप्राज्ञा भिन्नाः न कुतः स्मृत्यन्वयात्प्रतिसं
धानेन सर्वावस्थास्वन्वयात् यः स्वप्नानद्राक्षं यश्चान्तरं न किंचिदवेदिषं स एव एतर्हि जागर्मीति उ
पाधिभेदेन विश्वादिव्यवहार इति भावः ॥ एतेन बाल्ययुवाद्यवस्थास्वपि प्रतिसंधानेनात्मैक्यं द्रष्ट
व्यं ॥३२॥ ततः किं अत आह । एवमिति गुणतो गुणैर्निमित्तैः मनसस्त्र्यवस्थाः ताः मदविद्यया मयि कल्पिता
न तत्त्वतः सन्तीति विनिश्चित आत्मस्वरूपोऽर्थो यैस्ते यूयं अखिलसंशयानामाधिं आधीयन्तेऽस्मि
न्निति आधिरहंकारः तं संछिद्य हार्दं हृदि स्थितं मां भजत । केन छित्त्वा तदाह । अनुमानैः सदुक्तिः सतां
उपदेशः श्रुतिभिश्च तीक्ष्णो यो ज्ञानखड्गस्तेन ॥३३॥ ॥ ॥ ॥

भा०ए० ६३

मेमया अगतास्तमां तुष्टुवुः ४१ प्रत्येयायाप्रत्यागतोस्मि ४२ एकादशेत्रयोदशः चतुर्दशे परं श्रेयो भक्तिरेव न चेतरत्। इत्येतद्दर्शितं ध्यानयोगश्च सहसाधनैः एवं तावद्भगवता भक्त्या मोक्ष इत्युक्तं अन्ये त्वन्यानि साधनानि वदंति। तत्र विशेषनिर्द्धारणाय पृच्छति॥ श्रेयांसि श्रेयः साधनानि॥ किं विकल्पेन प्राधान्यं उत नाहो किं वा एकस्यैव मुख्यता १ एकमुख्यतापक्षोत्थानेकारणं

इति मे छिन्नसन्देहा मुनयः सनकादयः सभाजयित्वा परया भक्त्या गृणात संस्तवैः ४१ तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ४२ इति श्री भागवते महापुराणे एकादशस्कंधे त्रयोदशोध्यायः उद्धव उवाच वदन्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः तेषां विकल्पप्राधान्यमुताहो एकमुख्यता १ भवतोदाहृतः स्वामिन् भक्तियोगोनपेक्षितः निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः २ राम राम

भवतेति॥ अनपेक्षितः। न अपेक्षितं अपेक्षा यस्मिन्सः अहैतुकः॥ अयमर्थः॥ भवता यो भक्तियोग उक्तः अन्ये च यानि श्रेयः साधनानि वदंति। तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यमेव सर्वेषां॥ उतांगांगित्वं॥ प्राधान्ये पि किं विकल्पेन। सर्वेषां तुल्यफलत्वं यद्वा कश्चिदस्ति विशेष इति

63

राम ६३

ननुचयःपरिपात्यमानोपिमुमूर्षेत्तिनंचेन्नपश्यतितर्हिपतेदेवनेत्याहदेहोपीति। दैववशेनगच्छन्स्वारंभकं
कर्मयावदस्तितावत्पर्यंतंप्रतिसमीक्षतएवजीवत्येव। सासुःप्राणेंद्रियसहितः॥ ननुतर्हितस्मिन्कदाचि
दासज्जेतापिनेत्याह।तमिति॥स्वाप्नंस्वप्नतुल्यं।अधिरूढःप्राप्तःसमाधिपर्यंतोयोगोयेन।अतएवप्रतिबु
द्धंज्ञातंपरमार्थवस्तुयेनसः।तथाचश्रुतिः।तस्यतावदेवचिरंयावन्नविमोक्ष्येथसंपत्स्यइति॥३७॥उक्त।

देहोपिदैववशगःखलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएवसासुः॥तंसप्रपंचमधिरूढसमाधि
योगःस्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः॥३७॥मयैतदुक्तंवोविप्राःगुह्यंयत्सांख्ययोगयोः॥
जानीतमागतंयज्ञंयुष्मद्धर्मविवक्षया॥३८॥अहंयोगस्यसांख्यस्यसत्यस्यर्तस्यतेजसः॥प
रायणंद्विजश्रेष्ठाःश्रियःकीर्तेर्दमस्यच॥३९॥मांभजंतिगुणाःसर्वेनिर्गुणंनिरपेक्षकं॥सुहृ
दंप्रियमात्मानंसाम्यासंगादयोऽगुणाः॥४०॥

र्थंतेषांविश्वासार्थंस्वस्वरूपमाहद्वाभ्यांमयेति।सां
ख्यमात्मानात्मविवेकः॥योगोष्टांगः॥तयोर्गुह्यंरहस्यं।यज्ञंविष्णुं।युष्मद्धर्मविवक्षयेत्यनेनधर्मो
अप्युपदिष्टाइतिज्ञेयं।अतएवयत्नेनाहंसरूपेणब्रह्मणोभात्यमाधवेत्यनुवादोभविष्यति॥३८॥
ऋतंप्रतीयमानोधर्मःसत्यंअनुष्ठीयमानोधर्मःतेजःप्रभावः॥एतेषांपरमयनं॥३९॥किंच।
मामिति।कथंभूताः॥अगुणाःगुणपरिणामरूपानभवंतिकिंतुनित्याइत्यर्थः॥४०॥रामरामरा

तदेवाह॥ धर्ममिति सार्द्धेन। धर्मं कर्ममीमांसकाः। मोक्षार्थी नद्युक्तं मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः। नि
त्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेत्यादि। यशः काव्यालंकारकृतः यथाहुः॥ यावत्कीर्त्तिर्मनुष्यस्य
पुण्या लोकेषु गीयते तावद्वर्षसहस्राणि स्वर्गलोके महीयत इति। कामं वात्स्यायनादयः। सत्यं शमं
दमं च योगशास्त्रकृतः। अन्ये स्वार्थं वादिनो दंडनीतिकृतः वैप्रसिद्धं ऐश्वर्यमेव स्वार्थं पुरुषार्थं व
दंति। अतः सामाद्युपाया एव श्रेयःसाधनमिति तेषां मतं। तथैव त्यागं भोजनं च लोकायतिकाः यज्ञं

धर्ममेके यशश्चान्ये कामं सत्यं दमं शमं॥ अन्ये वदंति स्वार्थं वै ऐश्वर्यं त्यागभोजनं॥ केचिद्यज्ञं
तपो दानं व्रतानि नियमान्यमान्॥१०॥ आद्यंतवंत एवैषां लोकाः कर्म्मविनिर्म्मिताः॥ दुःखोदर्कास्त
मोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः॥११॥ मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः॥ मयात्मना सुखं य
त्तत्कुतः स्याद्विषयात्मनां॥१२॥ अकिंचनस्य शांतस्य दांतस्य समचेतसः॥ मया संतुष्टमनसः स
र्वाः सुखमया दिशः॥१३॥ न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं॥ न योगसिद्धीर
पुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत्॥१४॥ तपो दानं। यज्ञो देवतानां पूजनं॥ तपश्च दानं च

तेषां तु क्षुद्रफलत्वमाह॥ आद्यंतवंत इति। एषां लोकाः॥ एतैः साध्या निष्फला वि। तमोनिष्ठा मोहाव
सानाः॥ भोगकालेऽप्यसूयादिभिः शुचार्पिताः व्याप्ताः॥११॥ भक्तेर्मुख्यत्वमाह॥ मयीति। यावत्समाप्ति
देहसम्बन्धमया परमानंदरूपेण आत्मना स्वरूपत्वेन स्फुरता॥१२॥ किं च अन्येषां तत्तल्लोकादिपरिच्छि
न्नं सुखं भक्तस्य तु परिपूर्णमित्याह। अकिंचनस्येति॥१३॥ परिपूर्णतामेवाह न पारमेष्ठ्यमिति। रसा
धिपत्यं पातालादिस्वाम्यं॥ अपुनर्भवं मोक्षमपि। मद्विना मां हित्वा। अन्यन्नेच्छति। अहमेव तस्यापेक्ष इत्यर्थः॥१४

तत्र भक्तिरेव महाफलत्वेन मुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुष्पस्थानीयस्वर्गादिफललुब्धैः प्राणिभिः प्राधान्येन परिकल्पितानि तुच्छकफलानीति विवेक्तुं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्तिमाह कालेनेति सप्तभिः॥ मदात्मकः मय्येवात्मा चित्तं येन सः ॥३॥ भृग्वादयः भृगुश्च मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः ॥ क्रतुरित्येते च सप्त ब्रह्माणः प्रजापतयः ते च ते महर्षयश्च ॥४॥ किंदेवाः॥ श्रमस्वेददौर्गन्ध्या

श्रीभगवानुवाच॥ कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ॥ मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥३॥ तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ॥ ततो भृग्वादयोगृह्णन् सप्त ब्रह्ममहर्षयः ॥४॥ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः ॥ मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः ॥५॥ किंदेवाः किन्नरा नागा रक्षः किंपुरुषादयः ॥ बह्व्यस्तेषां प्रकृतयो रजःसत्वतमोभुवः ॥६॥ याभिर्भूतानि भिद्यंते भूतानां मतयस्तथा ॥ यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि ॥७॥ एवं प्रकृतिवैचित्र्याद्भिद्यंते मतयो नृणां ॥ पारंपर्येण केषांचित्पाषंडमतयोपरे ॥८॥ मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ॥ श्रेयो वदंत्यनेकांतं यथाकर्म्म यथारुचि ॥९॥

हित्येन किंदेवाः मनुष्या वेति संदेहास्पदभूता द्वीपान्तरमनुष्याः॥ एवं किन्नराः किंचिन्नरा इव मुखतः शरीरतो वा॥ किंपुरुषाः॥ किंचित्पुरुषा इव वानरादयः॥ प्रकृतयः वासनाः बह्व्यः कुतः रजःसत्वतमांसि भुवः जन्मस्थानानि यासां ताः ॥६॥ भूतानि देवासुरमनुष्यादीनि॥ चित्रा वाचः॥ वेदार्थव्याख्यानविषयाः ॥७॥ एवमित्युक्तोपसंहारः॥ केषांचिदध्ययनादिशून्यानाम् उपदेशपारंपर्येण॥ अपरे पाषंडमतयः वेदविरुद्धार्थमतयः ॥८॥ तत्र स्वकृतीनां मायागुणमूलत्वान्मोहितधियः॥ अनेकांतं नानाविधं ॥९॥ ॥ ।

अतएवंभूतंश्रेयोनान्यदस्तीत्याह॥नसाधयतीतिद्वाभ्यां॥२०॥श्रद्धयायाभक्तिस्तया॥संभवाज्जातिदो
षादपीत्यर्थः॥२१॥भक्त्यभावेन्यत्साधनंव्यर्थमित्याह॥द्वाभ्यांधर्मइति॥२२॥रोमहर्षादिकंविनाकथं
भक्तिर्गम्यते॥भक्त्याचविनाकथमाशयःशुद्ध्येदिति॥२३॥किंचाभक्तिःस्वाश्रयंशोधयतीतिकिं

नसाधयतिमांयोगोनसांख्यंधर्मउद्धव॥नस्वाध्यायस्तपस्त्यागोयथाभक्तिर्ममोर्जिता॥२०॥
भक्त्याहमेकयाग्राह्यःश्रद्धयात्माप्रियःसतां॥भक्तिःपुनातिमन्निष्ठाश्वपाकानपिसंभवात्
२१॥धर्मःसत्यदयोपेतोविद्यावातपसान्विता॥मद्भक्त्यापेतमात्मानंनसम्यक्प्रपुनातिहि॥२२॥
कथंविनारोमहर्षंद्रवताचेतसाविना॥विनानंदाश्रुकलयाशुद्ध्येद्भक्त्याविनाशयः॥२३॥वा
गाद्गदाद्रवतेयस्यचित्तंरुदत्यभीक्ष्णंहसतिक्वचिच्च॥विलज्जउद्गायतिनृत्यतेचमद्भक्ति
युक्तोभुवनंपुनाति॥२४॥यथाग्निनाहेममलंजहातिध्मातंपुनःस्वंभजतेचरूपं॥आत्माच
कर्मानुशयंविधूयमद्भक्तियोगेनभजत्यथोमां॥२५॥

वक्तव्यंयतोद्रुतवागादिलक्षणोम
द्भक्तियुक्तोलोकंसर्वंपुनातीत्याह॥वागिति॥२४॥अपिच॥भक्त्यैवात्मशुद्धिर्नान्यतइ
तिसदृष्टांतमाह॥यथेति॥यथाग्निनाध्मातंतापितमेववसुवर्णंअंतर्मलंजहाति॥नक्षा
लनादिभिः॥स्वांनिजंरूपंचभजेत॥कर्मानुशयंकर्मवासनांमांभजते॥मद्रूपतामापद्यते२५॥

ममापिसएवप्रेयइत्याह। नतथेतिद्वाभ्यां॥ आत्मयोनिःब्रह्मापुत्रोपि शंकरःमत्स्वरूपभूतोपि। संकर्षणःभ्रा
तापि। श्रीर्भार्यापि। आत्मामूर्त्तिरपि। यथाभक्तइतिवक्ष्येतिरूपेणाद्भवानिति॥१५॥ पूयेयमदनुवर्त्ती
ब्रह्मांडानिपवित्रीकुर्यामितिभावेनेत्यर्थः॥१६॥ किंच॥ मद्भक्तानांसुखंएतावदेवभूतमितिवाकोवक्तुं
समर्थः॥ यतस्तत्सुखंसंवेद्यनिरूपममित्याह निःकिंचनाइतिमह्यातःनिरहंमानाः॥ अनालब्धधियःअ
स्पृष्टचित्ताः निःकिंचनत्वादीनांयथोत्तरहेतुहेतुमद्भावः॥ एवंभूताममामदीयाःयत्सुखंजुषंतिसेवंते
तत्सुखंतएवविदुः नान्ये कुतः नैरपेक्ष्यंनास्तिअपेक्षाणीयेषांतेनिरपेक्षाः नैरवलम्भ्यान तुमोक्षापेक्ष

न तथा मे प्रियतम आत्मयोनिर्न शंकरः॥ न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान्॥१५॥ निरपेक्षं मुनिं
शान्तं निर्वैरं समदर्शिनं॥ अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः॥१६॥ निष्किंचना मय्यनुरक्तचेत
सः शान्ता महान्तोऽखिलजीववत्सलाः॥ कामैरनालब्धधियो जुषन्ति यत्तन्नैरपेक्ष्यं न विदुः सुखं मम॥१७॥
बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः॥ प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते॥१८॥ यथाग्निः सु
समिद्धार्चिः करोत्येधांसि भस्मसात्॥ तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः॥१९॥

रपीत्यर्थः। यद्वा एवंभू
ताःसंतोयेममममामित्यर्थः जुषन्ते प्रीणंति। तएवयन्नैरपेक्ष्यंसुखंतद्विदुर्नान्यइत्यन्वयः॥१७॥ अपिचाभ्र
स्तांतावदुत्तमभक्तकथा। यतःप्राकृतोपिभक्तःकृतार्थएवेत्याह। बाध्यमानइतिद्वाभ्यां॥ विषयैराकृ
ष्यमाणोपिप्रगल्भयासमर्थया॥१८॥ पाकाद्यर्थंप्रज्वालितोप्यग्निःयथाकाष्ठानिभस्मीकरोति।तथा
रागादिनापिकथंचिन्मद्विषयासतीभक्तिःसमस्तपापानीति। भगवानपिस्वभक्तिमहिमाश्चर्येणसं
बोधयति॥ अहोउद्धवविस्मयंशृण्विति॥१९॥ ॥ ॥ ॥

मां चिंतयेदित्युक्तं तत्प्रकारं पृच्छति । यथेति । ध्यानांगप्रश्नः । यादृशमिति ध्येयविशेषणप्रश्नः । यदात्मकमिति ध्येयस्यै तानि विशेषणानि तत्स्वरूपप्रश्नः । एतन्मे ध्यानमेव वक्तुमर्हसीति पाठः ॥ तत्रायमर्थः । मुमुक्षुस्त्वां यथा ध्यायेत्तन्मे वक्तुमर्हसीति जिज्ञासोः कथनाय मे पुनरेतत्त्वदास्यमेव पुरुषार्थः ननु ध्यानेन कृतमस्तीति । तदुक्तं । त्वयोपयुक्तस्रग्गंधवस्त्रादि । त्वं वक्तुमर्हसीति पाठस्तु सुगमः ॥ ३१ तत्र ध्यानांगत्वेनासनप्राणायामप्रकारमाह समइति चतुर्भिः । समे नात्युच्छ्रिते नातिनीचे । आसने कुचैलादौ । समकायः सन्यथासुखमासीन इति । नास्ति स्वस्तिकादिनियम इत्युक्तं । नासाग्रनिरीक्षणं च चित्तस्थैर्याय । अतएव हस्तावुत्संगे । स्थिरचित्तः सुसंयत इति योगशास्त्रोक्तः ॥ ३२ विपर्ययेण रेचकपूरककुंभकक्रमेणापि । यद्वा वामनाड्या पूरि

उद्धव उवाच ॥ यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ॥ ध्यायेन्मुमुक्षुरेतन्मे ध्यानमेव वक्तुमर्हसि ३१

श्रीभगवानुवाच ॥ सम आसन आसीनः समकायो यथासुखं ॥ हस्तावुत्संग आधाय स्वनासाग्रकृतेक्षणः ॥ ३२ ॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ विपर्ययेणापि शनैरभ्यसेन्निर्जितेंद्रियः ॥ ३३ ॥ हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत् ॥ प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरं ॥ ३४ ॥

तं दक्षिणया त्यजेत् । तया वा पूरितं वामयेत्येवं विपर्ययेण । यथोक्तं योगे । इडया पूरयेद्वायुं त्यजेत्पिंगलयात इति । निर्जितेंद्रिय इति प्रत्याहार उक्तः ॥ ३३ ॥ प्राणायामो द्विविधः ॥ सगर्भोऽगर्भश्चेति । तत्र श्रेष्ठत्वात्सगर्भमाह । हृदीति द्वाभ्यां ॥ मूलाधारादारभ्य अविच्छिन्नं संततं घंटानादतुल्यमोंकारं हृदि संतं प्राणेनोदीर्य ऊर्ध्वं द्वादशांतपर्यंतं नीत्वा कथं बिसोर्णावत् । कमलनालतंतुवत् । तत्र मात्रानीते स्वरं पंचदश बिंदुं संवेशयेत् । अथ पुनरित्यस्य तं च बिंदुं शिरस्कं कुर्यादित्यर्थः ॥ यद्वा मूलाधारादारभ्य मूर्धांतपर्यंतं बिसतंतुवत्सूक्ष्ममविच्छिन्नं संततं हृदि मनसि ॥ प्राणेनोदीर्याभिव्यज्य अथ पुनस्तत्रोंकारे घंटानादतुल्यं स्वरं उदात्तं नादं स्थिरीकुर्यादिति ॥ ३४ ॥ ॥

66

66

राम
६६

न च ब्रह्मविदाप्नोति परं॥ तमेव विदित्वातिमृत्युमेतीत्यादि श्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्या त्वत्प्राप्तिरवगम्यते· कुतो भक्तियोगेनेत्युच्यते· तत्राह· यथायथेति। आत्मा चित्तं परिमृज्यते शोध्यते। मत्पुण्यकथानां श्रवणैरभिधानैश्च। भक्तेरेवावान्तरव्यापारो ज्ञानं न पृथगित्यर्थः॥२६॥ किं च। ज्ञानं नाम चित्तस्य मदाकारपरिणामः। स च मां भजतः स्वभावत एव भवति॥ न च यत्नान्तरमपेक्षत इति सदृष्टान्तमाह। विषयानिति॥२७

यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः। तथा तथा पश्यति तत्त्ववस्तु सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं॥२६॥ विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते। मामनुस्मरतश्चित्तं मय्येव प्रविलीयते॥२७॥ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं। हित्वा मयि समाधत्स्व मनो मद्भावभावितं॥२८॥ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान्। क्षेमे विविक्त आसीनः चिंतयेन्मामतंद्रितः॥२९॥ न तथास्य भवेत्क्लेशो वंधश्चान्यप्रसंगतः। योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः॥३०॥

यस्मादन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्धित्वा मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति तस्मादिति· मद्भावभावितं· मद्भावेन मद्भजनेनैव शोधितं॥२८॥ विशेषतो वात्स्यायनाद्युक्तकाममार्गाः परित्याज्या इत्याह॥ स्त्रीणामिति। आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने॥२९॥ एतदुपपादयति न तथेति। अस्य पुंसः यथा तत्संगिसंगतः क्लेशो भवेत्॥ यथा च वंधो योषित्संगतः॥ तथान्यप्रसंगतो न भवेदिति॥३०॥

द्युमद्भिः किरीटादिभिः आसमंतात् युतं अलंकृतं ४० प्रसादेन शोभनं सुखमीक्षणं च यस्मिन् त
त् सुकुमारं अतिकोमलं ४१ सविशेषणां ध्यानमुपसंहरति ॥ इंद्रियाणीति । प्रकर्षेणानये
त् सर्वतः सर्वांगयुक्ते ४२ यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्यो

नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतं द्युमत्किरीटकटककटिसूत्रांगदायुतं ४० स
र्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत् ४१ इंद्रि
याणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ४२ त
त्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं ४३
तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् ४४

ततः शनैर्विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह तदिति त्रिभिः ॥ एकत्रांगे अ
न्यान्यंगानि न चिंतयेत् ॥ एकत्रेति यदुक्तं तदेवांगं दर्शयति सुस्मितमिति ४३ व्योम्नि स
र्वकारणरूपे । तच्च कारणत्वमपि त्यक्त्वा मदारोहः मयि शुद्धे ब्रह्मणि रूढः सन् न किंचिद्ध्या
तृध्येयविभागमपि न चिंतयेत् ४४

मासाद्वर्षात् जितानिलो भवति ॥ ३५ ॥ एवं ध्यानांगमुक्त्वा याद्दशमित्यस्योत्तरं वक्तुं ध्येयपीठमाह । हृत्पुंडरीकमिति सार्द्धेन । अन्तस्थं देहान्तर्वर्त्ति ऊर्द्धनालमधोमुखंमुकुलितंच । कदलीपुष्पसंकाशं यदास्ति तद्धि परीतं ध्यात्वेत्यर्थः ॥ न्यसेन्नचिंतयेत् ॥ ३६ ॥ सविशेषणं ध्यानमाह । वाह्निमध्यइ

एवं प्रणवसंयुक्तं प्राणमेवसमभ्यसेत् ॥ दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः ॥ ३५ ॥ हृत्पुंडरीकमंतस्थमूर्द्धनालमधोमुखं ॥ ध्यात्वोर्द्ध्वमुखमुन्निद्रमष्टपत्रंसकर्णिकं ॥ कर्णिकायांन्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं ॥ ३६ ॥ वह्निमध्येस्मरेद्रूपंममैतद्ध्यानमंगलं ॥ समंप्रशांतंसुमुखंदीर्घचारुचतुर्भुजं ॥ ३७ ॥ सुचारुसुंदरग्रीवंसुकपोलंशुचिस्मितं ॥ समानकर्णविन्यस्तस्फुरन्मकरकुंडलं ॥ ३८ ॥ हेमांबरंघनश्यामंश्रीवत्सश्रीनिकेतनं शंखचक्रगदापद्मवनमालाविभूषितं ॥ ३९ ॥

त्रिषड्भिः । ध्यानमंगलं ध्यानस्य शुभं विषयं । समं अनुरूपावयवं । दीर्घाश्चारवश्चत्वारो भुजा यस्मिन्तत् ॥ ३७ ॥ सुचारु हासं अतिरम्यं । समानयोः कर्णयोर्विन्यस्ते स्फुरन्ती मकराकारे कुंडले यस्मिन्तत् ॥ ३८ ॥ श्रीवत्सश्रियोर्निकेतनं । वक्षसि दक्षिणवामतस्ताभ्यां युक्तमित्यर्थः ॥ ३९ ॥ क्रमारा

ष्विदिति वितर्के का स्वित् किंनाम्नी ॥ कथं स्वित् कीदृशी वा धारणाश्च कतीति प्रश्नांतरे वा शब्दः । त्वमेवैतज्जाना सिनान्य इत्याशयेनाह योगिनामिति ॥ २ धारणाश्च अष्टादशोत्पन्नप्रसंगः ॥ योगपारगैरिति त्रिकालज्ञत्वा दिनुद्रसिद्धीरन्येपि जानंतीति भावः ॥ अष्टमेव प्रधानं मुख्याः स्वभावत आश्रयो यासां ताः ॥ मत्सारू प्यप्राप्तेषु किं विघ्नरूपा न भवंतीति भावः ॥ गुणहेतवः सत्वोत्कर्षहेतुकाः ॥ ३ ॥ ताः स्वरूपेणोपदिशति ।

उद्धव उवाच ॥ कया धारणया कास्वित्कथं स्वित्सिद्धिरच्युत ॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् ॥ २ ॥ श्रीभगवानुवाच ॥ सिद्धयोष्टादश प्रोक्ता धारणायोगपारगैः ॥ तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥ ३ ॥ अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः ॥ प्राकाश्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ ४ ॥ गुणेष्वसंगो वशिता यत्कामस्तदवस्यति ॥ एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः ॥ ५ ॥

अणिमेति सार्द्धैः पंचभिः । अणिमा महिमा लघिमा च मूर्तेर्देहस्यैतिस्रः सिद्धयः प्राप्तिर्नाम सिद्धिः सर्वप्राणिनामिंद्रियैः सह तत्तदधिष्ठातदेवतारूपेण संबंध इत्यर्थः ॥ श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि शकाश्यं भोगदर्शनसामर्थ्यं सिद्धिः ॥ शक्तीर्नाम मायातदंशभूतानां प्रेरणं तत्रेश्वरे मायायाः अन्येष्वतद्दंशानां प्रेरणं ईशिता नाम सिद्धिः ॥ ४ ॥ विषयभोगेष्वसंगो वशिता सिद्धिः ॥ यत्कामः यद्यत्सुखं कामयते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोतीति सिद्धिः ॥ औत्पत्तिकाः स्वाभाविका निरति

68

राम ६८

मामेवात्मनिविचक्षे। आत्मानंचसर्वात्मनिमयिसंयुतंविचक्षे। ज्योतिर्ज्योतिषिसंयुक्तमिवे
त्यन्वयः॥४५॥ एवंभूतसमाधिपर्यंतध्यानस्यफलमाह। ध्यानेनेति। मनोयुंजतःसमादधतः
द्रव्यज्ञानक्रियाभ्रमः॥ अधिभूताधिदैवाध्यात्मरूपः॥ दृश्यपदार्थदर्शनरूपोवाभ्रमः॥ निर्वाणं

नमा१ एवंसमाहितमतिर्मामेवात्मानमात्मनि॥ विचष्टेमयिसर्वात्मन्ज्योतिर्ज्योतिषिसंयुतं॥४५॥
ध्यानेनेत्थंसुतीव्रेणयुंजतोयोगिनोमनः॥ संयास्यत्याशुनिर्वाणंद्रव्यज्ञानक्रियाभ्रम
॥४६॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेचतुर्दशोध्यायः॥ श्रीभ
गवानुवाच॥ जितेंद्रियस्ययुक्तस्यजितश्वासस्ययोगिनः॥ मयिधारयतश्चेतउपतिष्ठंति
सिद्धयः॥१॥

शांतिंसम्यग्प्राप्स्यतीति॥ इत्येकादशेचतुर्दशः॥ ततःपंचदशेप्रोक्ताःसिद्धयोधारणानुगाः॥ श्रीवि
ष्णुपदसंप्राप्त्यावनंतरायतयामताः॥ एवंमनोयुंजतोयोगिनोनंतराविर्भवंत्यःसिद्धयोप्यंतराय
प्रायाएव॥ अतस्ताःपरित्यज्यपरमेश्वरपरएवभवेदितिवक्तुंसिद्धीराह। जितेंद्रियस्येति
युक्तस्यस्थिरचित्तस्य॥१॥

ज्ञानशक्तिमहत्तत्वोपाधौमयियथासंख्यंमहत्तत्वाकाशंभूतानांचेति॥ आकाशादिभूतोपाधौचमयि
मनोधारयन्ननन्तद्भूतमहिमानंप्राप्नोतीत्यर्थः॥११॥ वाय्वादिभूतानांयेपरमाणवःतन्मयेतदुपाधौ
चित्तंमयिरंजयन्योगीकालसूक्ष्मार्थतांकालपरमाणूपाधिरूपतामितिलघुत्वंविवराणांत
दुक्तं।सकालःपरमाणुर्वैयोभुंक्तेपरमाणुतामिति॥१२॥ वैकारिकाहंकारोपाधौमयि।अखि

महत्यात्मनिमयिपरेयथासंख्यंमनोदधत्॥ महिमानमवाप्नोतिभूतानांचपृथक्पृथक्॥११॥
परमाणुमयेचित्तंभूतानांमयिरंजयन्॥ कालसूक्ष्मार्थतांयोगीलघिमानमवाप्नुयात्॥१२॥ धा
रयन्मय्यहंतत्वेमनोवैकारिकेऽखिलं॥ सर्वेंद्रियाणामात्मत्वंप्राप्तिंप्राप्नोतिमन्मनाः॥१३॥
महत्यात्मनियःसूत्रेधारयेन्मयिमानसं॥ प्राकाम्यंपारमेष्ठ्यंमेविंदतेव्यक्तजन्मनः॥१४॥

69

त्वेणकाग्रं।आत्मत्वंअधिष्ठातृत्वं॥ अत्रहेतुः॥मन्मनाःमयिमनोधारणाप्रभावादेवभवति॥
नात्रातीवहेतुरनुसंधेयइतिभावः॥ एवंमद्धारणानुभावेनमद्योगवलमाश्रयद्भुत्यादिषुउद्ध
वं॥१३॥ क्रियाशक्तिप्रधानंमहत्तत्वमेवसूत्रंतदुपाधौमयियःसःमेपारमेष्ठ्यंसर्वोत्कृष्टंप्राका
म्यंविंदते।कथंभूतस्यअव्यक्ताजन्मयस्यतस्यसूत्रस्यतदुपाधेर्ममेत्यर्थः॥१४॥ रामराम

गुणहेतवः सिद्धीराह अनूर्मिमत्त्वं क्षुत्पिपासादिराहित्यं। दूरे श्रवणं दर्शनं चेति द्वे सिद्धी मनोवेगो
न देहस्य गतिः॥ कामितरूपप्राप्तिः। परकायेप्रवेशः॥६॥ स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्री-
डास्तासामनुदर्शनं प्राप्तिः॥ संकल्पानुरूपप्राप्तिः अप्रतिहताज्ञा समंताद्गतिर्यस्याः साज्ञा

अनूर्मिमत्त्वं देहेस्मिन् दूरश्रवणदर्शनं॥ मनोजवः कामरूपं परकायप्रवेशनं॥६॥ स्वच्छन्द-
मृत्युर्देवानां सहक्रीडानुदर्शनं॥ यथासंकल्पसंसिद्धिराज्ञाप्रतिहतागतिः॥७॥ त्रिकालज्ञ-
त्वमद्वंद्वं परचित्ताद्यभिज्ञता॥ अग्न्यर्काम्बुविषादीनां प्रतिष्टंभोपराजयः॥८॥ एताश्चोद्दे-
शतः प्रोक्ता योगधारणसिद्धयः॥ यया धारणया या स्याद्यथा वा स्यान्निबोध मे॥९॥ भूतसूक्ष्मा-
त्मनि मयि तन्मात्रं धारयन्मनः॥ अणिमानमवाप्नोति तन्मात्रोपासको मम॥१०॥

चेत्येनादश॥७॥ तदुक्तसिद्धीः स्वयं चाह त्रिकालज्ञत्वमिति। अद्वंद्वं शीतोष्णाद्यनभिभवः॥ अग्न्या-
दीनां स्तंभनं॥८॥ तत्तद्धारणाभिः सह विशेषतो निरूपयति ययेति यावत्समाप्ति॥९॥ भूतसूक्ष्मो-
पाधौ मयि तन्मात्रं भूतसूक्ष्माकारं उपास्तेयः सः तन्मात्रोपासकः। मम मदीयम् अणिमानं॥१०॥

आकाशात्मा यः प्राणः समष्टिरूपस्तद्रूपे मयि मनसा घोषं नादं चिंतयन्। असौ हंसो जीवः तत्र आका-शे उपलब्धा ज्ञाता सन् तत्रस्थाः विचित्रा वाचः शृणोतीति यद्वा। तत्राकाशे उपलब्धा अभिव्यक्ता याः भूतानां वाचस्ता दूरतः शृणोतीति॥१९॥ त्वष्टा आदित्यः तस्मिन्नपरिच्छिन्ने चक्षुः संयोज्य तं च चा-क्षुषि संयोज्य तत्रोभयसंयोगे मां ध्यायन् विश्वं दूरतः पश्यति॥२०॥ मनः देहं च तदनुवर्त्तिना

मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन्। तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ॥१९॥ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि। मां तत्र मनसा ध्यायन्विश्वं पश्यति सूक्ष्मदृक्॥२०॥ मनो मयि सुसंयोज्य देहं तदनुवायुना। मद्धारणानुभावेन तत्रात्मा यत्र वै मनः॥२१॥ यदा मन उपादाय यद्यद्रूपं बुभूषति। तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रयः॥२२॥ राम

वायुना सह मयि सुसंयोज्य या मद्धारणा क्रियते तस्याः प्रभावेन यत्र मनो याति तत्रात्मा देहो याती-त्यर्थः। यद्वा। मनः कर्तृ आत्मानं वायुना सह देहं च मयि सुसंयोज्य यत्र याति तदनु तत्र देहो या-तीति॥२१॥ मनः उपादाय उपादानकारणं कृत्वा। यद्यद्देवादिरूपं भवितुमिच्छति। तत्तन्मनोरू-पं मनसोऽभीष्टं योगी भवेत्॥ कुतः॥ मद्योगबलं योऽहमचिन्त्यशक्तिर्नानाकारः तस्मिन्मयि मनसो योगो धारणा तस्य बलं प्रभावः स एवाश्रयः कारणं॥२२॥ ॥

अधीश्वरे त्रिगुणमायानियंतरि॥ अत एव कालविग्रहे आकलयितृरूपे अन्तर्यामिणि॥ ईशित्वं
विशिनष्टि। क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां च चोदनां प्रेरणां न तु विश्वसृष्ट्यादिकर्तृत्व
लक्षणमित्यर्थः॥१५॥ तुरीयाख्ये। विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः॥ ईशस्य यत्त्रिभिर्हीनं

विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे॥ स ईशित्वमवाप्नोति क्षेत्रज्ञक्षेत्रचोदनाम्॥१५॥
नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते॥ मनो मय्यादधद्योगी मद्धर्म्मा वशितामियात्॥१६॥
निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः॥ परमानंदमाप्नोति यत्र कामो वसीयते॥१७॥ श्वेत
द्वीपपतौ चित्तं शुद्धे धर्म्ममये मयि॥ धारयन्श्वेततां याति षडूर्म्मिरहितो नरः॥१८॥ राम

तुरीयं तत्पदं विदुरित्येवं लक्षणे॥ ऐश्वर्यस्य समग्रस्य धर्म्मस्य यशसः श्रियः॥ ज्ञानवैराग्ययोश्चैव
षण्णां भग इतीङ्गना॥ तद्वति भगवच्छब्दशब्दिते षड्विधैश्वर्यसंपन्ने॥१७॥ यत्र परमानन्दरूपे स
र्वोपि कामस्तदंशभूतो वसीयते समाप्यते तेन॥ अतः परं गुणहेतुकाः सिद्धीराह॥ शुद्धे सत्वात्मके॥ श्वेततां शुद्धरूपतां

भा०ए०
७१

अतःपरंक्षुद्राः। धारणाविदइति त्रिकालेश्वरधारणासूचिता। त्रैकालिकी त्रिकालवस्तुविषयाख
जन्ममृत्युव्याप्युपबृंहितातत्सहितातत्सहिता· अनयैवपरचित्ताद्यभिज्ञतापिव्याख्याता॥२८॥ अग्न्या
दिसर्वोपद्यानम्यस्योभगवानित्येवंभूतयोगमयं॥ तेनोभिभूयेतः तत्रहेतुः। मद्योगेति। यादसा
मुदकंयथाभिघातकंनभवति· तथातस्यवपुषोग्न्यादयइत्यर्थः॥ अनयैवाहद्भुतापिव्याख्याता

मत्संगशुद्धसत्वस्ययोगिनोधारणाविदः॥तस्यत्रैकालिकीबुद्धिर्जन्ममृत्यूपबृंहिता॥२८॥
अग्न्यादिभिर्नहन्येतमुनेर्योगमयंवपुः॥मद्योगशांतचित्तस्ययादसामुदकंयथा॥२९॥म
द्विभूतीरभिध्यायंश्रीवत्सास्त्रविभूषिताः॥ध्वजातपत्रव्यजनैःसभवेदपराजितः॥३०॥
उपासकस्यमामेवंयोगधारणयामुनेः॥सिद्धयःपूर्वकथिताःउपतिष्ठंत्यशेषतः॥३१॥
जितेंद्रियस्यदांतस्यजितश्वासात्मनोमुनेः॥मद्धारणांधारयतःकासासिद्धिःसुदुर्लभा॥३२॥
अंतरायान्वदंत्येतायुंजतोयोगमुत्तमं॥मयासंपद्यमानस्यकालक्षपणहेतवः॥३३॥

२९॥मद्विभूतीःममावतारान्ध्वजादिभिःसह॥३०॥उपसंहरति। उपासकस्येति एवंपृथग्धा
रणाभिः॥३१॥यद्वा॥किंनानाधारणाप्रयासेनएकयैवसर्वाःसिद्धयोभवंतीत्याह। जितेंद्रि
यस्येति। मद्धारणांनारायणेतुरीयाख्यइत्यत्रोक्तां·यासुदुर्लभास्यात्साकानकाचिदि
त्यर्थः॥३२॥यद्यप्येवंनप्रार्थ्याइत्याह। अंतरायानिति॥३३॥ ॥ ॥

राम
७१

यत्रप्रविविक्षतितत्रात्मानंचिंतयेत्।ततःपिंडंस्वदेहंहित्वाप्राणःप्रधानलिंगशरीरोपाधिःवायुभू
तः।बाह्यवायोर्भूतःप्रविशेत्॥तेनमार्गेणेत्यर्थः।षडंघ्रिवत्।भृंगोयथापुष्पात्पुष्पांतरमनायासेन
प्रविशतितद्वत्॥२३॥पिंडंहित्वेत्युक्तंतस्यप्रकारंकथयन्स्वच्छंदमृत्युमाह।पार्ष्ण्यापार्ष्णिनागुदंनिरु
ध्य।प्राणंप्राणोपाधिमात्मानंब्रह्मरंध्रेणमूर्द्धद्वारेण।।ब्रह्मेत्युपलक्षणंब्रह्मवान्यद्वा।।अपेक्षितं।

परकायंविशन्सिद्धआत्मानंतत्रभावयेत्॥पिंडंहित्वाविशेत्प्राणोवायुभूतःषडंघ्रिवत्॥२३॥
पार्ष्ण्यापीड्यगुदंप्राणंहृदुरःकंठमूर्द्धसु॥आरोप्यब्रह्मरंध्रेणब्रह्मनीत्वोत्सृजेत्तनुं॥२४॥
विहरिष्यन्सुराक्रीडेमत्स्थंसत्त्वंविभावयेत्॥विमानेनोपतिष्ठंतिसत्त्ववृत्तीःसुरस्त्रियः॥२५॥
यथासंकल्पयेद्बुद्ध्यायदावामत्परःपुमान्॥मयिसत्येमनोयुंजंस्तथातत्समुपाश्नुते॥२६॥
योवैमद्भावमापन्नईशितुर्वशितुःपुमान्॥नकुतश्चिद्विहन्येततस्यचाज्ञायथामम॥२७॥

स्थानंमनसानीत्वा॥२४॥मत्स्थंमन्मूर्त्तिरूपंशुद्धंसत्त्वंचिंतयेत्।तदासत्त्ववृत्तयःसत्त्वां
शभूताः॥२५॥यदावाअकालेपि।यथावेतिपाठेयथावायेनकेनापिप्रकारेणबुद्ध्यासंक
ल्पयेत्।तत्तथा।।यथावत्प्राप्नोतीत्यर्थः॥यद्वा।यथावामत्परःमयिविश्वासवान्भवति।त
थातदनुरूपंसर्वंप्राप्नोतीत्यर्थः॥किंकुर्वन्।सत्येसत्यसंकल्पेमयिमनोयुंजन्॥२६॥मदिति
पृथक्पदंममेत्यर्थः।।ईशितुःसर्वनियंतुःविशितुःस्वतंत्रस्य।ममभावंस्वभावंप्राप्तःएतागुणहेतु
॥२

षोडशेनुद्धवेशाविर्भावसूक्ता विभूतयः॥ ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः॥ अतश्चित्तेनयद्धा
नमशक्यमशक्तात्मनां॥ अतस्तद्योग्यतापञ्चविभूत्यादिनिरूपणं। एवंतावन्नवाध्यायाःसम्प्र
श्नानिरूपिताः॥ वर्णसत्त्वसंभवेनावस्तप्रमादिचतुष्टये। वर्णधर्मश्चाश्रमनिर्द्धारेसङ्गत्याश्च
न्ततःपरे। द्वादशेनंतरेकर्मज्ञकृतित्यागव्यवस्थितौ॥ इसतिहासतोयोगानिशायांचत्रयोदशे॥
श्रेयःसाधननिर्द्धारेध्यानेचैवचतुर्दशे॥ धारणासिद्धिभेदेचप्रसंगेननिरंतरे। उद्धवप्रश्न-
तोद्दत्तमुत्तरंहरिणोदितं। षोडशेभगवद्विस्तारेद्वयोर्वर्णाश्रमव्रते॥ ज्ञानादिनिर्णयेवाताय
मादीनांचनिर्णयेयोगत्रयाधिकारेनु विंशेचनदनंतरे। तत्त्वसंख्याविवादेचपुंप्रकृत्योर्विवेच
ने। जन्ममृत्युप्रकारेचद्वाविंशदनंतरे। परापराधसहनेचत्रयोविंशतदनंतरे। सप्तविंशक्रिया

उद्धवउवाच॥ त्वंब्रह्मपरमंसाक्षादनाद्यंतमपावृतं॥ सर्वेषामपिभावानांत्राणस्थित्यप्ययोद्भवः॥
योगप्रश्नेनदुपवर्णनं। अष्टाविंशेततःप्रोक्तानयोगोपसंहृतिः॥ संसारासंभवप्रश्नेत
न्मध्येदनंतमुत्तरं। तदशन्यापुनःप्रश्नेभक्तियोगोपसंहृतिः॥ एवंप्रश्नोत्तराण्यत्रक्रमेणेना
निविंशतिः॥ अहमात्मान्तरोबाह्योनावृतःसर्वदेहिनां। यथाभूतानिभूतेषुबहिरंतःस्व
यंतथेत्युक्तं॥ तत्रभूतानियथाक्वचित्केनचिद्गुणविशेषेणोद्रिक्तानिवर्त्तंते। क्वचित्सामा
न्यरूपेणैव। तथात्वमपिकथंवर्त्तसइतिविभूतीःप्रष्टुंप्रथमंतावदुक्तमेवसर्वात्मकत्व
मनूवदति। त्वंब्रह्मेति॥ अपावृतंनिरावरणंस्वतंत्रंवा॥ अतएवसर्वेषामपित्राणंरक्षणंस्थि
तिर्जीवनंत्राणस्थितिसहितौअप्ययोद्भवौयस्मात्त्॥ सत्वंउपादानकारणमित्यर्थः॥ १॥ राम।

72

तस्मादहैतुकीयमेवधारणाकार्या॥ नान्याः काम्याइत्याह॥ जन्मेति। जन्मनैवकाश्चित्सिद्धयो भवं
ति। यथादेवानां। यथाचयादसामुदकस्तंभः पक्ष्यादीनांखेचरत्वादि॥ नदुक्तंपातंजले॥ ज
न्मौषधितपोमंत्रयोगजाः सिद्धयइति। योगेनमद्धारणमित्युक्तेन। योगगतिंमत्सालोक्या-
दिरूपां॥ ३४॥ तत्कुतइत्याह सर्वासामित्यर्द्धेन॥ प्रभुत्वोपपादनं। हेतुःकारणं। पतिः पालयितान्वे

जन्मौषधितपोमंत्रैर्यावतीरिहसिद्धयः॥ योगेनाप्नोतिताः सर्वा नान्यैर्योगगतिंव्रजेत्॥ ३४॥
सर्वासामपिसिद्धीनांहेतुःपतिरहंप्रभुः॥ अहंयोगस्यसांख्यस्यधर्मस्यब्रह्मवादिनां॥ ३५॥
अहमात्मांतरोबाह्योनावृतः सर्वदेहिनां॥ यथाभूतानिभूतेषुबहिरंतः स्वयंतथा॥ ३६॥ इ
तिश्रीभागवतेमहापुराणएकादशस्कंधेभगवदुद्धवसंवादेपंचदशोध्यायः॥ १५॥ राम

नि· किंच· नकेवलंसिद्धीनामेवप्रभुः॥ अपितुमोक्षादीनामपीत्याह॥ अहमिति। योगोमो
क्षः सांख्यंतत्साधनंज्ञानंधर्मस्यतदुपदेष्टृणांब्रह्मवादिनांच॥ ३५॥ कुतस्तत्राह॥ अह
मिति। सर्वदेहिनांजीवानामात्मायतः॥ आंतरः अन्तर्यामी। एषतआत्मांतर्याम्यमृत इतिश्रु
तेः। तर्हिकिंमंतर्वर्तित्वात्परिच्छिन्नः॥ नबाह्यश्चव्यापकइत्यर्थः तत्रहेतुः अनावृतः एतत्सदृ
ष्टांतमाह। भूतेषुचतुर्विधेषुमहाभूतानियथाबहिरंतश्चभवंति। स्वयंअहमपितथेत्यर्थः॥ ३६॥
एकादशेपंचदशः॥ १५॥

युयुत्सोर्द्विभनिष्प्रक्लेकः प्रसंगः। तत्राह। ज्ञात्वेति। लौकिकः प्राकृतमतिः॥७॥ स चयदा तनोज्ञाति वधाति
वृत्तः। तदा मया प्रतिबोधितः सन् यथा त्वमभिभाषसे एवं संग्रामस्तु रवे मामभ्यभाषत। तदृदेवतत्वा-
पि कथयिष्यामीति भावः॥८॥ ता विभूतीः कथयति अहमिति। अस्मच्छब्दसमानाधिकरणाः प्रथमान्ता द्वि-
तीयान्ताश्च सर्वा विभूतयः ताश्चोपासनार्थं कथ्यन्ते। षष्ठी च क्वचित् निर्द्धारणे संबन्धे च क्वचिद्यथायोग्यं

ज्ञात्वा ज्ञातिवधं गत्वा मधर्मं राज्यहेतुकं॥ ततो निवृत्तोऽहं ताऽहं हतोऽयमिति लौकिकः॥७॥ स त
दा पुरुषव्याघ्रो युयुत्सामेव प्रतिबोधितः॥ अभ्यभाषत मामेवं यथा त्वं रणमूर्द्धनि॥८॥ अहमात्मो
द्धवामीषां भूतानां सुहृदीश्वरः॥ अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः॥९॥ अहं गतिर्गति
मतां कालः कलयतामहं॥ गुणानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः॥१०॥ गुणिनामप्य
हं सूत्रं महतां च महानहं॥ सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः॥११॥ हिरण्यगर्भो वे
दानां मंत्राणां प्रणवस्त्रिवृत्॥ अक्षराणामकारोऽस्मि पदानि छंदसामहं॥१२॥

३ख्या। तत
श्चामीषां भूतानां आत्मेति। सुहृदिति। ईश्वर इति च॥ सामान्येनाहं उपास्य इत्यर्थः। एवं सर्वत्रानि
षां स्थित्युद्भवाप्ययस्तत्तद्धेतुरित्यर्थः॥९॥ विशेषतो विभूतीराह। कलयतां वशीकुर्वतां मध्ये। गुणा
नां मध्ये॥ गुणिनि धर्मिणि। औत्पत्तिकः स्वाभाविको योगुणः सोऽहं॥१०॥ सूत्रं प्रथमकार्यं। महान्महत्
तत्वं। सूक्ष्मोपाधित्वाद्दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वं। बुद्धेर्गुणेनात्मगुणेन चैव माराग्रमात्रो
ह्यपरोऽपि दृष्ट इति श्रुतेः॥११॥ वेदानां संबंधी। तेषामध्यापकः॥ पदानि त्रिपदा गायत्रीत्यर्थः॥१२॥

73

अत्र सदाचारं प्रमाणमाह। याथातथ्येन यथार्थत्वेन सर्वकारणं त्वां ब्राह्मणा वेदतात्पर्यविदः ॥२॥ एवं कारणत्वेन सर्वात्मत्वमनन्तविभूतीः पश्यन्ति ये धीमन्ति। उपासीनाः सेवमानाः सन्तः ॥३॥ दुर्ज्ञेयत्वमेवाह। गूढः ॥ अस्फुटः ॥ भूतानां प्राणिनां मध्ये ॥ अत्र हेतुः ॥ भूतानामात्मा। अन्तर्यामी। तत्रा

उच्चावचेषु भूतेषु दुर्ज्ञेयमकृतात्मभिः ॥ उपासते त्वां भगवन्याथातथ्येन ब्राह्मणाः ॥२॥ येषु येषु च भावेषु भक्त्या त्वां परमर्षयः ॥ उपासीनाः प्रपद्यन्ते संसिद्धिं तद्वदस्व मे ॥३॥ गूढश्चरसि भूतात्मा भूतानां भूतभावन ॥ न त्वां पश्यन्ति भूतानि पश्यन्तं मोहितानि ते ॥४॥ याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महाविभूते ॥ तामह्यमाख्याह्यनुभावितास्ते नमामि ते तीर्थपदांघ्रिपद्मं। ५ ॥ श्रीभगवानुवाच ॥ एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर ॥ युयुत्सुना विनशने सपत्नैरर्जुनेन वै ॥६॥

पि हेतुः ॥ हे भूतभावनेति निन्दया ॥४॥ नाएव साकल्येन पश्यन्ति। हे महाविभूते। याः काश्चिद्भूम्यादिषु ते विभूतयः ॥ रसायां रसातले अनुभाविता। त्वयैव केनचित्कच्चित् विशेषेण संयोजिताः तीर्थानां पदांघ्रिपद्मं च ॥५॥ नरावतारभूतार्जुनप्रश्नसंवादित्वान्नवायं प्रश्नः साधीयानिति तावदनुमोदते। एवमिति त्रिभिः। प्रश्नं प्रश्नवं। सपत्नैर्योद्धुमिच्छता विनशने कुरुक्षेत्रे ॥६॥ रामराम

शुचीनां शोधकानामपि मार्जनतडागवर्षणादीनां मध्ये वाय्वादिरूपः शोधकोऽहं ॥ २३ ॥ योगानां योगाङ्गानां मध्ये नामध्ये आत्मसंरोधः समाधिरहं मंत्राणां नीतिः । कौशलानां विवेकादिनैपुणानां मध्ये [illegible] आन्वीक्षिकी आत्मानात्मविवेकविद्या ॥ अख्यात्यन्यथाख्यातिभ्रमप्रख्यात्यसत्त्वात्यनिर्वचनीयख्यातिवादिनां [illegible] एवमिदमेवं वेतियो दुरंतो विकल्पः सोऽहं ॥ २४ ॥ कुमारः सनत्कुमारः ॥ २५ ॥ संन्यासः भूताभयदानं क्षेमाणां [illegible] अभयत्वात्

यज्ञानां ब्रह्मयज्ञोऽहं व्रतानामविहिंसनं ॥ वाचयम अर्थं वा गात्मा शुचीनामप्यहं शुचिः ॥ २३ ॥ योगानामात्मसंरोधो मंत्रोऽस्मि विजिगीषतां ॥ आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां ॥ २४ ॥ स्त्रीणां तु शतरूपाहं पुंसां स्वायंभुवो मनुः ॥ नारायणो मुनीनां च कुमारो ब्रह्मचारिणां ॥ २५ ॥ धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः ॥ गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं ॥ संवत्सरोऽस्म्यनिमिषाणां ऋतूनां मधुमाधवौ ॥ २६ ॥ मासानां मार्गशीर्षोऽहं नक्षत्राणां तथाभिजित् ॥ २७ ॥ अहं युगानां च कृतं धीराणां देवलोऽसितः ॥ द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान् ॥ २८ ॥ वासुदेवो भगवतां त्वं तु भागवतेष्वहं ॥ किंपुरुषाणां हनुमान् विद्याध्राणां सुदर्शनः ॥ २९ ॥ रत्नानां पद्मरागोऽस्मि पद्मकोशः सुपेशसां ॥ कुशोऽस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहं ॥ ३० ॥

नानां मध्ये अबहिर्मतिः अंतर्निष्ठा ॥ सूनृतं प्रियवचनं मौनं च । न हि प्रियभाषणे मौने च पुरुषस्याभिप्रायो ज्ञायते । अजः प्रजापतिः यस्य देहाद्द्वौ अंशौ मिथुनमभूत् स एव मुख्यं मिथुनं । अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । अनिमिषाणामप्रमत्तानां मधुमाधवौ वसन्तऋतुः ॥ २६ ॥ अभिजित् उत्तराषाढाचतुर्थपादः । तथा च श्रुतिः । अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामवस्ताच्छ्रोणायाइत्यादि ॥ २७ ॥ कृतं । कृतयुगं । देवलः असितश्च व्यासानां वेदविभागकर्तॄणां कवीनां विदुषां । काव्यः शुक्रः ॥ २८ ॥ भगवतां उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवान् । इति पवित्रलक्षणानां ॥ २९ ॥ पेशसां दशानां दर्भजातीनां काशदूर्वादीनां

74

राम
७४

हविर्धानी कामधेनुः॥१४॥ नक्षत्रौषधीनां प्रभुं सोमं। यक्षरक्षसां प्रभुं। यादसां प्रभुं॥१६॥ नपतां नापवतां। द्युमतां
दीप्तिमतां च मध्ये॥१७॥ संयमतां दंडयतामित्यर्थः॥१८॥ प्रभुं गिरां दंष्ट्रिणां च मध्ये ते षांप्रभुत्वा तुर्यः स

इंद्रोहं सर्वदेवानां वसूनामस्मि हव्यवाट्॥ आदित्यानामहं विष्णू रुद्राणां नीललोहितः॥१३॥ ब्र
ह्मर्षीणां भृगुरहं राजर्षीणां महं मनुः॥ देवर्षीणां नारदोहं हविर्धान्यस्मि धेनुषु॥१४॥ सिद्धेश्वराणां क
पिलः सुपर्णोहं पतत्रिणां॥ प्रजापतीनां दक्षोहं पितृणामहमर्यमा॥१५॥ मां विष्णुं वदैत्यानां प्र
ह्लादमसुरेश्वरं॥ सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां॥१६॥ ऐरावतं गजेंद्राणां यादसां वरुणं प्र
भुं॥ नपतां द्युमतां सूर्यं मनुष्याणां च भूपतिं॥१७॥ उच्चैःश्रवास्तुरंगाणां धातून्नामस्मि कांचनं॥ य
मः संयमतां चाहं सर्पाणामस्मि वासुकिः॥१८॥ नागेंद्राणामनंतोहं मृगेंद्रः प्रंगिदंष्ट्रिणां॥ आ
श्रमाणामहं तुर्यो वर्णानां प्रमथो नच॥१९॥ तीर्थानां स्रोतसां गंगा समुद्रः सरसामहं॥ आयुधानां
धनुरहं त्रिपुरघ्नो धनुष्मतां॥२०॥ धिष्ण्यानामस्म्यहं मेरुर्गहनानां हिमालयः॥ वनस्पतीनामश्व
त्थ औषधीनामहं यवः॥२१॥ पुरोधसां वसिष्ठोहं ब्रह्मिष्ठानां बृहस्पतिः॥ स्कंदोहं सर्वसेनान्
न्यामग्रण्यां भगवानजः॥२२॥

न्यासः प्रथमःश्चाश्रमाणां॥१९॥ स्रोतसां प्रवहतां च सरसां स्थिरो
दकाशयानां॥२०॥ धिष्ण्यानां निवासस्थानानां गहनानां दुर्गमानां वेदार्थनिष्ठानां॥ सेनान्यां च भ
पतीनां॥ अग्रण्यां सन्मार्गप्रवर्त्तकानां अजः ब्रह्मा॥२२॥ ॥ ॥

तदेवं तत्तत्र निर्द्धारणेन तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वा अपि निरूपयति पृथिवी
ति। सार्द्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राण्यपि विवक्षितानि। अहं अहंकारः। महान्महत्तत्वं एताः सप्त प्र
कृतिविकृतयः। विकाराः पञ्चमहाभूतानि एकादशेन्द्रियाणि चेत्येवं षोडशसंख्याकः। पुरुषो जीवः। अव्यक्तं प्र
कृतिः एवं पञ्चविंशतितत्वानि। तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडश
कस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति। किंच। रजः सत्वं तम इति। प्रकृतेर्गुणाश्च। परं ब्रह्म च। त
देतत्सर्वमहमेव॥३७॥ किंच। एतस्य संख्यानं एतेषां लक्षणतो ज्ञानं च तत्फलं तत्वविनिश्चयश्चाहमेव। ए
तदेव संक्षिप्याह मयेति। जीव ईश्वररूपो द्विविधो यो भावः पदार्थः गुणेन गुणिरूपः। पदार्थस्तत्र तद्रूपः स स

पृथिवी वायुराकाशमापो ज्योतिरहं महान्॥ विकारः पुरुषोव्यक्तं रजः सत्वं तमः परं॥३७॥ अहमेतत्प्र
संख्यानं ज्ञानं तत्वविनिश्चयः॥ मयेश्वरेण जीवेन गुणेन गुणिना विना॥ सर्वात्मनापि सर्वेण न भावो वि
द्यते क्वचित्॥३८॥ संख्यानं परमाणूनां कालेन क्रियते मया॥ न तथा मे विभूतीनां सृजतोंडानि को
टिशः॥३९॥ तेजः श्रीः कीर्त्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः॥ वीर्यं तितिक्षा विज्ञानं यत्र यत्र समेंशकः॥४१॥

र्वोपि मया विना मद्व्यतिरेकेण नास्ति। अहमेव सर्वमित्यर्थः॥३८॥ ननु सामान्यतः किमेवं संक्षिप्य कथय
सि पूर्ववन्निर्द्धारणसंबंधाभ्यां विशेषतः सर्वाः कथयेति चेत्। तत्राह। संख्यानमिति। संख्यानं पृथिव्या
दिपरमाणूनां कालेन महता तदपि मयैव क्रियते। कृत्वा च वक्तुं शक्यते॥ तथा मे विभूतीनां संख्यानं क
र्तुं न शक्यते। कुत इत्यत आह सृजतोंडानीति। यदा मया सृज्यमानानां ब्रह्मांडानामेव तावत्संख्यानां
स्ति तदा कुतः तद्गतानां विभूतीनां संख्येत्यर्थः॥३९॥ तथापि विशेषत एव सर्वा अपि संक्षेपतः कथया
मीत्याह। तेजः प्रभावः श्रीः संपत्। सौभगं नयनाह्लादकत्वं भगो भाग्यं वीर्यं बलं। अंशकः विभूति॥४०

लक्ष्मीः धनादिसंपत् ॥ ३१ ॥ वल्लवानां ॐ अथ सदृश सात्वतां भागवतानां भक्त्या कृतं कर्म्माहमित्यर्थः । तेषामे
वनवव्यूहात्मनेवासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहवामनाइति
यानवमूर्त्तयस्तासामध्येवासुदेवाख्या ॥ ३२ ॥ गंधर्वाणां विश्वावसुः ॥ अप्सरसां पूर्वचित्तिः गंध

व्यवसायिनामहं लक्ष्मीः किन्नराणां कुलग्रहः ॥ तितिक्षास्मि तितिक्षूणां सत्त्वं सत्त्ववतामहं
॥ ३१ ॥ ॐ जनः सहोवल्लवानां कर्म्माहं विद्धि सात्वतां ॥ सात्वतां नवमूर्त्तीनामादिमूर्त्तिरहं परा
॥ ३२ ॥ विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहं ॥ भूधराणामहं स्थैर्यं गंधमान्नमहं भुवः ॥ ३३ ॥
अपां रसश्च परमस्तेजिष्ठानां विभावसुः ॥ प्रभा सूर्येंदुताराणां शब्दोहं नभसः परः ॥ ३४ ॥
ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः ॥ भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ॥ ३५ ॥
गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं ॥ आस्वादश्रुत्यवघ्राणमहं सर्वे द्रियं ॥ ३६ ॥ राम
द्रियं

मात्रं च विकृतं ॥ ३३ ॥ परमः मधुरः परः पराख्यः शब्दः ॥ ३४ ॥ अर्जुनः पार्थः ॥ भूतानां प्राणि-
नां प्रतिसंक्रमः प्रलयः ॥ ३५ ॥ गत्यादयः पंचकर्मेंद्रियव्यापाराः ॥ स्पर्शादयो ज्ञानेंद्रियव्या
पराः ॥ तत्र लक्षणं दर्शनं सर्वेंद्रियाणामिंद्रियं तत्तदर्थग्रहणशक्तिरूप्यहं ॥ ३६ ॥ राममरा

भा॰ए॰
७६

ननुसंप्रदादेवत्रास्यतेकिंपुनर्वर्णनेन तत्राह। पुरेति परमकं परमश्रासौ कं सुखस्वरूपश्चतं यत् यद्धं
सद्रूपेण धर्म्मोप्युक्तएवनतुयोगमात्रं।जानीत मगतयश्सुष्मद्धर्म्म विवत्तयेत्युक्तत्वात्॥३॥प्रा
गनुशासितोपिनभवितानभविष्यतीति॥४॥अत्रहेतुमाहद्वक्तेति द्वाभ्यां।तेत्वत्तोन्यःकलावेद
याः॥५॥नतस्मात् नः अस्माकंमनुष्याणांमध्येयस्ययथाविधीयेत॥७॥धर्म्मोधर्मादनपेतः

पुराकिलमहाबाहोधर्म्मंपरमकंप्रभो॥यत्तेनहंसरूपेणब्रह्मणेभ्यात्थमाधव॥३॥सइ
दानींसुमहताकालेनामित्रकर्शन॥प्रायोनभवितामर्त्यलोकेप्रागनुशासितः॥४॥वक्ताक
र्त्ताविताना न्योधर्मस्याच्युततेभुवि॥सभायामपिवैरिंच्यांयत्रमूर्तिधराःकलाः॥५॥कर्त्राऽवि
त्राप्रवक्त्राचभवतामधुसूदन॥त्यक्तेमहीतलेदेवविनष्टंकःप्रवक्ष्यति॥६॥तत्त्वन्नःसर्वध
र्मज्ञधर्म्मस्त्वद्भक्तिलक्षणः॥यथायस्यविधीयेततथावर्णयमेप्रभो॥७॥श्रीभगवानुवाच
धर्म्यएषतवप्रश्नोनैश्रेयसकरोनृणां॥वर्णाश्रमाचारवतांतमुद्धवनिबोधमे॥८॥आ
दौकृतयुगेवर्णोनृणांहंसइतिस्मृतः॥कृतकृत्याःप्रजाजात्यातस्मात्कृतयुगंविदुः॥९॥

76

कुतः।नैश्रेयसकारःभक्तिजनकः।अतःमेमत्तःतंधर्मंनिबोध॥८॥तत्रादौमदुपासनाल्लक्षण
एवमुख्योधर्म्मआसीत्॥आचारलक्षणस्तुपश्चात्प्रवृत्तः सचैवमनुष्ठितोभक्तिहेतुरिति
वर्णयितुमाह॥आदाविति कल्पादौयत्कृतयुगंतस्मिन्नेचतदामामुपासतइतिएवके
वलंनान्यत्कुर्वन्तीतिवक्तुंकृतयुगनाम्नमनिरुक्तिमाह॥कृतकृत्यइति।जात्याजन्मनैव॥९॥

श्रीबादरायणिरुवाच।इत्थंस्वभृत्यमुख्येनपृष्टःसभगवान्हरिः।प्रीतःक्षेमायमर्त्यानांधर्मानाहसनातनान्॥२॥

राम
७६

उपसंहरति।एताइति।एतेचविभूतिभेदामयाचिन्तार्थमेवास्माभिःकथिताः।अतोनात्रातीवाभिनिवेशःकर्त्तव्य
इत्याह मनोविकाराएवनतुपरमार्थाः।यथाकिंचिद्वस्तुखपुष्पादिवाङ्मात्रेणाभिधीयतेतत्तुल्याः॥४१
तस्माद्वागादीन्नियच्छ॥आत्मानंबुद्धिंआत्मनासत्वसम्पन्नयातयैवनियच्छ।अध्वनेसंसारमा
र्गाय॥४२॥असंयमनेदोषमाह।यइति।असंयच्छन्।नसंयच्छति॥४२॥परिसमाप्यते।कृतकृत्या॥

एतास्तेकीर्त्तिताःसर्वाःसंक्षेपेणविभूतयः॥मनोविकाराएवैतेयथावाचाभिधीयते॥४१॥वाचंय
च्छमनोयच्छप्राणांयच्छेन्द्रियाणिच॥आत्मानमात्मनायच्छनभूयःकल्पसेध्वने॥योवैवाङ्मन
सीसम्यगसंयच्छन्धियायतिः॥तस्यव्रतंतपोदानंस्रवत्यामघटाम्बुवत्॥४३॥तस्माद्वचोम
नःप्राणान्नियच्छेन्मत्परायणः॥मद्भक्तियुक्तयाबुद्ध्याततःपरिसमाप्यते॥४४॥इतिश्रीभागवते
महापुराणेएकादशस्कंधेमहाविभूतिर्नामषोडशोध्यायः॥श्रीउद्धवउवाच॥यस्त्वया
भिहितःपूर्वंधर्मस्त्वद्भक्तिलक्षणः॥वर्णाश्रमाचारवतांसर्वेषांद्विपदामपि॥१॥यथानुष्ठी
यमानेनत्वयिभक्तिर्नृणांभवेत्॥स्वधर्मेणारविंदाक्षतन्ममाख्यातुमर्हसि॥२॥राम॥

भवतीत्यर्थः॥४४॥इत्येकादशेषोडशः ततःसप्तदशेयस्मिन्स्वधर्मेभक्तिलक्षणेहंसोक्तंधर्म्ममचाह
ब्रह्मचारिगृहस्थयोः॥१॥कर्म्माहिविहितत्वान्नित्यत्वात्कृतकर्म्मोक्तसाधनंमद्भक्तिरि
त्युक्तं।भक्तिसाधनत्वंचकर्म्मणांमयोदितेष्ववहितःस्वधर्म्मेष्वित्यादिनातत्रतत्रोक्तं॥नचकर्म्मानुष्ठा
तॄणांनियमेनभक्तिर्नदृश्यते।अतःपृच्छतियस्त्वयेतिसप्तभिः॥पूर्वंकल्पादौ।त्वद्भक्तिलक्षणःत
ज्ज्ञापकःतत्साधनमित्यर्थः॥वर्णाश्रमवतामपिद्विपदांनराणां।यथायेनप्रका॥रेणानुष्ठीयमा

भा॰ए॰
७७

तद्धर्म्माणां स्वभावानाह। अशौचमिति। शुष्कविग्रहः निर्मलकलहः तर्षः तृष्णा ॥१६॥ नत्रतावत्सर्वसाधारणं
धर्म्ममाह। आदेसे वर्णाग्रदानामुपलक्षणं च वर्णा धर्म्मान् गद्यस्थप्रकरणा वक्ष्यति ॥२०॥ प्रथमं तावद्
आश्रमेषु च ब्रह्मचारिणां धर्म्मो वर्ण्यते। स च द्विविधः। उपकुर्वाणको नैष्ठिकश्च। तत्राद्यस्य धर्मानाह द्वि
तीयमिति। नवभिः द्विजस्त्रैवर्णिकः। आनुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण। द्वितीयमुपन

आस्तिक्यं दाननिष्ठा च अदम्भो ब्रह्मसेवनं ॥ अतुष्टिरर्थोपचये वैश्यप्रकृतयस्त्विमाः ॥१७
शुश्रूषणं द्विजगवां देवानां चाप्यमायया ॥ तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः ॥१८॥
अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः ॥ कामः क्रोधश्च तर्षश्च स्वभावोऽन्त्यवसायिनां ॥१९
अहिंसा सत्यमस्तेयमकामक्रोधलोभता ॥ भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः ॥२०॥ द्वि
तीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः ॥ वसन् गुरुकुले दान्तो ब्रह्माधीयीत चाहूतः ॥२१
मेखलाजिनदण्डाक्षब्रह्मसूत्रकमण्डलून् ॥ जटिलोऽधौतदद्वासोऽरक्तपीठः कुशान्दधत्
२२॥ स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः ॥ न च्छिन्द्यान्नखरोमाणि कक्षोपस्थगतान्यपि ॥२३॥

७७

यतात्वं जन्म प्राप्य आचार्यण आहूतो ब्रह्म वेदमधीयीत च कारात् तदर्थं च विचारयेत् ॥२१॥ किं
च मेखलादीन् कुशांश्च दधत्। तत्राक्षशब्देनाक्षमाला। कथंभूतः जटिलः अनभ्यंगादिना
जातजटः ॥ तथा अधौतदद्वासो रक्तपीठः ॥ दंताश्च वासश्च दद्वासांसि न धौतानि तानि तानि यस्य
सः ॥ अधौतदद्वासाः स चासौ अरक्तपीठश्च अनकौतुकादिना रक्तं पीठमासनं यस्य सः ॥२२॥
जपश्च उच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चारं तस्मिन् वाग्यतः मौनी भवेत् ॥२३॥ रामराम

राम
७७

किंचविधायकाभावादपितदानीनान्यत्कर्मास्तीत्याह।वेदइति।धर्मश्चमनोविषयोहमेववृषरूपधृक्॥वृषःचतुः
पात्नक्रियाविषयोयज्ञादिः अतस्तपोनिष्ठाः मनसश्चेंद्रियाणांचस्वैकाग्र्यंपरमंतपइतिवच
नादेकाग्रतयाहंसंशुद्धंमांध्यायंतीत्यर्थः॥१०॥पश्चात्त्रेतायुगप्रवेशेमेवैराजरूपस्यप्राणान्निमि
त्तात्हृदयात्सकाशात्।तस्याःत्रय्याःसकाशात्।हौत्राध्वर्यवौद्गात्रैःत्रिवृत्॥त्रिरूपः।यज्ञो।

वेदःप्रणवएवाग्रेधर्मोहंवृषरूपधृक्॥उपासतेतपोनिष्ठाहंसंमांमुक्तकिल्बिषाः॥१०॥त्रेतामु
खेमहाभागप्राणान्मेहृदयात्त्रयी॥विद्याप्रादुरभूत्तस्याअहमासंत्रिवृन्मखः॥११॥विप्रक्षत्रि
यविट्शूद्रामुखबाहूरुपादजाः॥वैराजात्पुरुषाज्जाताय आत्माचारलक्षणाः॥१२॥गृहाश्रमो
जघनतोब्रह्मचर्यंहृदोमम॥वक्षःस्थलाद्वनेवासोन्यासःशीर्षणिसंस्थितः॥१३॥वर्णानामाश्र
माणांचजन्मभूम्यनुसारिणीः॥आसन्प्रकृतयोनॄणांनीचैर्नीचोत्तमोत्तमाः॥१४॥शमोदमस्त
पःशौचंसंतोषःक्षांतिरार्जवं॥मद्भक्तिश्चदयासत्यंब्रह्मप्रकृतयस्त्विमाः॥१५॥तेजोबलंधृ
तिःशौर्यंतितिक्षौदार्यमुद्यमः॥स्थैर्यंब्रह्मण्यमैश्वर्यंक्षत्रप्रकृतयस्त्विमाः॥१६॥राम

वेविद्धुरितिश्रुतेः॥११॥वर्णानामाश्रमाणांचधर्मान्वक्तुंतेषामुत्पत्तिमाह।विप्रेतिद्वाभ्यांआ
त्माचारःस्वधर्मएवलक्षणंज्ञापकोयेषां॥१२॥ममवैराजरूपस्यहृदयःवक्षसोऽधस्तात्ब्रह्म
चर्यमितिनैष्ठिकाभिप्रायं॥१३॥तेषामधिकारिविशेषाणांस्वभावानाह।वर्णानामितिपंचभिः
जन्मस्थानानुसारिण्यः नीचैरित्यपवयं।अतोयमर्थः मंदाभिर्जन्मभूमिभिर्मंदाः।उत्तमाभि
रुत्तमाश्चेति॥१४॥तपआलोचनं॥१५॥तेजःप्रतापः।एतैरेवाश्रमस्वभावाअपिज्ञेयाः॥१६॥रामरा

ब्रह्मवर्चस्वी वेदाभ्यासजं तेजः तद्वान्॥३१॥ तस्यैव वनस्थयतिसाधारणधर्मानाह। स्त्रीणामिति निरीक्षणं भाव
गर्भं क्ष्वेलनं परिहासः एवमादिकं त्यजेत्। मिथुनीभूतानग्रतस्त्यजेत्। नपश्येदित्यर्थः॥३२॥ तस्यैव सर्वा
श्रमसाधारणधर्ममाह। शौचमिति द्वाभ्याम्॥३३॥ निष्कामनैष्ठिकस्य तु मोक्षफलमाह। एवमिति। अम
लः निष्कामश्चेत्॥ दग्धः कर्माशयोऽन्तःकरणं यस्य तथाभूतः सन् मद्भक्तो भवति॥३४॥ उपकुर्वाणस्य

योगी गुरावात्मनि च सर्वभूतेषु मां परं॥ अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः॥३१॥ स्त्रीणां निरी
क्षणस्पर्शसंलापक्ष्वेलनादिकं॥ प्राणिनो मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत्॥३२॥ शौचमाचमनं
स्नानं संध्योपासनमार्जवं॥ तीर्थसेवा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं॥३३॥ सर्वाश्रमप्रयुक्तोऽयं नि
यमः कुलनंदन॥ मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः॥३४॥ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्व
लन्॥ मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः॥३५॥ अथानंतरमावेक्ष्यन्यथा जिज्ञासितागमः
गुरवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः॥३६॥ गृहं वनं वोपविशेत्प्रव्रजेद्वा द्विजोत्तमः॥ आश्र
मादाश्रमं गच्छेन्नान्यथामत्परश्चरेत्॥३७॥

समावर्तनप्रकारमाह। अथेति। अनंतरं द्वितीया
श्रमं आवेक्ष्यन्। प्रवेष्टुमिच्छन्। यथा यथावद्विचारितवेदार्थः स्नायात्। अभ्यंगादिकं कृत्वा स
मावर्तेतेत्यर्थः॥३६॥ तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह गृहमिति। सकामश्चेद्गृ
हं। अंतःकरणशुद्ध्यादिकामश्चेद्वनं प्रविशेत्। शुद्धांतःकरणः सच द्विजोत्तमः ब्राह्मणश्चेत्प्र
व्रजेदित्यर्थः। यद्वा। आश्रमादाश्रमांतरं गच्छेत्। अन्यथा अनाश्रमी प्रतिलोमं च नाचरेदित्यर्थः।
अमत्पर इति वाच्छेदः॥ स्वभक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात्॥३७॥

रेतो बुद्धिपूर्वकं नावकिरेत्। नोत्सृजेत्। ब्रह्मव्रतधरः॥ अगृहस्थः। स्वयमेव कथंचिदवकीर्णे अवगाह्य
स्नात्वा॥ यतासुः कृतप्राणायामः। त्रिपदीं गायत्रीं जपेत्॥२४॥ संध्ये च द्वे यतवाक् जपन्नुपासीत मध्याह्ने
संध्यानिमित्तं मौनं नास्तीति द्विवचनं॥२५॥ अन्यदपि यत्संप्राप्नं तत्तु निवेदयेत्। तेनानुज्ञातं तु सं
यतः सन्नुपयुंजीतेत्यर्थः॥२७॥ यानशय्यासनस्थानैः यानं पथस्तो यानेन निर्दिष्टम प्रमत्तनया

रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयं॥ अवकीर्णे च गात्वाप्सु यतासुस्त्रिपदीं जपेत्॥२४॥ अ
ग्न्यर्काचार्यगोविप्रगुरुवृद्धसुरांछुचिः॥ समाहित उपासीत संध्ये द्वे यतवाग्जपन्॥२५॥ आचार्यं
मां विजानीयान्नावमन्येत कर्हिचित्॥ न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः॥२६॥ सायंप्रातरु
पानीयं भैक्ष्यं तस्मै निवेदयेत्॥ यच्चान्यदप्यनुज्ञातमुपयुंजीत संयतः॥२७॥ शुश्रूषमाण आचा
र्यं सदोपासीत नीचवत्॥ यानशय्यासनस्थानैर्नातिदूरे कृतांजलिः॥२८॥ एवं वृत्तो गुरुकु
ले वसेद्भोगविवर्जितः॥ विद्यासमाप्तेर्यावत्तु बिभ्रद्व्रतमखंडितं॥२९॥ यद्यसौ छंदसां
लोकमारोढुमन ब्रह्मविष्टपं॥ गुरवे विन्यसेद्देहं स्वाध्यायार्थं वृहद्व्रतः॥३०॥ ॥

समीपशयनेन विश्रांतं पादसंवाहनादिभिः समासनेन। आसीनं कृतांजलिर्नियोगप्रतीक्षया ना
तिदूरे वस्थानेनेत्यर्थः॥२८॥ एवंभूतव्रतनैयस्पसः॥२९॥ एवमुपकुर्वाणकस्य धर्मानुक्त्वा नैष्ठिकस्य वि
शेषधर्मानाह। यदीति षड्भिः असौ ब्रह्मचारी यदि छंदसां लोकं। महर्लोकं। ततो ब्रह्मलोकं चारोढुमि
न। आरोढुमिच्छेदित्यर्थः। यद्वा छंदसां लोकमिति ब्रह्मलोकविशेषणं। यत्र मन्त्रधराः कल्पादौ मुक्त
त्वात्तान हि वृहद्व्रतः सन् वृहद्व्रतं नैष्ठिकं यस्पसः विन्यसेत् समर्पयेत्। अधिक स्वाध्यायार्थं अधी

एवमधनस्यमहत्फलमुक्त्वासधनानामप्याहत्रिभिः॥ समुद्धरंतिदारिद्र्यात्तारयंति विप्रमित्युपल
क्षणं। मत्परायणंयंकमपि॥४३॥ राज्ञस्त्वावश्यकमेतदित्याह। सर्वाइति॥४४॥ सर्वेषामापद्वृत्ती
राहत्रिभिः पण्यैः विक्रयार्हैः नतुसुरालवणाद्यैः। तत्राप्यापदाक्रांतश्चेत्। खड्गेन क्षत्रियवृ
त्त्यावायस्यापिगौतमोनंतरांपापीयसींवृत्तीमातिष्ठेन्नइतिस्मरन्खड्गधारांपण्यविक्रया

समुद्धरंतियेविप्रंसीदंतंमत्परायणं॥ तानुद्धरिष्येनचिरादापद्भ्योनौरिवार्णवात्॥४३॥ स
र्वास्समुद्धरेद्राजापितेवव्यसनात्प्रजाः॥ आत्मानमात्मनाधीरोयथागजपतिर्गजान्॥४४॥
एवंविधोनरपतिर्विमानेनार्कवर्चसा॥ विधूयेहाशुभंकृत्स्नमिंद्रेणसहमोदते॥४५॥ सीद
न्विप्रोवणिग्वृत्त्यापण्यैरेवापदंतरेत्॥ खड्गेनवापदाक्रांतोनश्ववृत्त्याकथंचन॥४६॥ वैश्यवृ
त्त्यातुराजन्योजीवेन्मृगययापदि॥ चरेद्वाविप्ररूपेणनश्ववृत्त्याकथंचन॥४७॥ शूद्र
वृत्तिंचरेद्वैश्यःशूद्रःकारुकटक्रियां॥ कृच्छ्रान्मुक्तोनगर्ह्येणवृत्तिंलिप्सेतकर्मणा॥४८॥

त्कष्टंमन्यते। तथापिहिंसातोवणिग्वृत्तिरेवश्रेष्ठेतिभगवतोमतं॥ नतुश्ववृत्त्यानीचसे
वया॥४६॥ तत्राप्यापदिमृगयया। विप्ररूपेणवाअध्यापनादिना॥४७॥ कारवःप्रतिलोमज
विशेषावरूडादयः॥ तेषांवृत्तिंकटादिक्रियां। आपद्वृत्तीस्तुनानुकल्पेनवर्तेतेत्याह। कृच्छ्रा
दिति॥४८॥

79

विवाहनियमपूर्वकं वर्णधर्मैः सह गृहस्थधर्मानाह। गृहार्थीति। सदृशीं सवर्णां अजुगुप्सितां कुलतो लक्षण
तश्चानिन्दितां कामतस्तु यामन्यामुद्वहेत्तां॥ असवर्णामनु तस्या अनंतरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः॥ तिस्रो
वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं। ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः इति स्मृतेः॥३७॥ इज्यादयस्त्रै

गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां॥ यवीयसीं तु वयसा यां सवर्णामनुक्रमात्॥३८॥ इज्याध्यय
नदानानि सर्वेषां च द्विजन्मनां॥ प्रतिग्रहोध्यापनं च ब्राह्मणस्यैव याजनं॥३९॥ प्रतिग्रहं मन्यमा
नस्तपस्तेजोयशोनुदं॥ आभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः॥४०॥ ब्राह्मणस्य हि देहोयं क्षु
द्रकामाय नेष्यते॥ कृच्छ्राय तपसे चेह प्रेत्यानंतसुखाय च॥४१॥ शिलोंछवृत्त्या परितुष्टचित्तो
धर्मं महांतं विरजं जुषाणः॥ मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शांतिं॥४२॥

वर्णिकानामावश्यकधर्माः॥ प्रतिग्रहादित्रयं तु वृत्तिः सा च ब्राह्मणस्यैव॥३९॥ तत्रापि मुख्यामुख्य
तमां चान्यां वृत्तिमाह॥ प्रतिग्रहमिति। तयोर्याजनाध्यापनयोरपि कार्पण्यादिदोषं पश्यन्। शिलैः
स्वामित्यक्तैः क्षेत्रपतितैः कणिशैः॥४०॥ एवं च वृत्तिकार्श्यं ब्राह्मणेन सोढव्यमित्याह॥ ब्राह्मणस्येति
॥४१॥ उंछवृत्तिर्नाम विपण्यादिपतितकणोपादानं तां शिलवृत्त्यैकीकृत्य तया तुष्टचित्तस्य मोक्षं
फलमाह॥ शिलोंछेति महांतं आतिथ्यादिलक्षणं॥४२॥ ॥ ॥

गृहाद्यासंगेदोषमाह। यस्त्विति त्रिभिः॥५५॥ बंधमेवाभिनयेन दर्शयति। अहो इति॥ बाला आत्मजा यस्याः सा। आत्मजाश्च मां विना अनाथाः सन्तः कथं जीविष्यंतीति॥५६॥ गृहेषु आशयो वासनां तेन आ सर्वतः क्षिप्तं हृदयं यस्य सः। अंधंतमः। अतिनामसीं योनिं॥५७॥ इत्येकादशे सप्तदशः॥

यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः। स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते॥५५॥ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः। अनाथा मामृते दीनाः कथं जीवंति दुःखिताः॥५६॥ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं। अतृप्तस्ताननुध्यायन्मृतोंऽधं विशते तमः॥५७॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे वर्णाश्रमधर्म्मविभागः सप्तदशोऽध्यायः॥ श्रीभगवानुवाच॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा॥ वन एव वसेच्छांतस्तृतीयं भागमायुषः॥१॥

अष्टादशेऽवदद्धर्म्मं वनस्थयतिगोचरं। अधिकारविशेषेण विशेषं चापिनक्तं॥१॥ क्रमप्राप्तान्वनस्थधर्म्मानाह। वनमिति। आयुषस्तृतीयं भागं पंचसप्तति वर्षपर्यंतं। ततः परं ज्ञानेंद्रियस्य बहिरागेपि संन्यासाधिकारः स्यादिति भावः॥१॥ रामराम

नदेवं जातिव्यवस्थामुक्त्वा पुनर्गृहस्थस्यावश्यकान्पंचयज्ञानाह। वेदाध्ययनं ब्रह्मयज्ञः तेन ऋषी
न् स्वधाकारेण पितॄन् स्वाहाकारेण देवान्। बलिहरणेन भूतानि। अन्नाद्यैरन्नोदकादिभिः म
नुष्यानिति ज्ञातव्यं। यथोदयं विभवानुसारतः तेषामीश्वरदृष्ट्या विधिना मद्रूपाणीति ॥४९॥ आव
श्यकं धर्ममुक्त्वा शक्त्यनुसारेण धर्ममाह। यदृच्छया उद्यमं विनोपार्जितेन वा। शुक्लेन स्व

वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं। देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ॥४९॥
यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा। धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ॥५०॥ कुटुं
बेषु न सज्जेत न प्रमाद्येत्कुटुम्ब्यपि। विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥५१॥ पुत्रदारा
प्तबन्धूनां संगमः पान्थसंगमः। अनुदेहं वियन्त्येते स्वप्नो निद्रानुगो यथा ॥५२॥ इत्थं परिमृशन्मु
क्तो गृहेष्वतिथिवद्वसन्। न गृहैरनुबध्येत निर्ममो निरहंकृतः ॥५३॥ कर्मभिर्गृहमेधीयै
रिष्ट्वा मामेव भक्तिमान्। तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत् ॥५४॥

स्वात्मत्वेन शुद्धेन ध

नेन वा भृत्यान्पोष्यान् ॥५०॥ गृहस्थस्यापि निवृत्तिनियममेवाह कुटुंबेष्विति त्रिभिः। न प्रमाद्येत ईश्वरनि
ष्ठायां प्रमत्तो न भवेत्। ननु दृष्टादृष्टार्थकर्मासक्तस्य कथमप्रमादः। विचारेणेत्याह। विपश्चिदिति
॥५१॥ तत्रापि दृष्टेष्वासक्तेरधिकत्वात्तेषां नश्वरतां प्रपंचयति। पुत्रादीनामेकत्र संगमः पान्था
नां प्रपायां संगम इव। तत्र हेतुः। अनुदेहं प्रतिदेहमेते वियन्ति नश्यंति निद्रानुवर्ती स्वप्नो नि
द्रापाये यथेति ॥५२॥ अतिथिवत् उदासीनः ॥५३॥ आश्रमान्तरविकल्पमाह कर्मभिरिति गृहाश्र

भा०ए०
८१

कालनोदितान्। आग्रहायणादीन् ॥७॥ किंच। अग्निहोत्रमिति। मुनेश्च। नैगमैः वेदवादिभिः॥८॥
अस्य निःकामस्य फलमाह एवमिति। धमनिभिः शिराभिः संततः व्याप्तः॥ यावज्जीवं कृच्छ्रेण तेन त
पसा शुष्कमांस इत्यर्थः॥ ऋषिलोकात् महर्लोकादिक्रमेण। अयं भावः अंतःकरणशुद्धिभ
क्तिद्वारा ऽत्रैव तावन्मुच्यते। प्रतिबंधकबाहुल्ये त्वनेन क्रमेण मुच्यत इति ॥९॥ तं सकामं

वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान्॥ नतु श्रौतेन पशुना मां यजेत वनाश्रमी॥७॥ अग्नि
होत्रं च दर्शश्च पौर्णमासश्च पूर्ववत्॥ चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः॥८॥ एवं
चीर्णेन तपसा मुनिर्धमनिसंततः॥ मां तपोमयमाराध्य ऋषिलोकादुपैति मां॥९॥ यस्त्वेतत्कृ
च्छ्रतश्चीर्णं तपो निःश्रेयसं महत्॥ कामायाल्पीयसे युंज्याद्बालिशः कोपरस्ततः॥१०॥ य
दासौ नियमेऽकल्पो जरया जातवेपथुः॥ आत्मन्यग्नीन्समारोप्य मच्चित्तोऽग्निं समाविशेत्॥१

८२

निंदति यस्त्विति॥ निःश्रेयसं मोक्षफलं। अल्पीयसे आविरिंच्यादप्यल्पमेव तस्मै॥१०॥ ए
वं यावज्जीवं वर्तमानस्य मोक्षसिद्धिस्तृतीयभागावसाने तु मंदविरागेपि सन्न्यासाधिका
रः यदि तु ततोर्वागेव स्वधर्माशक्तो भवेत् तदपि सम्यगविरक्तः विरक्तो वा तत्राविरक्तस्य
कृत्यमाह यदेति॥ जातो वेपथुः कंपो देहे यस्य सः॥११॥ ॥

राम
८१

वसीत परिदधीत ॥२॥ दतः दत्तान् । नधावेत् न शोधयेत् ॥ त्रिकालमप्सु मज्जेत् । मुसलवत्स्नायात्
स्थंडिले शयः । भूमिशायी ॥३॥ तपेत पंचाग्नीन् सूर्येण सह चतुर्दिशमग्नीन्निधायात्मानं नापः
येदित्यर्थः ॥ आसारषाट् ॥ आसारं धारासंपातं सहते इति तथा अभ्रावकाशं नामव्रतं चरेत् ॥

कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत् ॥ वसीत वल्कलं वासस्तृणपर्णाजिनानि च ॥२॥
केशरोमनखश्मश्रु मलानि बिभृयाद्दतः ॥ नधावेदप्सु मज्जेत त्रिकालं स्थंडिलेशयः ॥३॥
ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड्जले ॥ आकंठमग्नः शिशिर एवं वृत्तस्तपश्चरेत् ॥४॥
अग्निपक्वं समश्नीयात्कालपक्वमथापि वा ॥ उलूखलाश्मकुट्टो वा दंतोलूखल एव वा ॥५॥
स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकारणं ॥ देशकालबलाभिज्ञो नाददीतान्यदाहृतं ॥६॥

जले आकंठमग्नः उदकवासं नामव्रतं चरेत् ॥४॥ उलूखलेन वाश्मना वा कुट्टयति कंडयतीति तथा दंता एवोलूखलं यस्य स तथा ॥५॥ संचिनुयात् आहरेत् । अन्यदा कालांतरे आहृतं कालां
तरे नाददीत । नवं नवं न्नाद्ये पुराणं तु परित्यजेदिति नारदोक्तेः ॥६॥ ॥

मौनंवाचोदंडः।अनीहात्वाम्यकर्मत्यागोदेहस्य प्राणायामश्चेतसः।एते अंतस्त्रयोदंडा यस्यनसंति॥ अंगहेउद्धव।अंगेधृतैर्वेणुभिरितिवा॥१७॥चतुर्ष्विति।ब्राह्मणेष्वेवेत्तिनिभेदन चतुर्विधेषु पूर्वपूर्वासंभवेवा।विगर्ह्यानभिशस्तपतितान्।असंक्लृप्तान् अत्रायंलाभोभविष्यतीतिपूर्वमनुद्दिष्टान्॥१८॥ पहिरिति।ग्रामात् याचितं।प्रोक्षणादिभिःशोधितं।विभज्यविष्णुब्रह्मार्केभूतेभ्यः अशेषमि

मौनानीहानिलायामादंडावाग्देहचेतसां॥नह्येतेयस्यसन्त्यंगवेणुभिर्नभवेद्यतिः॥१७॥भिक्षां चतुर्षुवर्णेषुविगर्ह्यान्वर्जयंश्चरेत्॥सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेनतावता॥१८॥बहिर्ज लाशयंगत्वातत्रोपस्पृश्यवाग्यतः॥विभज्ययाचितंशेषंभुंजीताशेषमाहृतं॥१९॥एकश्च रेन्महीमेतांनिःसंगःसंयतेंद्रियः॥आत्मक्रीडआत्मरतआत्मवान्समदर्शनः॥२०॥विवि क्तक्षेमशरणोमद्भावविमलाशयः॥आत्मानंचिंतयेदेकमभेदेनमयामुनिः॥२१॥रामराम

त्यधिकाद्धरणंनिरस्तंयाचितमितिपाठेमाधुकरेणयाचितमन्नंचेत्तर्हिविभज्यभुंजीत॥नत्वयाचि तादिभेदचतुष्टयमित्यर्थः॥माधुकरेतुनैवेद्यंभैक्ष्यमात्रेषुविद्यते।नैवेद्यकंद्विपदस्तुत्रितयंभौति कंचबहिरितिस्मृतेः॥यद्वातदाकेनापियाचितंचेत्।तन्मध्येतस्मैकिंचिद्विभज्यदत्त्वेत्यर्थः॥१९॥ किंचएकश्चरेदिति।आत्मन्येवक्रीडाकौतुकंयस्य।आत्मन्येवरतःसंतुष्टः।आत्मवान्धीरः विविक्तंविजनंक्षेमंनिर्भयंशरणंस्थानंयस्यसः।मयिभावेनविमलआशयोयस्यसः॥२१॥राम

विरक्तं प्रत्याह यदेति॥१२॥ तत्रादौ कृत्यमाह इष्ट्वेति॥ यथोपदेशं। श्राद्धाष्टकपूर्वकं प्राजापत्येष्ट्या
मामिष्ट्वा स्वप्राणे आत्मनि॥१३॥ संन्यासे विघ्ना भवन्ति तानविगणय्य संन्यसेदेवेत्याशयेनाह
विप्रस्येति। केनाभिप्रायेण कुर्वन्ति तमाह अयमिति। परं परब्रह्म॥१४॥ एवं प्रव्रजितस्य धर्मा

यदा कर्मविपाकेषु लोकेषु निरयात्मसु॥ विरागो जायते सम्यक् न्यस्ताग्निः प्रव्रजेत्ततः॥१२॥
इष्ट्वा यथोपदेशं मां दत्वा सर्वस्वमृत्विजे॥ अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत्॥१३॥
विप्रस्य वै संन्यसतो देवा दारादिरूपिणः॥ विघ्नं कुर्वन्त्ययं ह्यस्मानाक्रम्य समियात्परं॥१४॥
बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परं॥ त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि॥१५॥
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं॥ सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत्॥१६॥

नाह बिभृयाच्चेति। परं कौपीनाच्छादनं यद्यसौ धारयितुमिच्छति। तर्हि कौपीनमाच्छाद्यते
यावता तावन्मात्रं धारयेदित्यर्थः। त्यक्तं प्रैषोच्चारात्सर्वमेव। अतोन्यत्किंचिदपि न बिभृया
त् दंडपात्राभ्यामित्यावश्यकजलपात्रादिरूपत्वात्॥१५॥ मनःपूतं मनसा सम्यग्विचार्यय
च्छुद्धं तदाचरेत्॥१६॥

भा०ए०
८३

एवंवनुदकादिधर्म्मानुक्त्वा परमहंसधर्म्मानाह। ज्ञाननिष्ठ इति। सार्द्धैर्दशभिः। बहिर्विरक्तो मुमुक्षुः सन्नयो ज्ञाननिष्ठो वा। मोक्षेप्यनपेक्षो मद्भक्तो वा सलिंगान् त्रिदंडादिसहितान् आश्रमान् धर्म्मान्त्यक्त्वा तदासक्तिं त्यक्त्वा यथोचितं धर्म्मं चरेदित्यर्थः। न पुनरत्यंतत्याग एव विवक्षितः पुनर्द्धर्म्मविधानात्। अक्रियस्योत्तराध्याये वक्ष्यमाणत्वाच्च। तर्हि पूर्वस्मात्को विशेषः। तमाह।

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः॥ सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः॥२८॥ बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत्॥ वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत्॥२९॥

83

वेदवादरतो न स्यान्न पाखंडी न हैतुकः॥ शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत्॥३०॥

अविधिगोचरः विधिकिंकरो न भवेदिति। एतदेव स्फुटीकरिष्यति। शौचमाचमनं स्नानं न तु चोदनया चरेदित्यादिना॥२८॥ कथं चरेत्तदाह। बुधः विवेकवानपि बालकवत् मानापमानविवेकशून्यः। कुशलः निपुणोपि जडवत्। फलानुसंधानाभावेन विद्वान् पंडितोप्युन्मत्तवत् लोकरंजनाभावेन। नैगमः वेदार्थनिष्ठोपि गोचर्यां अनियताचारमिव॥२९॥ वेदवादरतः कर्म्मकांडव्याख्यानादिनिष्ठः। हैतुकः केवलतर्कनिष्ठः। शुष्कवादे निःप्रयोजनगोष्ठ्यां यो विवादस्तस्मिन्॥३०॥

राम:
८३

बंधमोक्षं च। केन बंधः केन वा मोक्षः इति। तावाह। बंध इति ॥२२॥ पुराणि। इत्यादि मन्त्रि। ग्रामा मास्त इति
ताः। व्रजा गोष्ठानि तानि। सार्थान् यात्रिकजनसमूहान् ॥२४॥ यतः शिलवृत्त्या प्राप्तेन तदीयेनाध
सा अन्नेन शुद्धसत्त्वः सन् निवृत्तमोहः संसिद्ध इति मुच्यते ॥२५॥ ननु मिथ्यात्वं विहाय कथं शिला
न्नेप्रवृत्तिः स्यादत आह। नेति। एतद्दृश्यमानं मिथ्यात्वादि वस्तुतया न पश्येत्॥ यतो विनश्य

अविविते तात्मनो बंधमोक्षं च ज्ञाननिष्ठया ॥ बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः ॥२२॥ तस्मा न्नि-
यम्य षड्वर्गं मद्भावेन चरेन्मुनिः ॥ विरक्तः क्षुल्लकामेभ्यो लब्ध्वात्मनि सुखं महत् ॥२३॥ पुरग्राम
व्रजान् सार्थान् भिक्षार्थं प्रविशंश्चरेत् ॥ पुण्यदेशसरिच्छैलवनाश्रमवतीं महीम् ॥२४॥ वानप्रस्थाश्र
मपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ॥ संसिध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलांधसा ॥२५॥ नैतद्वस्तुतया
पश्येद्दृश्यमानं विनश्यति ॥ असक्तचित्तो विरमेदिहामुत्र चिकीर्षितात् ॥२६॥ यदेतदात्मनि जग
न्मनोवाक्प्राणसंहतं ॥ सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् ॥२७॥

ति। अतः इहामु
त्र च लोके असक्तचित्तः सन् चिकीर्षितात् तदर्थकृत्याद्विरमेत् ॥२६॥ ननु तथापि यावद्विनाशं सु
खहेतुत्वात् विद्यमानवतः कुतो विरागः स्यात्। तत्राह यदेतदिति। एतज्जगन्ममतास्पदं। मनोवा
क्प्राणैः संहतं सहितमहंकारास्पदं शरीरं च सर्वं तज्जन्यं सुखं च आत्मनि मायामात्रमि
ति तर्केण स्वप्नादिदृष्टान्तेन त्यक्त्वा स्वस्थः आत्मनिष्ठः सन् पुनः तन्न स्मरेत् न चिंतयेत् ॥२७॥

भा॰ए॰
८४

यथाहमीश्वरो लीलया चरामि तथा ज्ञानी ज्ञाननिष्ठः अनासक्तः कुर्यात् न तु विधिकिंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः॥३६॥ कुतो विधिकिंकरत्वाभावस्तस्य तदाह न हीति तस्य विकल्पाख्या भेदप्रतीतिः॥ नन्वस्तीति सा। सत्यं या चासीत्सापि मद्वीक्षया ज्ञानेन हता। ननु हता पुनर्दृश्यमानत्वात्। तत्राह। आदेहान्तात्क्वचित् कदाचिन्न बाधितेव ख्यातिर्भवति॥३७॥ तदेव विरक्तस्यापरोक्षज्ञा

तथावासस्तथाशय्यां प्राप्तं प्राप्तं भजेन्मुनिः॥ शौचमाचमनं स्नानं न तु चोदनया चरेत्॥३६॥ अन्यांश्च नियमान् ज्ञानी यथाहं लीलयेश्वरः॥ न हि तस्य विकल्पाख्या या च मद्वीक्षया हता॥ ३७॥ आदेहान्तात्क्वचित्ख्यातिस्ततः संपद्यते मया॥ दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान्॥३८॥ अजिज्ञासितमद्धर्मो गुरुं मुनिमुपव्रजेत्॥ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः॥३९॥ यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः॥ यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः॥४०॥

84

नचतः संन्यासं तद्धर्मांश्चोक्त्वा केवलवैराग्यवन्तं विविदिषुं प्रत्याह। दुःखोदर्केष्विति। न जिज्ञासितो मद्धर्मो मत्प्राप्तिसाधनं येन सः॥३८॥ मामेव मद्दृष्ट्यैव गुरुं परिचरेत्। ततः परमेकश्चरेदित्यादिधर्मैर्वर्तेत इति भावः॥३९॥ अनधिकारिणः संन्यासं निंदति द्वाभ्यां। यस्त्विति। प्रचण्डोत्यासक्त इन्द्रियसारथिर्बुद्धिर्यस्य सः॥४०॥ ॥

राम
८४

अतिवादान्।दुरुक्तानि॥३१॥आत्मदृष्ट्यातावद्वैरकारणंनास्तीत्युक्तंएकएवेति॥३२॥देहदृष्ट्यापि नास्तीत्याहभूतानिचदेहाअपिकारणरूपेणैकात्मकानि।दैवतंत्रितंदैवाधीनंयतः॥३३॥अलब्ध्वेति

नोद्विजेतजनाद्धीरोजनंचोद्वेजयेन्नतु॥अतिवादांस्तितिक्षेतनावमन्येतकंचन॥३१॥
देहमुद्दिश्यपशुवद्वैरंकुर्यान्नकेनचित्॥एकएवपरोह्यात्माभूतेष्वात्मन्यवस्थितः॥३२॥
यथेंदुरुदपात्रेषुभूतान्येकात्मकानिच॥अलब्ध्वानविषीदेतकालेकालेऽशनंक्वचित्
॥३३॥लब्ध्वानहृष्येन्मतिमानुभयंदैवतंत्रितं॥आहारार्थंसमीहेतयुक्तंतत्प्राणधारणं
॥३४॥तत्त्वंविमृश्यतेतेनतद्विज्ञायविमुच्यते॥यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं॥३५॥

हिभिक्षाप्रयत्नेनापितत्रा।आहारमात्रार्थंसमीहेतैव।यतःतस्यप्राणधारणंयुक्तंसम्यक्।का।
यत्तेनश्वप्राणधारणेनतत्त्वंविचार्यते।किंतेनापितदाह।तद्विज्ञायेति॥३४॥नर्हिकिंमिष्टान्नादि
कमग्राह्यमेव।केनैवमुक्तमित्याहयदृच्छयेति॥३५॥ ॥ ॥

ततश्चासौ मुक्तश्चेत्याह । इति एवं मतेन स्वधर्म्मेण निर्णिक्तं शुद्धं सत्त्वं यस्य सः ॥ अत एव निर्ज्ञाताम
मगतिरिच्छया प्रसन्नेन ४६ ॥ उक्तमर्थं संक्षिप्याह ॥ य एष आचारलक्षणः पितृलोकप्राप्तिफलः । मद्भ
क्तियुक्तः मदर्पणेन कृतः ४७ ॥ प्रकरणार्थमुपसंहरति । एतत्ते ऽभिहितं यथा भक्तो भूत्वा मां परमा
प्नुयामादिति ॥ ४८ ॥ एकादशे अष्टादशः ॥ ज्ञानादेर्निर्णयः पूर्वं कृतो ह्याश्रमधर्मतः ॥ एकोनविंशति
तमे ज्ञानादेस्त्याग उच्यते ॥ १ ॥ न देवं नकेनोबाधितोपि देहादि प्रपंचो यावदपरोक्षानुभवेन दे

इति स्वधर्म्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नो विरक्तः समुपैति मां ॥ ४६ ॥ व
र्णाश्रमवतां धर्म्म एष आचारलक्षणः ॥ स एव मद्भक्तियुक्तो निःश्रेयसकरः परः ॥ ४७ ॥ एतत्तेभिहि
तं साधो भवान्पृच्छति यच्च मां ॥ यथा स्वधर्म्मसंयुक्तो भक्तो मां समियात्परं ॥ ४८ ॥ इति श्रीभा
गवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे यतिधर्म्मनिर्णयः अष्टादशोध्यायः ॥
श्रीभगवानुवाच ॥ यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः ॥ मायामात्रमिदं ज्ञात्वा ज्ञानं
च मयि संन्यसेत् ॥ १ ॥

ह्योहादिरिव नलीयते तावत् ज्ञानाभ्यासस्ततो मुक्तिरित्युक्तं । आदेह
ज्ञात्क चित्तरख्यातिस्ततः संपद्यते मयेत्यादिना । यस्य त्वपरोक्षानुभवेन प्रपंचो ऽलीनप्रायस्तस्य न
किंचित्कृत्यमस्तीत्याह । यदा तु विद्या अनुभवः तत्पर्यंतेन श्रुतेन संपन्नः अत एव आत्मवा
न् प्राप्तात्मतत्त्वः । नानुमानिकः केवलपरोक्षज्ञानवान्न भवति । अनेकारणपाठे प्राक् श्रुत्यनुकूलत
र्कतो निर्मीतार्थ इत्यर्थः ॥ स इदं द्वैतं न निवृत्तिसाधनं च मयि मायामात्रमिति ज्ञात्वा ज्ञानं च त

सुरान्यज्ञभागान्देवान्। आत्मानंच। आत्मस्थंमांचनिह्नुतेप्रतारयति। निह्नवफलमाह। अस्मादिति॥४१॥ चतुर्णांप्रधानधर्म्मानाह। भिक्षोरिति॥४२॥ अन्यधर्म्मान्कांश्चित्गृहस्थस्याप्यतिदिशति। ब्रह्मचर्यमिति। शौचंरागादिराहित्यंतस्यब्रह्मचर्यप्रकारमाह॥ ऋतौगन्तुरिति॥४३॥ एवं

ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति॥ सुरानात्मानमात्मस्थंनिह्नुतेमांचधर्म्महा॥४१॥ अविपक्वकषायोस्मादमुष्माच्चविहीयते॥ भिक्षोर्धर्मःशमोहिंसातपईक्षावनौकसः॥४२॥ गृहिणोभूतरक्षेज्याद्विजस्याचार्यसेवनं॥ ब्रह्मचर्यंतपःशौचंसन्तोषोभूतसौहृदं॥४३॥ गृहस्थस्याप्यृतौगन्तुःसर्वेषांमदुपासनं॥ इतिमांयःस्वधर्मेणभजन्नित्यमनन्यभाक्॥४४॥ सर्वभूतेषुमद्भावोमद्भक्तिंविंदतेदृढां॥ भक्त्योद्धवानपायिन्यासर्वलोकमहेश्वरं॥४५॥ सर्वोत्पत्त्यप्ययंब्रह्मकारणंमोपयातिसः॥

भूतवर्णाश्रमधर्म्मफलमाह। इतिमामिति। दृढांभक्तिंविंदते॥४४॥ ततःकिमतआह भक्त्येति। महेश्वरत्वेहेतुः। सर्वोत्पत्त्यप्ययंसर्वस्योत्पत्त्यप्ययौयस्मात्। अतएवतत्कारणं। मामं ब्रह्मस्वरूपंवैकुंठनिवासिनं। यद्वाब्रह्मणोवेदस्यकारणंमांउपयातिसामीप्येनप्राप्नोति॥४५॥

नदेवज्ञानंसंक्षेपतउपदिशति। त्रिविध आध्यात्मिकादिर्विकारः देहादिः समायानतुपरमार्थः। यत्यस्मा
त् अंतरामध्यएवापतति रज्जौसर्पमालादिवन्नाद्यपवर्गयोः। नत्वादावन्ते चास्ति। अतः यत्यदा
अस्यविकारस्यामीजन्मादयः स्युः। नदातस्यनवाधिष्ठानभूतस्य किं वि दित्यर्थः। तस्यापिवस्तु
तोनसंति। तस्यासत्वादित्याह। आद्यंतयोरिति॥ असतः सर्पादेराद्यंतयोर्यदस्ति रज्वादितदे

त्वयुद्धवाश्रयतियस्त्रिविधोविकारोमायांतरापततिनाद्यपवर्गयोर्यत्॥ जन्मादयो
स्ययदमीतवतस्यकिंस्युराद्यंतयोर्यदसतोस्ति तदेवमध्ये॥७॥ उद्धवउवाच ज्ञानंविशु
द्धंविपुलंयथैतद्वैराग्यविज्ञानयुतंपुराणं॥ आख्याहिविश्वेश्वर विश्वमूर्ते त्वद्भक्तियो
गंचमहद्विमृग्यं॥८॥ तापत्रयेणाभिहतस्यघोरे संतप्यमानस्यभवाध्वनीश॥ पश्यामिना
न्यच्छरणंतवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात्॥९॥

वमध्येपिनतुसर्पादि। तद्वदयंविकारोना-
स्तीत्यर्थः। यद्वा। आद्यंतयोर्यदस्ति। तन्मध्येप्यस्त्येवानतस्यजन्मादयः सन्ति। अतस्त्वंनिर्वि-
कारंब्रह्मेति॥७॥ सानादेर्विशेषंजिज्ञासुःपृच्छति। ज्ञानमिति। विशुद्धमेतत् ज्ञानंविपुलंनिश्चि
तंयथाभवतितथाकथयेति। महद्भिर्ब्रह्मादिभिर्विमृग्यं॥८॥ महद्विमृग्यत्वमभिनयेनाह। ताप
त्रयेणाभिहतस्य अतः सन्तप्यमानस्य अंघ्रिद्वंद्वमेवातपत्रं तस्मात्। नकेवलमातपात्त्रातुः

86

अत्र हेतुमाह ॥ ज्ञानिनस्त्विति । यस्मादहमेव तस्येष्टः । अपेक्षितः स्वार्थः फलं । हेतुः तत्साधनं च संमतः स्वर्गोऽभ्युदयश्च । अपवर्गः संसारनिवृत्तिश्च अतस्तस्य न प्राप्यं कृत्यं वा किंचिदस्तीत्यर्थः ॥२॥ अत्र विद्वदनुभवं प्रमाणयति ॥ ज्ञानेति । यथोक्तं ज्ञानिनमभिनंदति ॥ यतोसौ ज्ञानेन

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः ॥ स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः ॥२॥
ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ॥ ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्त्ति मां ॥३॥
तपस्तीर्थं जपो दानं पवित्राणीतराणि च ॥ नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ॥४॥
तस्मात् ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ॥ ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः ॥
ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि ॥ सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोगमन् ॥६॥

मां धारयति ॥३॥ तस्य ज्ञानं स्तौति । तप इति । अलं अत्यर्थं । ज्ञानस्य कलया लेशेन ॥४॥ ज्ञानेन । सहितं तत्पर्यंतं यथा भवति तथा ज्ञात्वा तत्संपन्नः सन् मामेव भज । अन्यत्सर्वं त्यजेत्यर्थः ॥५॥ तस्य प्रशस्त्यर्थं पूर्वेषां वृत्तमाह । ज्ञानेति । मामेव संसिद्धिं प्राप्ताः ॥६॥ ॥

भा०ए० ८१

विज्ञानमाह। एतदेवेति श्लोकार्द्धेन। यत् यदार्थेनैकेनानुगतमनेकात्मकाभावान् सर्वमेतन्ननानत
थापर्यवसन्नेतीत॥ किंतु तदेकं परमकारणं ब्रह्मैव। तदा एतदेव विज्ञानमुच्यते। एतदुक्तं भवति। परो
क्षज्ञानेनापरोक्षभ्रमस्य दिङ्मोहादिष्विव निवृत्त्यभावात्तदा जगत्प्रपञ्चस्यात्मनः पृथक् सदिति
मन्यते। अपरोक्षज्ञाने तु बाधितमेव जीवन्मुक्तः संस्कारशेषं पश्यति। ततः परं न पश्यति॥ अ
तः परोक्षापरोक्षज्ञाने ज्ञानविज्ञानशब्दाभ्यामुच्येते इति॥ एकेन सर्वकार्याणामनुगतिं कार्या
णां कारणात्पृथगसत्त्वं चोपपादयति। सार्द्धेन। तत्र यदि न कदाचिदनीदृशं जगदित्यादि

एतदेव हि विज्ञानं न तथैकेन येन यत्॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां॥१५॥
आदावन्ते च मध्ये च सृज्यात्सृज्यं यदन्वियात्॥ पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत्॥१६॥

87

मतेनैषां भावानामुत्पत्त्यादयो न स्युः। तर्हि कारणस्यैकस्याभावादेकात्मता मिथ्यात्वं च न स्यात्। अतस्ते
षामुत्पत्त्यादीन् साधयति। स्थितीति। त्रिगुणात्मनां सावयवानामित्यर्थः॥ विमता भावा उत्पत्त्या
दिमन्तः सावयवत्वात् घटादिवदिति पश्येत्॥१५॥ तत्र आदौ उत्पत्तौ। अन्ते परिणामान्तरापत्तौ च
कारणत्वेन मध्ये चाश्रयत्वेन सृज्यात् सृज्यं कार्यात् कार्यान्तरं प्रति यदन्वियात् अनुगच्छेत्।
तत्प्रतिसंक्रामे तेषां प्रलये च यदवशिष्येत तदेव सदिति पश्येदित्यर्थः॥१६॥ ॥

राम ८१

प्रतिरूपामुत्पादयन्नाह । दष्टमिति । अस्मिन्बिले संसारकूपे पतितं । तत्र च कालाहिना दष्टं । एवमपि क्षुद्रसुखेष्वेव उरुस्तर्षस्तृष्णा यस्य तं । दृश्यमानः कथं समुद्धरणीय इति चेत्तत्राह । आपवर्ग्यैः अपवर्गबोधकैः वाग्भिरासिंचेति ॥१०॥ तद्धि श्वासार्थं विद्वत्सभायां निर्णीतमहं वक्ष्यामीत्याह । इत्थमिति ॥११॥ ज्ञानादिभिरुपबृंहितान्तत्सहितानित्यर्थः ॥१३॥ तत्र ज्ञानं कथयति नवेति ॥ प्रकृति

दष्टंजनंसंपतितंबिलेस्मिन्कालाहिनाक्षुद्रसुखोरुतर्षं ॥ समुद्धरैनंकृपयापवर्ग्यैर्वचोभिरासिंचमहानुभाव ॥१०॥ श्रीभगवानुवाच ॥ इत्थमेतत्पुराराजाभीष्मंधर्मभृतांवरं ॥ अजातशत्रुःपप्रच्छसर्वेषांनोनुशृण्वतां ॥११॥ निवृत्तेभारतेयुद्धेसुहृन्निधनविह्वलः ॥ श्रुत्वाधर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ॥१२॥ तानहंतेभिधास्यामिदेवव्रतमुखाच्छ्रुतान् ॥ ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान् ॥१३॥ नवैकादशपंचत्रीन्भावान्भूतेषुयेनवै ॥ ईक्षेताथैकमप्येषुतज्ज्ञानंममनिश्चितं ॥१४॥

पुरुषमहदहंकारपंचतन्मात्राणि एकादशेंद्रियाणि पंचमहाभूतानि त्रयो गुणाः । एतान्भावानष्टाविंशतितत्वानि भूतेषु ब्रह्मादिस्थावरान्तेषु कार्येषु अनुगतानि येन ज्ञानेनेक्षेत । अथ एतेष्वपि भावेषु एकं परमात्मतत्त्वं अनुगतं येनेक्षेत । कार्यकारणात्मकं जगत्पश्यन्परमकारणात्मकमेवेक्षेत न तु ततः पृथगिति येन पश्येत्तज्ज्ञानमित्यर्थः ॥१४॥

भा०११०
८८

मदर्थंमद्भजनार्थंतद्विरोधिनोर्थस्यपरित्यागः। भोगस्यतत्साधनस्यचंदनादेः सुखस्यपुत्रोपलालनादेः इष्टा
दिवैदिकंयत्कर्मतदपिमदर्थंकृतंभक्तेःकारणमित्यर्थः॥२३॥भक्तिः प्रेमलक्षणासंजायते। अस्यभक्तस्य
अन्यःकोर्थः। साधनरूपःसाध्यरूपोवा। वशिष्यते। सर्वोपिस्वतएवभवतीत्यर्थः॥२४॥तदेवाह। किंब
हुनाचित्तमात्मनिवातद्विदिनिष्ठं अर्थानर्थयोःकारणमित्याह। यदात्मनीतिद्वाभ्यां। यदा। आत्मनिमयी

मदर्थेर्थपरित्यागोभोगस्यचसुखस्यच॥इष्टंदत्तंहुतंजप्तंमदर्थंयद्व्रतंतपः॥२३॥एवंधर्मैर्मनुष्या
णामुद्धवात्मनिवेदिनां॥मयिसंजायतेभक्तिःकोन्योर्थोस्यावशिष्यते॥२४॥यदात्मन्यर्पितंचित्तंशा
न्तंसत्वोपबृंहितं॥धर्मंज्ञानंसवैराग्यमैश्वर्यंचाभिपद्यते॥२५॥यदर्पितंतद्विकल्पेइन्द्रियैःपरि
धावति॥रजस्वलंचासन्निष्ठंचित्तंविद्धिविपर्ययं॥२६॥धर्मोमद्भक्तिकृत्प्रोक्तोज्ञानंचैकात्म्य
दर्शनं॥गुणेष्वसंगोवैराग्यमैश्वर्यंचाणिमादयः॥२७॥

श्वरेचित्तमर्पितं। तदापुमान्धर्मादी
न्प्राप्नोत्येव॥२५॥एतदेवव्यतिरेकेणाहयदीति। यत्तुयदातद्विकल्पेदेहगेहादावर्पितंतस
त्परिधावतितदाधिकंरजस्वलमसन्निष्ठंचभवति। ततश्चविपर्ययं अधर्मादिकंविद्धि॥२६॥
स्वाभिप्रेतान्धर्मादीन्व्याचष्टेधर्मोमद्भक्तिकृत्। यतःसएवमोक्षःप्रकृष्टउक्तःशास्त्रेषु॥२७

४४

राम
८८

चेराम्यमाह। श्रुतिरितिद्वाभ्यां। श्रुतिः नेह नानास्ति किंचनेत्यादिः। प्रत्यक्षं परादि कार्यं तत्वादि व्यतिरेकेण न दृश्यते। चैतन्यव्यतिरेकेण च न किंचिद्दृश्यत इति। ऐतिह्यं महाजनप्रसिद्धिः। अनुमानं विमतं मिथ्या दृश्यत्वात्। शुक्तिरजतवत् इत्यादि। एवं प्रमाणचतुष्टयेन तेषु अनवस्थानात्। तैर्बाधितत्वात् स एवं सर्वानुगतं सत्यमात्मतत्त्वं पश्यन् विकल्पस्य च मिथ्यात्वात् ततो विरज्यते। विरक्तो भवतीत्य

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं॥ प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते॥१७॥ कर्मणां परिणामित्वादाविरिंच्यादमंगलं॥ विपश्चिन्नश्वरं पश्येद् दृष्टमपि दृष्टवत्॥१८॥ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेनघ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं॥१९॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनं॥ परिनिष्ठा च पूजायां स्तुतिभिस्तवनं मम॥२०॥ आदरः परिचर्यायां सर्वांगैरभिवंदनं॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः॥२१॥ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं॥ मय्यर्प्पणं च मनसः सर्वकामविवर्जनं॥२२॥

र्थः॥१७॥ न च वेदोक्तस्वर्गादिसुखाशया न विरज्यते इत्याह कर्मणामिति। आविरिंच्यात्। ब्रह्मलोकपर्यंतं। अदृष्टमपि सुखं अमंगलं दुःखरूपं नश्वरं च पश्येत्॥१८॥ भक्तियोगः पूर्वं उक्त एव तथापि तस्मिन् प्रीतिं प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि॥१९॥ श्रद्धा श्रवणादरः शश्वदिति सर्वत्रानुषज्यते। मदनुकीर्त्तनं। श्रवणानंतरं मत्कथाव्याख्यानमित्यर्थः॥२०॥ अंगचेष्टा लौकिकी। किंवा वचसा लौकिकेनापि मद्गुणनामीरणं कथनं॥२२॥

भक्तियोगंसकारणमाह ३०

मुमुक्षोरुपादेयान् शमादीन् हेयांश्च दुःखादीन् महाजनप्रसिद्धेभ्यो विलक्षणाना‌ह शम इत्यादिना यावत्समाप्ति। एतेनैव तद्विपरीताश्चाशमादयो ज्ञेयाः शमो मन्निष्ठता बुद्धेः न तु शान्तिमात्रं। दम इंद्रियसंयमः। न चोरादिदमनं। तितिक्षा विहितदुःखस्य संमर्षः सहनं। न भारादेः। जिह्वोपस्थयोर्जयो वेगधारणं धृतिः। न त्वनुद्वेगमात्रं ॥३६॥ दंडो भूतद्रोहः तस्य त्यागो दानं। न धना र्पणं॥

शमो मन्निष्ठता बुद्धेर्दम इंद्रियसंयमः॥ तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः॥३६॥ दंडन्यासः परं दानं कामत्यागस्तपः स्मृतं॥ स्वभावविजयः शौर्यं सत्यं च समदर्शनं॥३७॥ ऋतं च सूनृता वाणी कविभिः परिकीर्तिता॥ कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते॥३८॥

कामत्यागः भोगोपेक्षा तपः। न कृच्छ्रादि स्वभावो वासना तस्य जयः प्रतिबंधः शौर्यं न विक्रांतिः। समं ब्रह्म तस्य दर्शनमालोचनं। सत्यविषयत्वात्सत्यं न यथार्थभाषणमात्रं ॥३७॥ अन्यच्च। ऋतं सूनृता सत्या प्रिया च वाक् ॥ एवं च ऋतसत्ययोः स्फुट एव विवेकः॥ क्रमप्राप्तं त्यागं व्याख्यातुमादौ तत्तो भेदेन शौचं व्याचष्टे। तस्यापि मत्त्यागरूपत्वेन त्यागादभेदं प्रतीतेः। कर्मसु अंसंगमः अनासक्तिः शौचं त्यागस्तु संन्यास इति। तयोर्भेद इत्यर्थः॥३८॥ ॥ ॥

89

धर्मादीनां महाजनप्रसिद्धानामन्यथाव्याख्यातत्वान्नियमादिष्वपि संख्यातः स्वरूपतो वा किंचिद्वैलक्षण्यं स्यादिति संभावनया तद्विशेषं जिज्ञासुः पृच्छति। यमइतिपंचभिः॥२८॥ अभ्यर्हितं धनं च किं स्वं परेति॥ विद्यादीनां विशेषणं। श्रीमइति॥३०॥ तथा तान्प्रश्नानर्थान्विपरीतान्। अशमादीन्॥३१॥ यम

उद्धव उवाच॥ यमः कतिविधः प्रोक्तो नियमो वारिकर्षण॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो॥२८॥ किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा॥ २९॥ पुंसः किंस्विद्बलं ब्रह्मन्भगो लाभश्च केशव॥ का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च ३०॥ कः पंडितः कश्च मूर्खः कः पंथा उत्पथश्च कः॥ कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं॥३१॥ क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः॥ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते॥३२॥ श्रीभगवानुवाच॥ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं॥३३॥ शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं॥३४॥ एते यमाः सनियमा उभयोर्द्वादश स्मृताः॥ पुंसामुपासितास्तात यथाकामं दुहंति हि॥३५॥

नियमानाह। अ

हिंसेति त्रिभिः॥ अहिंसेति त्रिभिः॥ अस्तेयं मनसापि परस्वाग्रहणं। आस्तिक्यं धर्मे विश्वासः॥३२॥ शौचं बाह्यमाभ्यंतरं चेति द्वयं। अतो द्वादश नियमाः। श्रद्धा धर्मादरः। उभयोः श्लोकयोर्यथार्थं स्मृताः। ते यमा नियमाश्च यद्वा उभयोः प्रवृत्तनिवृत्तयोः मुमुक्षोर्यमा मुख्याः॥ सकामस्य नियमा मुख्याः स्मृता इत्यर्थः। तत्र हेतुमाह हि यस्मात् उपासिताः सेविताः संतः पुंसां प्रवृत्तानां निवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं

भा०ए०
९०

नमस उन्नाह उद्धेकः। नतामिस्त्रादिः। गुरुरेवबंधुः नभ्रात्रादिः ॥ स चाहमेव यथा हं जगद्गुरुः ॥ ॥ कामं व परो
वेद्धुर्विषमे समुपस्थिते ॥ गुरुः सकलधर्मात्मायत्रा किंचनगोहारिरिति ॥ ससाधनभोगायतनं गृहं। त
त्र मानुषं मानुषस्वरूपं शरीरमेव ॥ नरमर्यादिगुणैः सम्पन्नश्चाढ्य उच्यते। नधनी ॥४३॥ असंतुष्टोयः
सदरिद्रोन निस्वः ॥ योऽजितेंद्रियः सकृपणः शोच्यः नदीनः विषये घनासक्तधीर्यः सईशः स्वतंत्रः

नरकस्तमउन्नाहो बंधुर्गुरुरहं सखे ॥ गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥४३॥ दरिद्रो यस्त्व
संतुष्टः कृपणो योऽजितेंद्रियः ॥ गुणेष्वसक्तधीरीशो गुणासंगो विपर्ययः ॥४४॥ एत उद्धव ते प्रश्नाः
सर्वे साधु निरूपिताः ॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः ॥४५॥ गुणदोषदृशिर्दोषो गुणस्तू
भयवर्जितः ॥४५॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे श्रेयोभेद वि
निर्णयः एकोनविंशतिमोऽध्यायः ॥१९॥

नराजादिः गुणासंगः गुणेषु संगो यस्य सः विपर्ययः अ
नीशः एवं शमादि विपर्ययोपलक्षणार्थं ॥४४॥ उपसंहरति। एतइति। साधु मोक्षोपयोगित
या। एवं सर्वं गुणदोषयोर्विवेकाय इद्धवेन पृष्टमिति तयोः संक्षेपतो लक्षणमाह। किं बहुना
वर्णितेन। गुणदोषयोर्लक्षणमेतावदेव ॥ तदाह। गुणदोषयोर्दृशिर्दर्शनं दोषः ॥ गुणस्तु
तदुभयदर्शनवर्जितस्वभावइति ॥४६॥ इतिकादाशे एकोनविंसः ॥१९॥ ॥

राम
९०

नृणां इष्टं धनं धर्मः न पश्वादिसाधारणं भगवत्तमः परमेश्वरोऽहमेव यज्ञः॥ मद्ध्यायज्ञोऽनुष्ठेयः न क्रियायज्ञ इत्यर्थः। यज्ञार्थं दानं दक्षिणा सा च ज्ञानोपदेशः॥ न हिरण्यादिदानं॥ तेन हि यज्ञरूपो विष्णुः प्राप्यते। दुर्दमदमनं बलं॥ तच्च मनोदमनहेतुत्वात् प्राणायाम इति॥३९॥ लाभं व्याचिख्यासुः प्रथमं भगं ततो भेदेन व्याचष्टे। लोके तयोरभेदप्रसिद्धेः॥ भगो भाग्यं तच्च मे ऐश्वरो भावो मदीयं ऐश्वर्यादिषाड्गुण्यमित्यर्थः उत्तमो लाभस्तु मद्भक्तिः न पुत्रादिः॥ विद्या चात्मनि प्रतीतस्य भेदस्य बाधः न ज्ञानमात्रं। अकर्मसु

धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः॥ दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं॥३९॥ भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः॥ विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु॥४०॥ श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः॥ दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित्॥४१॥ मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः॥ उत्पथश्चित्तविक्षेपः स्वर्गः सत्वगुणोदयः॥४२॥ ॥ ॥

जुगुप्सा हेयत्वदर्शनं ह्रीः न लज्जामात्रं॥४०॥ गुणा एव श्रीः न मंडनकिरीटादि। दुःखसुखयोरत्ययः अतिक्रमः॥ अननुसंधानं सुखं न भोगः॥ विषयभोगापेक्षैव दुःखं नाग्निदाहादि। बंधान्मोक्षं द्वयं वा यो वेत्ति स पंडितः न विद्यामात्रं॥४१॥ अहंबुद्धिरित्युपलक्षणं॥ देहगेहादिष्वहं ममेत्यभिमानवान् मूर्ख इत्यर्थः॥ मन्निगमः॥ मां नितरां गमयति प्रापयतीति यो निवृत्तिमार्गः स तु पंथाः सन्मार्गः न कंटकादिशून्यः। चित्तविक्षेपः प्रवृत्तिमार्गः उत्पथः कुमार्गः॥ न तु चोराद्याकुलः। सत्वगुणस्योदयः उद्रेकः स्वर्गः न इन्द्रादिलोकः॥४२॥ ॥ ॥ ॥

ननुपितरोदेवाश्चसर्वज्ञाःप्रत्यक्षतोदृष्ट्वामनुष्येभ्यःकथयिष्यंतीत्याह।पित्रादीनांसर्वेषांतव त्वद्वाक्यरूपोवेदएवचक्षुःश्रेयःश्रेष्ठंचक्षुःप्रमापकं।क्व अनुपलब्धेर्थेमोक्षेर्थेस्वर्गादौच॥तथासा ध्यसाधनयोःइदमस्यसाध्यंइदमस्यसाधनमित्यत्र।पितृदेवंगुणदोषदृष्ट्यभावेनिःश्रेयसंनघ टते॥४॥किंच।शास्त्रेणैवविहितांभेददृष्टिंतस्मिन्नेवविषयेशास्त्रंकथंनिवर्त्तयेदित्याह।

पितृदेवमनुष्याणांवेदश्चक्षुस्तवेश्वर॥श्रेयस्त्वनुपलब्धेर्थेसाध्यसाधनयोरपि॥४॥गुणदोष भिदादृष्टिर्निगमात्तेनहिस्वतः॥निगमेनापवादश्चभिदायाइतिहभ्रमः॥५॥श्रीभगवानुवाच॥ योगास्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया॥ज्ञानंकर्मचभक्तिश्चनोपायोन्योस्तिकुत्रचित् ॥६॥

गुणेति॥तेनिगमात्।त्वदाज्ञारूपाद्वेदादेवनहिस्वतःयस्मादर्थप्राप्तत्वेननिवर्त्तेत।इहस्फु टंभ्रमोभवतितन्निवर्त्तयेति॥५॥विषयाभेदेप्यधिकारिभेदेनाविरोधंवक्तुंप्रथमंयोगत्रय माह।योगाइति।योगाउपायाः॥ब्रह्मकर्मदेवताकांडैःप्रोक्ताः॥कर्मचनिष्कामं।श्रेयोविधि त्सयामोक्षसाधनेच्छया॥अन्यउपायोनास्तीतिकाम्यकर्मादिकंव्यावर्त्तयति।।तथाचोत्तरा ध्यायेस्फुटीकरिष्यति॥यएतानित्यादिना॥६॥ ॥ ॥ ॥

विशेषो योगत्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं। गुणदोषव्यवस्थार्थमधिकारिविभागतः॥१॥ गुणदोषदृशिर्दो-
षो गुणस्तूभयवर्जितः इत्युक्तं॥ तदाक्षिपति विधिश्चेति पंचभिः। विधिश्च प्रतिषेधश्चेश्वरस्य तव नि-
गम आज्ञारूपो वेदः॥ स च विधेयानां प्रतिषेध्यानां च कर्मणां गुणदोषं च पुण्यपापफलरूपमवेक्षते
१ उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां विकल्पं भेदं च गुणदोषरूपमवेक्षते॥ प्रतिलोमा-
नुलोमजं च गुणदोषं तथैवावेक्षते। प्रतिलोमजा उत्तमवर्णासु स्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यो जाताः॥ सू-
तवैदेहकादयः अनुलोमजास्तूत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णासु स्त्रीषु जाताः मूर्द्धावसिक्ताम्बष्ठादयः
तेषां च असत्संतस्तु विज्ञेयाः प्रतिलोमजानुलोमजा इति गुणदोषाद्व्यादीन् कर्मार्हतानर्हताभ्यां स्वर्गनर

उद्धव उवाच॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते॥ अवेक्षतेऽरविंदाक्ष गुणं दोषं च कर्मणां॥१॥ वर्णाश्र-
मविकल्पं च प्रतिलोमानुलोमजं॥ द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च॥२॥ गुणदोषभिदादृष्टिमंत-
रेण वचस्तव॥ निःश्रेयसं कथं नॄणां निषेधविधिलक्षणं॥३॥

कंचनत्फलतया गुणदोषरूपमेवावेक्षते।

एतच्चोत्तराध्याये प्रपंचयिष्यते॥२॥ तथापि न स्तुते किमायातं। अत आह गुणदोषेति। गुणदोषयोर्नि-
राकृतत्वाद्गुणदोषभिदादृष्टिमन्तरेण तां विना निषेधविधिलक्षणं तव वचः कथं॥ तद्वचनं चांतरेण नृणां निः-
श्रेयसं कथं स्यात्। तत्रापि श्रोतव्यो मंतव्य इत्यादि साधनविधेः। नानुध्यायाद्बहून् शब्दान् वाचो विग्ला-
पनं हि तदित्यादि निषेधस्य चावश्यकत्वादिति भावः॥ यद्वा। गुणदोषभिदादृष्टिमंतरेण निषेध-
विधिलक्षणं तव वचो विनेति सामानाधिकरण्यमेवास्तु। यद्वा गुणदोषभिदादृष्टिमन्तरेण निषेधवि-
धिलक्षणमपि वचः कथं तु नत्वमस्यादिवाक्यवन्निःश्रेयसपरं स्यात्। सर्वस्य वेदस्य तत्परत्वांगीका-

भा०ए०
९२

अनेनप्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहं स्तौति ॥ स्वर्गिणोपीति ॥ निरयिण इति दस्रांतत्वेनोक्तं । ज्ञान
भक्तिभ्यां ज्ञानभक्त्योः तदुभयं स्वर्गिनारकिशरीरं ॥१२॥ अतोन्यः स्वर्गतिं न कांक्षेत ॥ नारकीमिति दस्रां
तः यद्वा स्वर्गनरकसाधनरकसाधनकर्म्माणि न कुर्यादित्यर्थः ॥ अस्यापिक्षिप्रत्वात्पुनरपि मनु॰
ष्योभवेयमित्यपि न कांक्षेत ॥ यतो देहावेशात् देहासक्त्या स्वार्थे प्रमाद्यति अवधानशून्यो भवति

स्वर्गिणोप्येनमिच्छंति लोकं निरयिणस्तथा ॥ साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकं ॥१२॥ न न
रः स्वर्गतिं कांक्षेन्नारकीं वा विचक्षणः ॥ नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति ॥१३॥ एतद्विद्वान्पु
रा मृत्योरभवाय घटेत सः ॥ अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं ॥१४॥ छिद्यमानं यमैरेतैः
कृतनीडं वनस्पतिं ॥ खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः ॥१५॥ अहोरात्रैः छिद्यमानं बु
द्ध्वायुर्भयवेपथुः ॥ मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति ॥१६॥ ॥ ॥

९२

१३ ॥ अपि तु एतद्देहं साधकमिति विद्वान् तत्रार्थसिद्धिदमपि मर्त्यं ज्ञात्वा अप्रमत्तः अनलसः सन् मृ
त्योः पूर्वमेव मोक्षाय घटेत यत्नं कुर्यात् ॥१४॥ अप्रमत्तो मुक्तसंगः सुखं प्राप्नोतीत्यत्र दृष्टांतः ॥ छि
द्यमानमिति यमैः यमवन्निर्दयैः पुरुषैः कृतं नीडं यस्मिन् तं स्वकेतं स्वस्याश्रयं ॥ अलंपटः । अना
सक्तः ॥१५॥ दार्ष्टांतिकमाह । अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा भयेन वेपथुः कंपो यस्य सः ॥१६॥ राम

राम
९२

त्रिष्वधिकारिभेदमाह। निर्विण्णानामिति द्वाभ्यां। इह एषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विर-
क्तानां॥ अत एव तत्साधनभूतकर्मत्यागिनां ज्ञानयोगः सिद्धिद इत्युत्तरेणान्वयः॥ अनिर्विण्णचित्तानां दु-
खबुद्धिशून्यानां अतः कामिनां॥ तत्फलेष्वपि सक्तानामित्यर्थः॥७॥ यदृच्छया केनापि भाग्योदयेन॥ प-
तत्र काम्यकर्मसु प्रवर्त्तमानस्यापि सर्वात्मना विधिप्रतिषेधाधिकार इत्युत्तराध्याये वक्ष्यतीति निष्काम
कर्मयोगाधिकारिण्यस्तु यथाशक्ति॥ स च ज्ञानभक्तियोगाधिकारात्प्रागेवान्तदधिकृतयोस्तु स्वल्पः।

निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु॥ तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनां॥७॥ यदृ-
च्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्॥ न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः॥८॥ ताव-
त्कर्माणि कुर्वीत न निर्विद्येत यावता॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते॥९॥ स्वधर्मस्थो
यजन्यज्ञैरनाशीःकाम उद्धव॥ न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत्॥१०॥ अस्मिंल्लोके-
वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः॥ ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया॥१२॥ ।।

ताभ्यां सिद्धानां तु न किंचिदिति॥ सावधिं कर्मयोगमाह। तावदिति नवभिः कर्माणि नित्यनै-
मित्तिकानि यावता तावन्न॥९॥ कर्मयोगिनो ज्ञानभक्तिभूमिकारोहप्रकारमाह॥ स्वधर्मस्थ इति।
अनाशीःकामः अफलकामः अन्यत् निषिद्धं॥ नरकयानं हि द्वेधा विहितातिक्रमाद्वा निषिद्धा-
चरणाद्वा। अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च न नरकं याति॥ अफलकामत्वान्न स्वर्गमपीत्य-
र्थः॥१०॥ किंच। अस्मिंल्लोके अस्मिन्नेव देहे॥ अनघः निषिद्धत्यागी। अतः शुचिः निरन्तरागादिम-
लः॥ यदृच्छया निकेवलज्ञानादपि भक्तेर्दुर्लभतां द्योतयति॥१२॥ ।।

नन्वतर्हि यथापूर्वमेव स्यात् ॥ तत्राह ॥ मनोगतिं तु न विसृजेत् । नोपेक्षेत ॥ किंतु अप्रमत्तः सन् लक्षये दितार्थः
२० ॥ अत्र तु धर्मार्गसहद्यां तस्तोति ॥ एषः अनुवृत्तिमार्गेण मनसः संग्रहः परमो योगः ॥ तत्साधनत्वात्
उपचारेण स्तुतिः । यथा अदांतस्य दमनीयस्य अर्वतः अश्वस्य हृदयज्ञत्वं स्वाभिप्रायेण गतिम
न्विच्छन् अपेक्षमाणः अश्वधारकः प्रथमं किंचित्तद्गतिमनुवर्त्तते । तदा च रश्मिना तत्र त्वेव ग
च्छति ॥ न तूपेक्षेत । तद्वदित्यर्थः ॥ २१ ॥ एवमीषद्वशीकृतस्य मनसोऽत्यंतनैश्चल्योपायानाह ॥ सांख्ये
नेति त्रिभिः ॥ सांख्येन तत्त्वविवेकेन । सर्वभावानां महदादिदेहांतानां अनुलोमतः प्रकृत्यादिक्रमेण

93

मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः ॥ सत्त्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत् ॥ २० ॥ ए
षवै परमो मनसः संग्रहः स्मृतः ॥ हृदयज्ञत्वमन्विच्छन् दम्यस्येवार्वतो मुहुः ॥ २१ ॥ सांख्येन सर्व
भावानां प्रतिलोमानुलोमतः ॥ भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति ॥ २२ ॥ निर्विण्णस्य
विरक्तस्य पुरुषस्योक्तवेदिनः ॥ मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया ॥ २३ ॥ यमा-
दिभिर्योगपथैरान्वीक्षिक्या च विद्यया ॥ ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः ॥ २४ ॥

भवाप्रतिलोमतः पृथिव्यादिक्रमेण अप्ययं च अनुध्यायेत् । प्रसीदति निश्चलं भवति ॥ २२ ॥
अवधिभूतज्ञात्मदर्शनपर्यंतं ततः स्वागमापायिषु तेष्ववधिभूतात्मदर्शनात्तद्विवेकात्पन्न
संसारे निर्विण्णस्य अतो विरक्तस्य ॥ ततश्च उक्तवेदिनः गुरूपदिष्टार्थालोचकस्य ततो गुरूपदि
ष्टस्य चिंतितस्य पुनः पुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति ॥ २३ ॥ किंच यमादिभिर्यो
गमार्गैः आन्वीक्षिक्या पदार्थशुद्ध्यशोधनेन मदर्चनध्यानादिभिर्वा ॥ वाशब्देनास्य पक्षस्य स्वा
तंत्र्यं दर्शयति । एतैरुपायैर्योग्यं परमात्मानं मनः स्मरेत् नान्यैः अतोऽन्यं न कुर्यादित्यर्थः ॥ २४ ॥ राम

एवमभयतमानंप्रमत्तंनिन्दति नदेहंलब्ध्वंनावंप्राप्येत्यर्थः॥ यो भवाब्धिं न तरेत्स आत्महा तत्र देहतवः आद्यं सर्वफलानां मूलं॥ एतदुपार्जितकर्मभिः सर्वप्राप्तिः॥ किंच॥ सुदुर्लभं यद्यमकोदिभिरपि प्राप्तुं न शक्यं। तथापि सुलभं यदृच्छया लब्धत्वात्॥ तं च सुकल्पं पटुतरं। किंच गुरुः संश्रितमात्र एव कर्णधारो नेता यस्य तं मया च स्मृतमात्रेण अनुकूलमारुतेन प्रेरितं॥१७॥ एवं तावदविरक्तस्य वैराग्यद्वारा

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं॥ मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा॥१७॥ यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः॥ अभ्यासेनात्मनो योगी धारयेदचलं मनः॥१८॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं॥ अतंद्रितोनुरोधेन मार्गेणात्मवशं नयेत्॥१९॥

ज्ञानभक्तिसाधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानप्राप्तेः पूर्वं किंचित्कृत्यं वर्जनीयं चाह सार्द्धैस्त्रिभिः॥ यदा आरंभेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः॥ तत्फलेषु विरक्तश्च तदा संयतेंद्रियः सन् आत्मनोभ्यासेन आत्मविषयवृत्तिसंतत्या अचलं यथा भवति तथा मनो धारयेत्॥१८॥ तत्र प्रथममेवात्यन्तधारणासंभवात् तत्स्वभावानुसारेण वशीकरणमेवाह॥ यर्हि आशु भ्राम्यत्परिभ्रमदनवस्थितं भवति तदा अनुरोधेन किंचिदपेक्षापूरणद्वारेण॥१९॥

भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः॥ मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसु उद्विग्नः।
न तु तत्फलेषु विरक्तः॥ तदाह। वेदेति॥ यद्यपि वेद तथापि तत्परित्यागे अनीश्वरः अशक्तः॥२७॥ एवंभूतो
यः श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन्। ततः तदनन्तरं मां प्रीत्या भजेत्। विषयांस्तु से
वमानोपि तेषु प्रीतिं न कुर्यादित्याह। गर्हयन्निति॥२८॥ कथं भजेत् किं वा ततो भवतीति तदाह। प्रोक्तेनेति द्वा

गुणदोषविधानेन संगानां त्यजनेच्छया॥ जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु॥२७॥ वेद
दुःखात्मकान्कामान्परित्यागेप्यनीश्वरः॥ ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः॥२८॥ जुषमाणश्च
तान्कामान्दुःखोदर्कांश्च गर्हयन्॥ प्रोक्तेन भक्तियोगेन भजतो माऽसकृन्मुनेः॥२९॥ कामा हृदय्या न-
श्यंति सर्वे मयि हृदि स्थिते॥ भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः॥३०॥ क्षीयंते चास्य कर्मा-
णि मयि दृष्टेऽखिलात्मनि॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रा-
यः श्रेयो भवेदिह॥३१॥

भ्यां। श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनमित्यादिना तत्र तत्रोक्तेन मां
असकृत् नित्यं भजतः हृदय्याः हृद्गताः कामा नश्यंति॥२९॥ हृदयमेव ग्रंथिः अहंकारः तत्पूर्वका-
श्च सर्वे संशया असंभावनादयः॥ कर्माण्यनारब्धफलानि संसारहेतुभूतानि॥३०॥ तदेवं व्यवस्थ-
या अधिकारित्रयमुक्तं॥ तत्र च भक्तेरन्यनिरपेक्षत्वादन्यस्य च तत्सापेक्षत्वाद्भक्तियोग एव श्रेष्ठ
इत्युपसंहरति। तस्मादिति त्रिभिः॥ मदात्मनः मयि आत्मा चित्तं यस्य तस्य श्रेयः साधनं॥३१॥ राम

ननुपापापनोदप्रायश्चित्तंकार्यमेवतत्राह। यदीति। योगेनज्ञानाभ्यासेनैव। एतच्चभक्तस्यापिनामकीर्त्तनाद्यु
पलक्षणार्थं। नान्यत्कृच्छ्रादि ॥२५॥ ननुनित्यनैमित्तिकंचकर्मसत्त्वशोधकत्वाद्गुणः। हिंसादिकंत्वशुद्धिहेतु
त्वाद्दोषः। तत्रचतन्निवर्त्तकत्वात्कृच्छ्रादिप्रायश्चित्तंगुणइतिविधिप्रतिषेधाभ्यामुक्तत्वात्प्रायश्चित्तं
विनायोगेनैवकथंपापंदहेत्तत्राह। स्वेस्वइतिसार्द्धेन। सएवगुणःनेतरः। तदुपपादयति। यस्मा
द्विधिप्रतिषेधाभ्यामनेनगुणदोषविधानेनकर्मणांनियमःसंकोचःकृतःकुतइत्यतआह। जा

यदिकुर्यात्प्रमादेनयोगीकर्मविगर्हितं ॥ योगेनैवदहेदंहोनान्यत्तत्रकदाचन ॥२५॥ स्वेस्वे
ऽधिकारेयानिष्ठासगुणःपरिकीर्त्तितः ॥ कर्मणांजात्यशुद्धानामनेननियमःकृतः ॥२६॥ राम

त्याउत्पत्त्यैवाशुद्धानांसहजप्राप्तानांसंगानांत्याजनेच्छया। अयंभावः॥ पुरुषस्याशुद्धिर्नामनप्रवृ
त्तेरन्यास्ति। स्वाभाविकप्रवृत्त्यैवतस्यमलिनत्वात्। नचसहसासर्वतोनिवृत्तिःकर्त्तुंशक्यते
अतइदंनकर्त्तव्यमिदमेवकर्त्तव्यमित्येवंस्वाभाविकप्रवृत्तिसंकोचद्वारेणनिवृत्तिरेवक्रिय
तेतथाचनप्रवृत्तिपरोवेदस्तथोत्तराध्यायेवक्ष्यामः उत्पन्नैवहिकामेष्वित्यादिना। अतोयोगि
नःस्वाभाविकप्रवृत्त्यभावान्नप्रायश्चित्तादिविधिगोचरतेति ॥२६॥ ॥

भा०ए०
९५

जयतिश्रीपरानंदःपरानंदनकेशरी।यत्कृपालवलेशेनश्रीधरःसत्कृतिःकृती॥१॥ईदृत्तांत्रिमिरुक्त्यासंतःक्षमंतांममसाहसंमयाहिस्वीयबोधायकृतमेतन्नसर्वतः॥२॥एकविंशेक्रियाज्ञानभक्तिष्वनधिकारिणांकामिनांद्रव्यदेशादिगुणदोषाःप्रपंचिताः॥३॥तदेवंगुणदोषव्यवस्थार्थंयोगत्रयमुक्तं तत्रचज्ञानभक्तिसिद्धानांनकिंचिद्गुणदोषौ॥साधकानांतुप्रथमतोनित्यंकर्मनिष्ठानांयथाशक्तिनित्यनैमित्तिकंकर्मसत्वशोधकत्वाद्गुणःतदकरणंनिषिद्धकरणंचतन्मलीमसकरणत्वाद्दोषः॥तन्निवर्तकत्वाच्चप्रायश्चित्तंगुणःविशुद्धसत्वानांतुज्ञानांतुज्ञाननिष्ठानांज्ञा

श्रीभगवानुवाच॥यएतान्मत्पथोहित्वाभक्तिज्ञानक्रियात्मकान्॥क्षुद्रान्कामांश्चलैःप्राणैर्जुषंतःसंसरंतिते॥१॥स्वेस्वेऽधिकारेयानिष्ठासगुणःपरिकीर्तितः।विपर्ययस्तुदोषःस्यादुभयोरेषनिश्चयः॥२॥

95

नाभ्यासएवसिद्धिहेतुत्वाद्गुणःभक्तिनिष्ठानांपुनःश्रवणकीर्तनादिभक्तिरेवगुणः।तद्धिरुद्धंसर्वमुभयेषांदोषइत्युक्तं॥इदानींयेतुनसिद्धानापिसाधकाःकिंतुकेवलंकाम्यकर्मप्रधानाःतेषांसकलगुणदोषान्प्रपंचयिष्यन्आदौतानतिवहिर्मुखान्निंदतियएतानिति॥मत्पथःमदुक्तमार्गान्क्षुद्रान्तुच्छान्।चलैःअस्थिरैःप्राणैःदेहवायुभिरिंद्रियैर्वाजुषंतःसेवमानाभवंतितेसंसरंतिनिखिलगुणदोषभाक्त्वेननानायोनीःप्राप्नुवंतीत्यर्थः॥१॥ननुतैरेवकर्मभिःकेचिद्गुणदोषभाजःकेचिन्नेतिकुतोवैषम्यंनत्वग्निनाकेचिन्नप्यंतेकेचिन्नेतिसंभवतितत्राहस्वेस्वइति॥अधिकारभेदेनकल्पितौगुणदोषौनवस्तुनिष्ठावितिभावः॥२॥

राम०
९५

तत्र हेतुः ॥ यत्कर्मभिरित्यादि ॥ इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्यद्भाव्यं स्वर्गादि तत्सर्वं अंजसा अनायासेनैव ॥३३॥ स्वर्गमपवर्गं मद्धाम वैकुंठं लभते । वांछा तु नास्तीत्युक्तं यदि वांछतीति । तत्र हेतुमाह ॥ न किंचिदिति । धीराः धीमतः यतो मम एकांतिनः मय्येव प्रीतियुक्ताः ॥ अतो मया दत्तमपि न गृह्णंति किं वक्तव्यं न वांछंतीत्यर्थः ॥ अपुनर्भवं आत्यंतिकमपि कैवल्यात्तदुपपादयति ॥

यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा ॥३३॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ॥ न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम ॥३४॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ॥ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं ॥३५॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः ॥३६॥ साधूनां समचित्तानां बुद्धेः परमुपेयुषां ॥ एवमेतान्मयादिष्टाननुतिष्ठंति मे पथः ॥ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ॥३७॥ इति श्रीभागवते म० एकादशस्कंधे विंशतितमोध्यायः

नैरपेक्ष्यमेव परं उत्कृष्टं अनल्पकं महत् निःश्रेयसं फलं तत्साधनं च प्राहुः ॥ मे भक्तिः । निराशिषः प्रार्थनारहितस्य निरपेक्षस्य प्रार्थनाकारणाभावात् अपेक्षारहितस्य पुंसो भवेत् ॥ यद्वा मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः ॥ अनेन प्रकारेण सिद्धानां गुणदोषा इति विरोधपरिहारमुपसंहरति । न मयीति । गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापादयः ॥ साधूनां निरस्तरागादीनां ॥ अतः समचित्तानां अत एव बुद्धेः परमीश्वरं प्राप्तानां काम्यकर्मनिष्ठां निंदिष्यन्नेतन्मुक्तिमार्गानुपसंहरति । एवमिति मे पथः मत्प्राप्त्युपायान् येऽनुतिष्ठंति ते क्षेमं कालमायादिरहितं मम लोकं विंदंति यत्परमं ब्रह्मेति च विदुः ॥३७॥ इति एकादशे विंशः

भा॰ए॰ ९६

न केवलं देहे एव अपितु देशकालादिभावानामपि॥ आदिशब्देनानुपा॰नां फलनिमित्ताधिकारिणां ग्रहणं व
स्तूनां उपादेयानां व्रीह्यादीनामपि मम मया नियमार्थं संकोचार्थमित्यर्थः॥१॥ एवं गुणदोषविषयं परिशोध्य
तयोः शुद्ध्यशुद्धिमूलत्वात् शुद्ध्यशुद्धी प्रपंचयति। अकृष्णसार इत्यष्टभिः देशानां मध्ये कृष्णसारहरिणर
हितोऽशुचिः। तत्रापि अब्रह्मण्यः॥ ब्राह्मणभक्तिशून्योऽत्यंतमशुचिः कृष्णसारोऽपि कृष्णेन मृगेण
सारः श्रेष्ठोऽपि असौवीरः कीकटः सुवीराः सत्पुरुषाः तद्वान् सौवीरः कीकटोऽपि अशुचिः॥ तदु

देशकालादिभावानां वस्तूनां मम सत्तम॥ गुणदोषौ विधीयेते नियमार्थं हि कर्मणां॥७॥ अकृ
ष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत्॥ कृष्णसारोऽप्यसौवीरकीकटासंस्कृतेरिणं॥८॥ कर्म
ण्यो गुणवान्कालो द्रव्यतः स्वत एव वा॥ यतो निवर्तते कर्म स दोषोऽकर्मकः स्मृतः॥९॥ रामरा

९८

क्तं॥ सर्वैर्गुणैरुत्तमो देशः सत्पात्रं यत्र लभ्यत इति। तद्वर्जितो यः कीकटः अंगवंगकलिंगादिः असंस्कृ
तः संमार्जनादिशून्यः म्लेच्छबहुलो वा ईरिणं ऊषरं एकवद्भावः तत् अशुचि॥ न तदन्यः शुचिरित्यर्थ
दुक्तं भवति कालशुद्ध्यशुद्धी दर्शयति॥८॥ कर्मण्य इति। द्रव्यतः द्रव्यसंपत्त्या स्वतो वा पूर्वाह्णादि
र्यैः कर्मण्यः कर्मार्हः सकालस्तस्मिन् कर्माणि गुणवान्॥ यतः यस्मिन् द्रव्यालाभेन वा राष्ट्रवि
प्लवादिना वा कर्म निवर्तते यश्च सूतकादौ दशाहादिलक्षणः कर्मकः कर्मानर्हः स्मृतः सकालो

राम ९६

तदाह। शुद्ध्यशुद्धी इति। विचिकित्सार्थं योगपमयोगं पंचेति संदेहद्वारा स्वामा विकल्पप्रवृत्तिनिमित्तं निवृत्तं कार्यमित्यर्थः। त
त्र शुद्ध्यशुद्धी योग्यत्वायोग्यत्वायोग्यत्वे॥ गुणदोषौ तन्निमित्तौ पादेयत्वानुपादेयत्वे॥ शुभाशुभौ तन्निमित्ताव
र्थानर्थौ॥३॥ तत्र शुद्ध्यशुद्धी धर्मार्थं शुद्धेन धर्म्मः अशुद्धेनाधर्म इति। गुणदोषौ व्यवहारार्थं॥ अशुद्धावपि रा
ज्ञादीनां व्यवहारदर्शनादुपादेयं नान्यदिति। शुभाशुभौ यात्रार्थौ देहत्वेप्यत एव शरीरनिर्वाहमात्रोपादाने

शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु॥ द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ॥३॥ धर्म्मार्थं व्यवहारा
र्थं यात्रार्थमिति चाऽनघ॥ दर्शितोऽयं मया चारो धर्ममुद्वहतां धुरं॥४॥ भूम्यम्ब्वग्न्यनिलाकाशा भूतानां
पंच धातवः॥ आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः॥५॥ वेदेन नामरूपाणि विषमाणि स
मेष्वपि॥ धातुषूद्धव कल्प्यंत एतेषां स्वार्थसिद्धये॥६॥

न पापं व्यधिको पादानेनुपापमिति मया
मन्वादिरूपेण॥ धर्मरूपां धुरं भारं कर्मजडानामित्यर्थः॥४॥ शुद्ध्यशुद्धी प्रपंचयिष्यन् वेदोक्तत्वे
न तदभिनिवेशो मा भूदिति॥ समानेष्वपि वस्तुषु विनियदुक्तं तत्प्रपंचयति भूमीति त्रिभिः॥ भू
तानां प्राणिनां धारयंतीति धातवः कारणानि। शारीराः शरीरारंभकाः। देहतः साम्यमुक्तं॥ जी
वतोऽप्याह आत्मसंयुता इति॥५॥ धातुषु देहेषु। नामरूपाणि वर्णाश्रमादीनि। कल्पनायाः प्र
प्रयोजनमाह॥ एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा धर्मादिपुरुषार्थसिद्धये॥६॥

भा०ग०
६१

द्रव्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तं। तत्र वचनाच्छुद्धिरेकरूपैव। द्रव्यतस्तु शुद्धिर्बहुरूपेति तां प्रपंचयति। धा
न्येति। दारुलौकिकं ग्रहचमसादि च। अस्थिगजदन्तादि रसास्तैलघृतादयः। तैजसाः सुवर्णादयस्ते
षां पार्थिवानां च रथ्याकर्दमचर्मकादीनां यथायथं कालादिभिः शुद्धिः। तत्रापि काकाद्युपघात
तारतम्येन देशकालावस्थाघनसारेण च। एतैरन्योन्ययुतायुतैः मिलितैः केवलैश्च। कालस्य पुनर्ग्रह
णं सुतत्वप्रदर्शनार्थं। अस्पृश्यस्पर्शे शुद्धिमुक्त्वा लेपविषयेप्याह। यत्पीठपात्रवस्त्रादि। येनतत्तेन।

धान्यदार्वस्थितंतून्नां रसतैजसचर्म्मणां। कालवाय्वग्निमन्त्रोयैः पार्थिवानां युतायुतैः॥ ११ ॥ अमे
ध्यालिप्तं यद्येन गंधलेपं व्यपोहति। भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते॥ १२ ॥ स्नानदानत
पोवस्थावीर्यसंस्कारकर्म्मभिः। मत्स्मृत्या चात्मनः शौचं शुद्धः कर्म्माचरेद्द्विजः॥ १३ ॥

क्षाराम्लोदका।
दिना गंधं च लेपं च व्यपोहति त्यजति। स्वगतं च मलं तत्पक्वा प्रकृतिं स्वमेवरूपं भजते। तस्य तत्र शौ
चं शोधकं यावता तत्क्षाराम्लादिना व्यपोहति तावत्प्रमाणं स्वरूपतः। आवृत्तितो वा तत्कर्त्तव्यमिष्यते
॥ ११ ॥ एवं तावद्द्रव्यशुद्धिरुक्ता। इदानीं कर्तृशुद्धिमाह। स्नानेति। अवस्था कौमारादिः वीर्यं शक्तिः। सं।
स्कार उपनयनादिः। कर्म्म संध्योपासनदीक्षादिलक्षणं। आत्मनः संस्कारस्य कर्तुः। एतैः स्नानादिभि
र्यथायथं तत्कार्यानुसारिणी शुद्धिः। इयं च शुद्धिर्न प्रवदारार्था किंतु विहितकर्मार्थेत्याह। शुद्ध इति।

९७

राम
६१

वस्तुशब्दोपात्तानां द्रव्याणां शुद्ध्यशुद्धी दर्शयति। द्रव्यस्येति चतुर्भिः। द्रव्येण तोयादिना शुद्धिः॥ मूत्रादिनात्व
शुद्धिः॥ वचनेन। शुद्धमशुद्धं वेति संदेहे शुद्धमित्येवं रूपेण ब्राह्मणवचनेन शुद्धिः। विपरीतेनाशु-
द्धिः॥ संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिः॥ अवघ्राणादिनात्वशुद्धिः॥ कालेन दशाहादिना नवोद
कादेः शुद्धिः पर्युषितान्नादेरशुद्धिः॥ अंत्यजाद्युपहतानां तडागाद्युदकानां महत्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी॥१०
शक्त्याशक्त्या सूर्योपरागादिस्नानाद्देः शक्तावप्यशुद्धिर्बालवृद्धातुरानशक्तान्प्रति शुद्धिः॥ बुद्ध्या

द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन च॥ संस्कारेणाथ कालेन महत्त्वाल्पतयाथ वा॥१०॥ शक्त्याश
क्त्याथवा बुद्ध्या समृद्ध्या च यदात्मने॥ अघं कुर्वन्ति हि यथा देशावस्थानुसारतः॥११॥ ॥

पुत्रजन्मादौ दशाहादूर्ध्वं हि ज्ञानेन शुद्धिः॥ अंतर्ज्ञानेनाशुद्धिः समृद्ध्या जीर्णमलवद्वस्त्रादेः संमर्दं प्र
त्यशुद्धिः॥ दरिद्रं प्रति शुद्धिः। तत्रापि विशेषमाह यदिति॥ एतेन च द्रव्यवचनादयो द्रव्याशुद्धिद्वारा आ
त्मने यदघं कुर्वन्ति तद्देशावस्थानुसारेणैव। यथा यथा वस्तु कुर्वन्ति। न सर्वतः। तथा हि निर्भय एव देशे
कुर्वन्ति। न तु चोराद्याकुले। तथा रोगादिव्यतिरिक्तयुवाद्यवस्थायामेव कुर्वन्ति। न बाल्यरोगाद्यवस्था
यामिति। तथा च स्मृतिः देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्प
येत्॥११॥

अतो गुणदोषनियमविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमित्यभिप्रेत्याह। यतो यत इति॥१७
यथाप्रवृत्तप्रवृत्तिपरत्वं वेदस्य निराकर्तुं प्रवृत्तिमार्गस्यानर्थहेतुतां दर्शयति। विषयेष्विति चतुर्भिः॥ सं
गआसक्तिः॥ तत्र तेषु विषयेषु येन प्रतिहन्यते कामः तेन सह कामादेव कलिः कलहो विवादः॥१८

यतो यतो निवर्तेत विमुच्येत ततस्ततः॥ एष धर्मो नृणां क्षेमः शोकमोहभयापहः॥१७॥ विषयेषु गु
णाध्यासात्पुंसः संगस्ततो भवेत्॥ संगात्तत्र भवेत्कामः कामादेव कलिर्नृणां॥१८॥ कलेर्दुर्विषहः
क्रोधस्तमस्तमनुवर्तते॥ तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतं॥१९॥ तया विरहितः साधो जंः
तुः शून्याय कल्पते॥ ततोऽस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च॥२०॥ विषयाभिनिवेशेन ना
त्मानं वेद नापरं॥ वृक्षजीविकया जीवन्व्यर्थं भस्त्रेव यः श्वसन्॥२१॥ ॥ ॥

दुर्विषहस्तीव्रः तमः संमोहः। तं क्रोधं चेतना कार्याकार्यस्मृतिः॥ द्रुतं शीघ्रं॥१९॥ शून्याय कल्प
ते असत्तुल्यो भवतीत्यर्थः। स्वार्थविभ्रंशः पुरुषार्थहानिः। मूर्छितमृततुल्यस्य॥२०॥ तत्तुल्यत्व
प्रपंचयति। विषयेति। व्यर्थं वृक्षजीविकयैव यो जीवन्वर्तते स मूर्छितुल्यः अत एव यो भस्त्रे
व श्वसन्वर्तते स मृततुल्यः अतः स्वार्थनाशइत्यर्थः॥२१॥ ॥ ॥ ॥

मंत्रशुद्धिमाह। सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्य शुद्धिः॥ कर्मशुद्धिमाह। ईश्वरार्पणं कर्मणः शुद्धिः। धर्मा-
धर्थशुद्ध्याशुद्धी प्रपंचतः प्रदर्श्योपसंहरति। धर्म इति। देशकालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः सं-
पद्यते। एतेषां यो विपर्ययः सोऽधर्मः। तद्धेतुरित्यर्थः॥१४॥ अयं च गुणदोषविभागो न वास्तव इत्याह। क्व-
चिदिति। आपदि प्रतिग्रहो गुणोऽन्यथानापदि निषिद्धत्वाद्दोषः॥ परधर्मश्च परस्य गुणोऽपि स्वस्य दोषः। दोषो-
ऽपि कुटुंबत्यागादिर्विरक्तादेर्न दोषः॥ अपि तु विधिबलेन गुणः। एवं चायं गुणदोषयोरेकस्मिन्नेवार्थे नि-

मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं॥ धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः॥१४॥ क्वचिद्गुणो-
ऽपि दोषः स्याद्दोषोऽपि विधिना गुणः॥ गुणदोषार्थनियमस्तद्भिदामेव बाधते॥१५॥ समानकर्माचर-
णं पतितानां न पातकं॥ औत्पत्तिको गुणः संगो न शयानः पतत्यधः॥१६॥

यमः गुणदोषार्थो यो
नियमः नियामकं शास्त्रं स तयोर्भेदमेव बाधते॥१५॥ दोषस्य क्वचिन्न दोषत्वाभावे गुणत्वे चोदाहर-
णं दर्शयति। समानस्य तस्यैव कर्मणः सुरापानादेराचरणं अपतितानां पतनहेतुरपि जात्या कर्मणा
वा पतितानां पुनः पातकं अधिकारभ्रंशकं न भवति॥ पूर्वमेव पतितत्वात्। अतोऽत्र दोषस्यापि दोष-
ता नास्तीत्यर्थः॥ तथा संगोऽपि यो यतेर्दोषः स गृहस्थस्यौत्पत्तिकः पूर्वं स्वीकृतो न दोषः। अपि तु गुणः॥
अतो भार्यामुपेयादित्यादिविधानात्॥ उभयत्र दृष्टांतः पूर्वमेवाधः शयानो यथा न पततीति॥१६॥

कुबुद्धितां प्रपंचयति। कामिन इत्यर्थभिः ॥ कामित्वात्कृपणाः ॥ ततो नु ब्धास्तम्माकुलाः ॥ ततः पुष्पेष्ववांतरफ
लेषु परमफलबुद्धयः ॥ अत एव अग्निमुग्धाः अग्निसाध्यकर्माभिनिवेशेन लुप्तविवेकाः ॥ ततश्च धूमतां
ताः धूममार्गाः ते येषां ते स्वंलोकं आत्मतत्वं ॥ तथा च श्रुतिः ॥ कश्चिद्द्वा अस्माल्लोकात्प्रेत्य आत्मानं वेद
अयमहमस्मीति कश्चित् स्वंलोकं न प्रतिजानाति अग्निमुग्धो हैव धूमतांत इति ॥ २६ ॥ कोसौ स्व
लोकस्तमाह। नेति। त्वद्दिस्थमात्मानं मां स्वंलोकं। न तु त्वद्दिस्थमहंकारास्पदं जानन्त्येव ॥ सत्यं परमा

कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः ॥ अग्निमुग्धा धूमतांताः स्वंलोकं न विदंति ते ॥ २६ ॥ न
ते मामंग जानंति त्वद्दिस्थं यइदंयतः ॥ उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः ॥ २७ ॥ रामराम

त्मानं तु न जानंतीत्याह। यइदं। यद्व्यतिरिक्तं जगन्नास्ति ॥ कुतः यतश्चोत्पद्यते ॥ यत इदं जगत् जातं तं
कुतो न जानंति ॥ हि यस्मात्। उक्थं कर्मैव शस्त्रं शंस्यं कथनीयं पशुहिंसासाधनं वा येषां ते अतः
केवलं असुतृपः प्राणतर्पणपराः ॥ नीहारं तमः तेन व्याप्तानि चक्षूंषि येषां ते यथा संनिहितमपि
न जानंति तद्वत् ॥ तथा च श्रुतिः नतं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव नीहारेण प्रा
वृत्ता जल्प्या चासुतृप उक्थशासश्चरंतीति ॥ २७ ॥ ॥ ॥ ॥

न नु प्रत्युत स्वर्गादि फलश्रवणात्कुतः स्वार्थविभ्रंशः तत्राह इयं फलश्रुतिः न श्रेयः परमपुरुषार्थपरा न भवतीत्य र्थः किंतु बहिर्मुखानां नृणां मोक्षविवक्षया अवांतरफलैः कर्मसु रुच्युत्पादनमात्रं यथा भैषज्ये औषधे रोचनं रुच्यु त्पादनं तथा हि पिब निम्बं प्रदास्यामि खलु ते खंडलड्डुकान् पित्रैवमुक्तः पिबति न फलं तावदेव तु ॥ २१ ॥ नन्वेवं कर्म कांडे मोक्षस्य नामापि न श्रूयते ॥ कुत एवं व्याख्यायते। यथाश्रुतस्याघटनादित्याह। उत्पत्त्येति द्वाभ्यां। उत्पत्त्या स्व भावत एव कामेषु पश्वादिषु। आयुरिंद्रियबलवीर्यादिषु ॥ स्वजनेषु पुत्रादिषु अनर्थहेतुषु परिपाकतो दुःखहे

फलश्रुतिरियं नृणां न श्रेयो रोचनं परं ॥ श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनं ॥ २२ ॥ उत्पत्त्यैव हि कामेषु प्रा णेषु स्वजनेषु च ॥ आसक्तमनसो मर्त्या आत्मनोनर्थहेतुषु ॥ २३ ॥ नतानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि कथं युंज्यात्पुनस्तेषु तांस्तमो विशतो बुधः ॥ २४ ॥ एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः ॥ फलश्रुतिं कु सुमितां न वेदज्ञा वदंति हि ॥ २५ ॥

तुषु ॥ २३ ॥ अतस्तान् स्वार्थं परमसुखमविदुषः ॥ अतो नतान् प्रह्वीभूता न्वेदो यद्बोधयति तदेव श्रेय इति विश्वसिता नित्यर्थः ॥ तानेवंभूतान्वृजिनाध्वनि कामवर्त्मनि देवा दियोनिषु भ्राम्यतः ततः पुनस्तमः वृक्षादियोनिं विशतः ॥ पश्वकामइति आयुरिंद्रियादिकाम इति च पु त्रादिकाम इति च कथं पुनस्तेष्वेव कामेषु स्वयं बुधो वेदो युंज्यात् प्रवर्त्तयेत् ॥ तथा सत्यनाप्तः स्यादिति भा वः २४ कथं तर्हि कर्ममीमांसकाः फलपरतां वदंति वेदस्य तत्राह एवमिति व्यवसितं वेदस्याभिप्रायं कु सुमितां अवांतरफलस्य रोचनया रमणीयां परमफलश्रुतिं वदंति। कुतस्ते कुबुद्धयस्तदाह हृदिय स्मा द्वेद

त्तदिसंकल्पेत्युक्तं। तमेवसंकल्पंदर्शयति॥ इष्ट्वेति। तस्यभोगस्यांतेमहाशालामहागृहस्थाः॥३२॥ ततः किं। मित्यत आह एवमिति। अतोमस्नवणत्वाभावान्नित्यंसंसारिणोभवंतीत्यर्थः॥३३॥ तदेवंफलद्वारेणपरत्वं। निराकृत्यप्रकृतंनिवृत्तिपरत्वमेवोपसंहरति। वेदाइति। कर्मब्रह्मदेवताकांडविषयाइमेवे दाः ब्रह्मात्मविषयाः ब्रह्मैवात्मानसंसारीत्येतत्पराः। तत्परत्वाप्रतीतौचफलश्रुतिरियंमहाणां

इष्ट्वेहदेवतायज्ञैर्गत्वारंस्यामहे दिवि॥ तस्यांतइहभूयास्मोमहाशालामहाकुलाः॥३२॥ एवंपुष्पितयावाचाव्याक्षिप्तमनसांनृणां॥ मानिनांचातिस्तब्धानांमद्वाक्यंपिनरोचते॥३३॥ वेदाब्रह्मात्मविषयास्त्रिकाण्डविषयाइमे॥ परोक्षवादाऋषयःपरोक्षंममचप्रियं॥३४॥

नश्रेयोरोचनंपरं। श्रेयोविवक्षयाप्रोक्तं यथाभैषज्यरोचनमित्युक्तमेवकारणमनुस्मारयतिप रोक्षेति॥ ऋषयोमंत्राः तत्तद्द्रष्टारोवा। तत्किमिति। यतःपरोक्षमेवममचप्रियं। अयंभावः शुद्धांतःकरणैरेवैतद्बोद्धव्यंनान्यैरनधिकारिभिः। मयाकर्मत्यागेनभ्रंशप्रसंगादिति॥३४॥ रामराम

वेदतात्पर्याज्ञानाद्धान्यान्यजंतीत्याह्तत्नेपरोक्षमस्फटंमममतमविज्ञायदेवाद।न्यजन्तइत्युत्तरेणा न्वयः।स्वमत
मेवाह।हिंसायांमांसभक्षणार्थंनत्फलार्थंचयदिरागःस्यात्तर्हियज्ञएवेत्यभ्यनुज्ञा तत्तद्दारापरिसंख्येयंनत्व
वश्यकत्वेनचोदनेत्यर्थःस्वर्गपश्वादिकामनयापिनित्यनैमित्तिकयोःकामविशेषानुबंधोनास्ति।तथापिकर्म्मणापितृलो
कइतिश्रुतेःसामान्यतःपितृलोककामनास्त्येव।अंतःकरणशुद्धिकामनावेतिभावःतदुक्तं।नाकामस्यक्रि

तेमेमतमविज्ञायपरोक्षंविषयात्मकाः॥हिंसायांयदिरागःस्याद्यज्ञएवनचोदना॥२८॥हिंसाविहा
रात्ह्यालब्धैःपशुभिःस्वसुखेच्छया॥यजंतेदेवतायज्ञैःपितृभूतपतीन्खलाः॥२९॥स्वप्नोपममसुंलो
कमसंतंश्रवणप्रियं॥आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्यथावणिक्॥३०॥रजःसत्वतमोनिष्ठारजः
सत्वतमोजुषः॥उपासतइंद्रमुख्यान्देवादीन्नतथैवमाम्॥३१॥

याकाचिन्नदृश्यतेचेहकर्हिचित्॥
यद्यद्धिकुरुतेजन्तुस्तत्तत्कामस्यचेष्टितमिति॥अज्ञत्वादेवहिंसयाविहारःक्रीडायेषांते॥२९॥किंचते
अतिमंदबुद्धयइत्याह।स्वप्नोपममिति।अमुंपरलोकंआशिषश्चास्मिंलोकेसंकल्प्यननुनिश्चित्यविद्य
मानंतुल्याद्दत्यजंतिकर्म्मसुविनियोजयंतियथावणिक्दुस्तरसमुद्रादिलंघनेनबहुधनार्जनेच्छयासि
द्धंधनंत्यजन्तुभयभ्रष्टोभवतितद्वदित्यर्थः॥३०॥अतोरजःसत्वतमोनिष्ठास्तेरजःसत्वतमोजुषःस्वानु
रूपानिंद्रादीनेवोपासतेनतुमां।यद्यपीन्द्रादीनामपिमदंशत्वान्मदुपासनमेवतत्।तथापियथावन्नो

भा०ए०
१०१

ततोवैखर्याख्याख्यावद्वृत्याचाच‍उत्पत्तिप्रकारंसदृष्टांतमाह॥ यथेतित्रिभिः॥ हृदयात्सकाशात्।मुखात्हा रात्।उद्गमतेबहिःप्रकटयति। दार्ष्टांतिकेदर्शयति॥आकाशादिति॥ प्राणःतदुपाधिर्हिरण्यगर्भरूपः प्रभुःभगवान्तेनरूपेण॥ छंदोमयोवेदमूर्तिः॥ स्वतस्त्वमृतमयः घोषवान्नादोपादानवान्।मनसानिमित्तभू तेननिमित्तनामेवदर्शयति॥स्पर्शादीन्वर्णान्रूपयतिसंकल्पयतीतिस्पर्शरूपितेन।स्पर्शग्रहणमु पलक्षणं॥ हृदयाकाशाद्वृतीसृजतीतित्ती यच्छ्लोकेनाचयः वृत्तीशब्दार्थव्याख्यानायविशेषणानि।

यथोर्णनाभिर्हृदयादूर्णामुद्गमतेमुखात्॥आकाशाद्घोषवान्प्राणोमनसास्पर्शरूपिणा॥ ३७॥छंदोम योमृतमयःसहस्रपदवीप्रभुः॥ ॐकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां॥ ३८॥ विचित्रभाषा वितताछंदोभिश्चतुरुत्तरैः॥अनंतपारांबृहतींसृजत्याक्षिपतेस्वयं॥ ३९॥ ॥ ॥

सहस्रपदवीबहुमार्गो॥ तदेवाह॥ॐकारान्तरःकंठादिसंगेनव्यंजितैःस्पर्शादिभिर्भूषितां। ॐकारस्त्वात्रत्व ष्मतः सूक्ष्मोऽभिप्रेतः॥ नत्वकारादिवर्णरूपः तस्यव्यंगपकोटित्वात्॥ तत्रस्पर्शाः कादिपंचवर्गाःस्वराअ कारादयःषोडश।ऊष्माणःशषसहाः अंतस्थायरलवाः॥ ३८॥ विचित्राभिर्लौकिकवैदिकभाषाभिर्वित तां॥ यथोत्तरंचत्वार्यक्षराणिउत्तराणिअधिकानियेषांतैः छंदोभिरुपलक्षितां॥ एवमनंतपारांसृजति॥ स्वयमेवाक्षिपत्तेउपसंहरतिच॥ ३९॥

राम
१०१

ननु वेदज्ञा अपि जैमिन्यादयः किमिति तथा न वर्णयंति मां विना तत्त्वतो वेदं न दर्शवान् कोपि वेदेत्याशयेनाह शब्द
ब्रह्मेति। यावत्समाप्ति। स्वरूपतोऽर्थतश्च दुर्विज्ञेयं तच्च सूक्ष्मस्थूलं चेति द्विविधं। तत्र सूक्ष्मं तावत्
स्वरूपतो दुर्ज्ञेयमित्याह। प्राणेंद्रियमनोमयं प्रथमं प्राणमयं परारूपं ततो मनोमयं पश्यंत्याख्यं ततइं
द्रियमयं मध्यमाख्यं तस्य वाग्व्यंजकत्वेन वागिंद्रियप्रधानत्वात्। किंच अनंतपारं समस्तप्राणिदेहे
यस्यानिर्विशेषस्य च तस्य कालतो देशतश्चापरिच्छेदात्। अर्थतो दुर्ज्ञेयत्वमाह। गंभीरं निगूढार्थं
अतो दुर्विगाह्यं। मतिप्रवेशानर्हं तथा च श्रुतिः॥ चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनी
षिणः। गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति। अयमर्थः। वाचः शब्दब्रह्मणः परिमिता

शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयं। अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत्॥३५॥ मयोपबृंहितं भू
म्ना ब्रह्मणानंतशक्तिना॥ भूतेषु घोषरूपेण विसेषूर्णेव लक्ष्यते॥३६॥

निगमेनानिपद्यते ज्ञायतेपरं त
त्त्वमेभिरितिपदानि रूपाणि चत्वारि तानि चत्वार्यपि ये मनीषिणोंतर्दृश्यः ते विदुर्नान्ये। यतो गुहायां देहमध्ये
त्रीणि निहितानि नेंगयंति स्वरूपेण न प्रकाशयंति। अतः केवलं वाचः तुरीयं चतुर्थं भागं वैखरीरूपं मनुष्याः
प्राणिनो वदंति तमपि वदन्नेवन तु तत्त्वतो जानंति॥३५॥ तत्र मनीषिभिरेव ज्ञेयं सूक्ष्मं रूपं दर्शयति। मये
ति। मयांतर्यामिणोपबृंहितमधिष्ठितं। अतः स्थूलत्वेप्यपरिच्छेदमाह। भूम्नेति। अधिष्ठातृत्वेप्यविकारि
त्वमाह। ब्रह्मणेति। अविकृतस्यापि नियंतृत्वं घटयति। अनंतशक्तिना। भूतेषु सर्वप्राणिषु घोषरूपेण
नादरूपेण लक्ष्यते मनीषिभिः। अंतःसूक्ष्मत्वेन दर्शनेदृष्टांतः। विसेषूर्णा तंतुरिवेति॥३६॥ ॥

भा॰ए॰
१०२

द्वाविंशे तत्त्वसंख्यानामविरोधो विधीयते॥ पुंप्रकृत्योर्विवेकश्च जन्ममृत्युविधादिच॥१॥ तदेवं वेदानां प्र
वृत्तिपरत्वं निराकृत्य मोक्षपरत्वं निर्णीतं संप्रति च मोक्षपरत्वेपि न तदर्थांतरे विवादाः॥ तथाहि। केचित्तत्त्वसं
ख्यासु विवदंते तत्रापि वाच्यार्थसदसत्त्वे॥ आत्मतत्त्वैकत्वैकत्वनानात्वादिषु। तत्र किं सत्य
मिति जिज्ञासया पृच्छति कतीति॥ ऋषिभिरागमेषु बहुधा संख्यातानि तेषु कति युक्तानीत्य
र्थः॥ भगवन्मतानुवादपूर्वकं बहुधासंख्यानं प्रपंचयति नवेति त्रिभिः॥ त्वं तावदष्टाविंशति

उद्धव उवाच॥ कतितत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो॥ नवैकादशपंचत्रीण्यात्थ त्वमिति शु
श्रुम॥१॥ केचित्षड्विंशतिं प्राहुरपरे पंचविंशतिं॥ सप्तैके नव षट्केचिच्चत्वार्येकादशापरे॥२॥ केचि
त्सप्तदश प्राहुः षोडशैके त्रयोदश॥ एतावत्त्वं हि संख्यानमृषयो यद्विवक्षया॥३॥ गायंति पृथ
गायुष्मन्निदं नो वक्तुमर्हसि॥ श्रीभगवानुवाच॥ युक्तं च संति सर्वत्र भाषंते ब्राह्मणा यथा॥ मायां
मदीयामुद्गृह्य वदतां किंनु दुर्घटं॥४॥

तत्त्वान्यात्थ तानि च वयं शुश्रुम श्रुतवंतः॥१॥ एतावतीनां
भावा एतावत्त्वं नानात्वमित्यर्थः॥ यद्विवक्षया यत्प्रयोजनमभिप्रेत्य च गायंति। आयुष्मन्नित्यम
न्त्रे॥२॥ विवक्षाभेदेन सर्वं युक्तमेव मायया च किं नाम न युक्तमित्याह॥ युक्तमिति। यथा ब्राह्मणा
भाषंते तद्युक्तं च। न वस्तुतः। यस्मात्संति सर्वत्रांतर्भूतानि सर्वाणि तत्त्वानि। किंच मायामिति॥
असत्त्वेपि मायाश्रयत्वान्न घटत इवेत्यर्थः। उद्धृत्य स्वीकृत्य। न हि मरीचिजलपरिमाणादिविवादे

२०२

रामः
१०२

न्पुकान्तिविकं छंदोभिर्दर्शयति॥गायत्रीति॥तत्र चतुर्विंशत्यक्षरा गायत्री।ततश्चतुरक्षरवृद्ध्योष्णिगादिछंदांसि॥अत्यष्टिः
अतिजगती।अतिविराडित्यर्थः।एतैः छंदोभिरुपलक्षितामिति पूर्वेणैवान्वयः॥प्रत्नोत्वहत्यपि साकल्येन स्वरूपतो दु
र्ज्ञेयत्वमुक्तं॥४०॥अर्थतोऽपि दुर्ज्ञेयत्वमाह॥किमिति कर्मकांडे विधिवाक्यैः किं विधत्ते देवताकांडे मंत्रवाक्यैः किमा
चष्टे प्रकाशयति॥ज्ञानकांडे च मनूद्य विकल्पयेत् निषेधार्थमित्येवमस्याः हृदयं तात्पर्यं मत्तोऽन्यः कश्चिदपि

गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च॥त्रिष्टुब्जगत्यतिछंदो ह्यत्यष्ट्यतिजगद्विराट्॥४०॥किं विधत्ते
किमाचष्टे किमनूद्य विकल्पयेत्॥इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन॥४१॥मां विधत्तेऽभिधत्ते मां विक
ल्प्यापोह्यते त्वहं॥एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदां॥मायामात्रमनूद्यांते प्रतिषिध्य प्रसीद
ति॥४२॥इति श्रीभागवते महापुराण एकादशस्कंधे भगवदुद्धवसंवादे एकविंशोऽध्यायः॥२१॥राम

न्वेद॥४१॥ननु तर्हि त्वं मत्कृपया कथय उ मिति कथयति॥मामेव यज्ञरूपं विधत्ते॥मामेव तत्तद्देवतारूपमभि
धत्ते नमन्त्रः पृथक् यज्ञाकाशादिप्रपंचजातं तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना विकल्प्यापोह्य
ते तदप्यहमेवानमन्तः पृथगस्ति कुत इत्यपेक्षायां सर्ववेदार्थसंक्षेपतः कथयति॥एतावानेव सर्वेषां वेदाना
मर्थः।तमेवाह।शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य नेह नानास्ति किंचनेति निरूति।
षिध्य प्रसीदति निवृत्तव्यापारो भवति॥अयं भावः यथा त्वंकुरयोर सः स एव तद्विस्तारभूत नानाकाण्डशा
खास्वपि तथैव प्रणवस्य योऽर्थः परमेश्वरः स एव तद्विस्तारभूतानां सर्ववेदकाण्डशाखानामपि सर्वगत्व तन
न्य इति॥नित्यमुक्तः स्वतः सर्ववेदकृत्सर्ववेदवित्॥स्वपरज्ञानदानाय स्तवं दयुरुमीश्वरं॥४२॥इति का

अविरोधमुपसंहरति। अतः अमीषां तत्वानां पौर्वापर्यं कारणकार्यत्वं तत्प्रसंख्यानं च न्यूनाधिकमभीप्सितं वादिनां मध्ये यथा विवक्षया यद्युक्तं यस्य मुखं प्रवर्त्तते। तत्सर्वं विविक्तं निश्चितं वयं गृह्णीमः। उक्तन्याये न सर्वत्र युक्तेः संभवात् ॥९॥ ननु कार्यकारणात्तत्त्वानां पृथक्त्वापृथक्त्व विवक्षया भवतु नाम संख्याभेदः। जीवेश्वरयोस्तु कथं भेदाभेद विवक्षया षड्विंशति पंचविंशति पक्षोपपत्तौ ॥ अत आह। अनादी

पौर्वापर्यमतो मीषां प्रसंख्यानमभीप्सितं ॥ यथा विविक्तं यद्वक्त्रं गृह्णीमो युक्तिसंभवात् ॥९॥
अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनं ॥ स्वतो न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥१०॥ पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ॥ तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गुणः ॥११॥

ति। स्वतो न संभवति। अन्यतस्तु संभवात्॥ स्वतः सर्वज्ञेन परमेश्वरेणान्येन भवितव्यमिति। षड्विंशतिपक्षाभिप्रायइत्यर्थः ॥१०॥ कथन्तर्हि पंचविंशतिपक्षः तत्राह। पुरुषेति। वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रूपत्वात्। अतस्तयोरत्यन्तमन्यत्वकल्पना अपार्था व्यर्था। एवं पंचविंशतिपक्षप्रवृत्तीरित्यर्थः नन्वेवमपीश्वरप्रसादलभ्यज्ञानस्य पृथक्त्वात्पक्षद्वयमपि न घटते। अत आह। ज्ञानं चेति॥ सत्त्वगुणवृत्तित्वान्न दत्तभर्त्तामित्यर्थः ॥११॥

ननु यदि सर्वमपि युक्तं कुतो विवादः यदि च मायैवावलम्बनं कुतो हेतुं प्रति विवादः तत्राह नैतदिति। हे-
तुं प्रति च विवदमानानां मदीया दुरतिक्रमाः शक्तयः सत्त्वाद्या अन्तःकरणवृत्तिविशेषरूपेण परिणताः
एव हेतुरित्यर्थः॥५॥ तासां विवादहेतुत्वमुपपादयति। यासामिति॥ यासां व्यतिकरात्क्षोभात्॥ वद-
तां पदं विषयः विकल्पो भेद आसीत्॥ अन्तःकरणवृत्तिविकल्पो नानात्वमूलभूतः एतदेव व्यतिरे-
केण द्रढयति। शमदमयोर्हेतुर्बोधस्तस्मिन्प्राप्ते विकल्पोऽप्येति लीयते। तं च विकल्पमनु वादः शाम्य-

नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा॥ एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः॥५॥ यासां व्यति-
करादासीद्विकल्पो वदतां पदं॥ प्राप्ते शमदमेऽप्येति वादस्तमनु शाम्यति॥६॥ परस्परानुप्रवेशा-
त्तत्त्वानां पुरुषर्षभ॥ पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं॥७॥ एकस्मिन्नपि दृश्यन्ते प्रविष्टानी-
तराणि च॥ पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः॥८॥

तीति॥६॥ संति सर्वत्रेति यदुक्तं तत्प्रपंच-
यति परस्परेति द्वाभ्यां। अन्योऽन्यस्मिन्ननुप्रवेशात् वक्तुर्यथा विवक्षितं तथा पूर्वं कारणं अपरं कार्यं
कारणभावेन प्रसंख्यानं भवति। यद्वा। पूर्वा अल्पसंख्या अपरा अधिकसंख्या तयोर्भावः पौर्वाप-
र्यं तेन प्रसंख्यानं गणनमिति॥७॥ अनुप्रवेशं दर्शयति एकस्मिन्नपीति। पूर्वस्मिन्कारणभूते
तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानि मृदि घटवत् अपरस्मिन्कार्यतत्त्वे कारणतत्त्वान्यनु-
गतत्वेन प्रविष्टानि घटे मृद्वत्॥८॥ ॥ ॥ ॥ ॥

एकादश दर्शयति । श्रोत्रमिति । दर्शनं चक्षुः । ज्ञानशक्तयः ज्ञानेंद्रियाणि पंच वागादि पाय्वंतानि हंहे केनो
क्तानि चत्वारि अंघ्रिश्चेति । कर्माणि कर्मेंद्रियाणि पंच । उभयं उभयात्मकं मनः ॥ अंग हे उद्धव । एवमे
तान्येकादश ॥१५॥ पंच दर्शयति । शब्द इति । शब्दादीनि विषयतया परिणतानि पंचमहाभूतानि
ननु गत्यादिभिस्तत्त्वाधिक्यं पतत्त्वयेपि स्यात् । नेत्याह गतीति । गतिश्च उक्तिश्च उत्सर्गश्च शिल्पं च ॥
तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि न तत्त्वांतराणीत्यर्थः ॥१६॥ तदेवं मतत्तत्त्वयत
त्वसंख्याभेदं निरूप्यापद्विवक्षया गायत्रीति यत्प्रश्नतत्तन्मतत्तात्पर्यं दर्शयति । सर्गादाविति

श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वंघ्रिः कर्म्माण्यंगोभयं मनः ॥
१५ ॥ शब्दः स्पर्शो रसो गंधो रूपं चेत्यर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ १६ ॥ स
र्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी ॥ सत्वादिभिर्गुणैर्धत्ते पुरुषोव्यक्त ईक्षते ॥ १७ ॥ व्यक्ताद
यो विकुर्वाणा धातवः पुरुषेक्षया ॥ लब्धवीर्याः सृजंत्यंडं संहताः प्रकृतेर्बलात् ॥ १८ ॥ राम

कार्याणि षोडश विकाराः । कारणानि महदादीनि सप्त तद्रूपिणी सती प्रकृतिः अस्य विश्वस्य सर्गा
दौ गुणैः सत्वाद्यवस्थां धत्ते । उपादानकारणरूपत्वात् । पुरुषस्तु अव्यक्तः अपरिणामी निमि
त्तभूतः केवलमीक्षते । अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति ॥ १७ ॥ तत्वेश्वरस्य कार्या
स्पनदंतर्भावमभिप्रेत्याह । व्यक्तादय इति महदादयः प्रकृतेरुत्पन्ना ये धातवस्ते विकुर्वाणाः
पुरुषेक्षणालब्धवीर्याः प्रकृतेर्बलात्तनामाश्रित्येत्यर्थः ॥ १८ ॥ ॥ ॥

ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणः स्यात्। अत आह प्रकृतिरिति। गुणसाम्यं हि प्रकृतिः अतस्तद्विशेषरूपा गुणास्तस्या एव न त्वात्मनो जीवस्य अकर्तृत्वादस्य स्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः॥१२॥ अतः सत्त्वं सत्त्वमयं ज्ञानं प्रकृतेर्गुण इति पूर्वेणैव संबंधः॥ ननु तन्निर्वर्त्यं कर्म च ज्ञानं च तत्त्वांतरं स्यात् न रजः कर्म रजसो वृत्तिः अज्ञानं च तमसः। अतः कर्माज्ञानयो रजस्तमोद्वारा प्रकृतावेवांतर्भाव इति

प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नात्मनो गुणाः॥ सत्त्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः॥१२॥ सत्त्वं ज्ञानं रजः कर्म तमोज्ञानमिहोच्यते॥ गुणव्यतिकरः कालः स्वभावः सूत्रमेव च॥१३॥ पुरुषः प्रकृतिर्व्यक्तमहंकारो नभो निलः॥ ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव॥१४॥ ॥

भावः। तथापि कालस्वभावयोस्तत्त्वांतरता स्यात्॥ न गुणानां व्यतिकरो यस्मात्॥ स ईश्वर एव कालो नाम। स्वभावो नाम सूत्रं महत्तत्त्वमेव तस्य सर्वशक्तिमत्त्वात्। तदेवं ज्ञानादीनां यथायथमंतर्भावान्न पक्षद्वयेपि तत्त्ववृद्धिः एतच्च पक्षांतरेष्वपि ज्ञेयं। स्वमते तु गुणानामागमापायित्वात्प्रकृतेर्भेदो विवक्षितः अतो गुणास्त्रीणि तत्त्वानि॥ अपराणि पंचविंशतिस्तत्त्वानि॥१३॥ पूर्वोक्तपक्षद्वयसाधारणं निदर्शयति पुरुष इति॥ सार्द्धद्वाभ्यां। व्यक्तं महत्तत्त्वं। नभआदीनि तन्मात्राणि मे मया॥१४॥

भा॰ए॰
१०५

तत्रपक्षतिप्रकृतिरिति। आत्मनाजडाजडस्वभावेनविलक्षणौ। अन्योन्यापाश्रयात्। परस्परपरिहारेणाप्रतीतेरित्यर्थः॥२५॥ तदेवव्यनक्तिप्रकृतौतत्कार्येदेहेप्रकृतिश्चात्मनितेनविनातस्याप्रतीतेः॥अहमित्यभेदप्रतीतेर्नदेहात्मनोर्भेदोलक्ष्यतइत्यर्थः॥इदंविवर्त्तमानंसंशयं नयेन युक्त्यानैपुण्यंप्रावीण्यंपतेः॥२६॥ अर्हसीत्युक्तं।तत्रहेतुमाह।हियस्मात्त्वत्तःत्वत्प्रसा

श्रीउद्धवउवाच॥प्रकृतिःपुरुषश्चोभौयद्यप्यात्मविलक्षणौ॥अन्योन्यापाश्रयात्कृष्णदृश्यतेनभिदातयोः॥२५॥प्रकृतौलक्ष्यतेह्यात्माप्रकृतिश्चतथात्मनि॥एवंमेपुंडरीकाक्षमहान्तंसंशयंहृदि॥२६॥छेत्तुमर्हसिसर्वज्ञवचोभिर्नयनैपुणैः॥त्वत्तोज्ञानंहिजीवानांप्रमोषस्तेत्रशक्तितः॥२७॥त्वमेवह्यात्ममायायागतिंवेत्थनचापरः॥श्रीभगवानुवाच॥प्रकृतिःपुरुषश्चेतिविकल्पःपुरुषर्षभ॥एषवैकारिकःसर्गोगुणव्यतिकरात्मकः॥२८॥ ॥

दादेव।अत्रज्ञानेप्रमोषःभ्रंशश्चतेशक्तितःमायातः।ननुस्वप्रकाशस्यात्मनःकथंज्ञानप्रमोषःज्ञानदानेनतत्प्रमोषेवाममकिंप्रयोजनंतवाहत्वमेवेति॥२७॥विकाराविकाराभ्यांनानात्वैकाभ्यांसापेक्षनिरपेक्षाभ्यांप्रकाशाप्रकाशाभ्यांचात्यंतभेदंवक्तुमाह।प्रकृतिःपुरुषश्चेतिविकल्पोत्यंतभेदएव॥२८॥

राम
१०५

105

एवंस्वमतमुपसंहृत्य मतांतरेष्वपि सामान्यतो निरूपितां घटनां विशेषतः सतात्पर्यां दर्शयति ॥ सप्तैवेति ॥ ज्ञानं जानातीति द्रष्टा जीवः उभयोर्द्रष्टृदृश्ययोराधार आत्मा चेति सप्त तत्र प्रकृत्यादीनां कारणत्वेन खादिष्वंतर्भाव उक्तः ज्ञानस्य जीवस्य च परत्वेन पामंतर्भावार्थमाह ॥ ततः तेभ्यः सप्तभ्यः ॥ १९ ॥ षडिति मतेपि भोक्तृ तिकस्य भूतांतर्भावं जीवस्य च परमात्मांतर्भावमाह ॥ तैर्युक्त इति ॥ २० ॥ अन्ने पार्थिवी आत्मना सह चत्वारि अन्नंतर्भावार्थमाह ॥ तैरिति ॥

सप्तैव धातवइति तत्रार्थाः पंच खादयः ॥ ज्ञानमात्मोभयाधारस्ततो देहेंद्रियासवः ॥ १९ ॥ षडित्यत्रापि भूतानि पंच षष्ठः परः पुमान् ॥ तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् ॥ २० ॥ चत्वार्येवेति तत्रापि तेज आपोन्नमात्मनः ॥ जातानीति रिदं जातं जन्मावयविनः खलु ॥ २१ ॥ संख्याने सप्तदशके भूतमात्रेंद्रियाणि च ॥ पंच पंचैक मनसा आत्मा सप्तदशः स्मृतः ॥ २२ ॥ तद्वत्षोडशसंख्याने आत्मैव मन उच्यते ॥ भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश ॥ २३ ॥ एकादशत्व आत्मासौ महाभूतेंद्रियाणि च ॥ अष्टौ प्रकृतयश्चैव पुरुषश्च नवेत्यथ ॥ २४ ॥ इति नानाप्रसंख्यानं तत्वानामृषिभिः कृतं ॥ सर्वं न्याय्यं युक्तिमत्वाद्विदुषां किमशोभनं ॥ २५ ॥

अवयविनः । कार्यस्य ॥ २१ ॥ भूतानि च मात्राणि च इंद्रियाणि च पंच पंच एकेन मनसा सह । आत्मा सप्तदशः ॥ २२ ॥ आत्मैव संकल्पयन् मन उच्यते । त्रयोदश पक्षे भूतानि तन्मात्रैरेकीकृतानि पंचैव । इंद्रियाणि च तत्प्रकाशकानि पंचैव ॥ मनश्चैकमिंद्रियाधिष्ठातृ ॥ आत्मा च द्विविधः एवं त्रयोदश । एकादशपक्षे पंच भूतानि पंचेंद्रियाणि जीवमनसोरात्मंतर्भावेनैतान्येवैकादश ॥ नवपक्षे तु अष्ट प्रकृतयः पुरुषश्च विकाराणामंतर्भावः ॥ २३ ॥ उपसंहरति ॥ इतीति । इति एभिः प्रकारैः प्रकृति पुरुष भेद

२१०

टी०

भा-ए०
१०६

चक्षुरादिदर्शितं त्रैविध्यमिंद्रियांतरेष्वप्यतिदिशति ॥ एवमिति ॥ यथा चक्षुः एवं त्वगाद्यपीत्यर्थः ॥ त्वक् स्पर्शो वा
युरिति श्रवणं शब्दो दिश इति । जिह्वा रसो वरुण इति । नासा गंधो ऽश्विनाविति चित्तेन युक्तमंतःकरणं
तमपि ॥ तत्र चित्तं चेतयितव्यं वासुदेव इति मनो मंतव्यं चंद्र इति बुद्धिर्बोद्धव्यं ब्रह्मेति । अहंकारोहंकर्त्तव्यं
रुद्र इत्येवं त्रिविधमित्यर्थः ॥ ननु पुनरपि चेल्लक्षणमात्रमेवोक्तं त्रिविधप्रपंचव्यतिरिक्तात्मप्राप्तिस्तु
कुतः स्यात् ॥ अहंकारनिवृत्त्या तत्कृतत्रिविधविकल्पनिवृत्त्यैवेत्याशयेनाह । योसौ अहं मदं का

एवं त्वगादिश्रवणादि चक्षुर्जिह्वादिनासादि च चित्तयुक्तं ॥ योसौ गुणात्तोभक्रुतो विकारः प्रधा
नमहत्तान्महतः प्रसूतः ॥ ३१ ॥ अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामसऐंद्रियश्च ॥ आत्म
परिज्ञानमयो विवादोस्ति नास्तीति भिदार्थनिष्ठः ॥ ३२ ॥

२०८

रः तमेवाह । गुणात्तोभक्रुतोनीति
तथा ॥ ततः परमेश्वरात्कालाद्यानिमित्तात् । प्रधानं महत्त्वमुपादानं यस्य तस्मात् महतः प्रसूतो विका
रः ॥ ३१ ॥ स त्रिवृत् त्रिविधः मोहमयस्य विकल्पस्य हेतुः । त्रिवृत्त्वमेवाह । वैकारिक इति सकृतो निवर्त्त
ते । आत्माज्ञानविलसितत्वात् ॥ तत् ज्ञानेनेत्याशयेनाह आत्मापरिज्ञानमय इति ॥ ननु कथं मो
हमयत्वं विकल्पस्याहंकारस्य वा केश्चित्सत्यत्वांगीकारात् तत्राह विवाद इति । अयं भिदार्थ
निष्ठो विवादोप्यात्मापरिज्ञानमय इत्यन्वयः ॥ यद्वा विवादः सर्वोपि भिदार्थनिष्ठ एव न तु वस्तु
मात्रनिष्ठः अतः परस्परयुक्तिभिरेव भेदस्य निराकृतत्वात् मोहमयत्वसिद्धमिति ॥ ३२ ॥ रामराम

राम
१०६

कृतइत्यपेक्षायांप्रकृतिशब्दोपात्तस्यदेहादिसंघातस्यविकारित्वंतावद्दर्शयति॥एषइतिद्वाभ्यां।एषसर्गःस्रष्टइतिसर्गोदेहादिसंघातःवैकारिकःविकारवान्॥अत्रहेतुःगुणव्यतिकरात्मकःगुणक्षोभकृतः२८॥नानात्वमाहममेति।विकल्पभेदंतद्बुद्धीश्च॥अनेकधात्वंप्रपंचयति वैकारिकःअनेकविकारवानपिस्थूलेनमार्गेणतावत्त्रिविधः त्रैविध्यमेवाह॥अध्यात्ममिति॥एकंरूपं॥२९॥तानि रूपाणिदर्शयति।दृक् अध्यात्मंरूपं अधिभूतं॥अत्ररंध्रेचक्षुर्गोलकेप्रविष्टं आर्कंवपुः अंशोधिदैवमितिसापेक्षप्रकारतामाह॥परस्परमिति।चक्षुषारूपंज्ञायते॥तदन्यथानुपपत्त्याचक्षुःज्ञापतेत

ममांगमायागुणमय्यनेकधा विकल्पबुद्धीश्चगुणैर्विधत्ते॥वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत्॥२९॥दृग्रूपमार्कंवपुरत्ररंध्रेपरस्परंसिध्यतियःस्वतःखे॥आत्मायदेषामपरोयआद्यःस्वयानुभूत्याखिलसिद्धिसिद्धिः॥३०॥

स्पष्टत्वन्यथानुपपन्नात दधिष्ठात्रीदेवताज्ञायतेइतिसंबंधः॥ततश्चक्षुषःप्रवृत्तिः ततो रूपज्ञानमित्येवमेतत्त्रयंपरस्परंसिध्यति॥अत्ररंध्रइति विशेषणव्यावर्त्यमाहदृष्टं तोपयोगितयायस्तुखे आकाशे अर्कोवर्ततेमंडलात्मासतुस्वतःसिध्यति।चक्षुर्विषयत्वेपिप्रतियोग्यपेक्षाभावमात्रेणस्वतइत्युक्तं॥इदानीमात्मनोविकारित्वाद्यभावेनभेदमाह॥यत्तुयस्मात् आत्माएषामध्यात्मादीनामाद्यःकारणं॥अतएकरूपः अभिन्नश्च॥तस्मादेभ्योपरोभिन्नःस्वप्रकाशत्वादपीत्याहस्वयानुभूत्यास्वतःसिद्धप्रकाशेनाखिलानांसिद्धीनांपरस्परप्रकाशकानामपिप्रकाशकः॥सर्वेषामपिसामान्यतश्चित्प्रकाशविषयत्वात् अत एवतस्यस्वप्रकाशत्वंसिद्धं ॥३०॥

ततः किमत आह विषयेति ॥ कर्मोपस्थापितदेवादिदेहे घटत्वेनाभिनिवेशेनात्मानं पूर्वदेहं पुनर्मनो नस्मरेदिति
यत्तस्यैव यातनादेहाभिनिवेशनभयशोकादेः देवादिदेहाभिनिवेशन वा हर्षेनषत्तिषादेर्हेतोः पूर्वदे
हे अत्यंतविस्मृतिः अहंकारनिद्दत्तिस्तदभिमाने नो जंतोर्जीवस्य मृत्युरुच्यते ॥ ननु देहवन्नाशः
३७ ॥ जन्मतु विषयस्य देहस्य आत्मतयास्वीकृतिः अभिमानंप्राहुः ॥ ननु देहवदुत्पत्तिं न च पुत्रादिदे
हवत्प्रीत्यतिशयमात्रेण किंतु सर्वभावेन अभेदेन। अभिमानमात्रेणोत्पत्तिमरणे दृष्टांतद्वयं
यथा स्वप्नश्च मनोरथश्चेत्यर्थः ॥ ३८ ॥ दृष्टांतो विवृणोति। स्वप्नमिति ॥ तत्र वर्त्तमानस्वप्नादौ पूर्वं

विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः ॥ जन्तोर्वैकस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ॥ ३७ ॥ जन्म
त्वात्मतया पुंसः सर्वभावेन भूरिद ॥ विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ॥ ३८ ॥ स्वप्नं मनोरथं
चेत्थं प्राक्तनं न स्मरत्यसौ ॥ तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ॥ ३९ ॥ इंद्रियायनसृष्ट्येदं
त्रैविध्यं भाति वस्तुनि ॥ बहिरंतर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ॥ ४० ॥ चेति अपूर्वमिवेति चान्वयः। पू
र्वसिद्धमप्यात्मानमपूर्वमद्य जातमिव पश्यतीत्यर्थः ॥ ३९ ॥ उपसंहरति। इंद्रियाणामयनं मनः तत्
स्य देहांतराभिनिवेशेन या सृष्टिः उत्पत्तिः तया वस्तुनि आत्मनि तदभिमानेन इदं त्रैविध्यं उत्तममम
ध्यमनीचत्वं असदेव भातीत्यन्वयः ॥ एवंभूत आत्मा बाह्याभ्यंतरभेदहेतुश्च भवति। बाह्यविष
यान्सुखादींश्च पश्यतीत्यर्थः ॥ यथा जनो जीवः स्वप्ने वहूनसतो जनान्देहान्कुर्वन्पश्यन् बहु
रूपो भाति तद्वत् यद्वा इदं त्रैविध्यं अध्यात्मादिरूपं भाति असज्जनकृत् दुष्टपुत्रोत्पादकः जनः
पिता स्वयं समोऽपि पुत्राभिमानतस्तदरिमित्रादिषु यथा भेदहेतुर्भवति तद्वदिति अन्यत्समानं ॥ ४० ॥

207

नन्वयमहंकारो विकल्पश्चेन्नास्ति ॥ अलं तर्हि तन्निवृत्तिप्रयासेनेत्यत आह । अर्थोपि । अर्थरहितोपि स्वरूपा-
भ्रतान्मनो बहिर्मुखानां नैवोपरमेत ॥ प्रस्तुतं तत्कृतैः कर्मभिरुच्चनीचदेहेषु ते संसरंतीति तत्र
पृच्छति । त्वत्त इति । व्यापकस्यात्मनो देहाद्देहांतरगमने अकर्तुः कर्मणा नित्यस्य च जन्ममर
णादीनि कथमिति भावः ३३ एतद्विद्वांसो न संति । हि यस्मात्मायया वंचिताः मोहिताः ३४ लिंग

र्थोपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥ उद्धव उवाच ॥ त्वत्तः परावृत्तधियः स्वकृ
तैः कर्मभिः प्रभो उच्चावचान्यथा देहान्गृह्णंति विसृजंति च ३३ ॥ तन्ममाख्याहि गोविंद दुर्विभा
व्यमनात्मभिः ॥ न ह्येतत्प्रायशो लोके विद्वांसः संति वंचिताः ॥ ३४ ॥ श्रीभगवानुवाच । मनः कर्म
मयं नृणामिंद्रियैः पंचभिर्युतं ॥ लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्त्तते । ३५ । ध्यायन्मनोनु
विषयान्दृष्टान्वानुश्रुतानथ ॥ उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनुशाम्यति । ३६ । रामराम

शरीराध्यासेन सर्वं घटत इत्युत्तरमाह ॥ मन इति । प्रधानत्वेन पंचभिरिति निर्देशोन्येषामप्युपलक्ष
णार्थः देहाद्देहांतरं प्रतियाति ततोन्य एवात्मा तन्मनोनुवर्त्तते अहंकारेणानुगच्छति ३५ मनसोपि प्र
वृद्देहवियोगो देहांतरयोगश्च कथं भवतीति चेत् ॥ स्मृतिवियोगयोगाभ्यामिति वक्तुं तयोः कारणमा
ह । ध्यायदिति । कर्मतंत्रत्वात्कर्मोपस्थापितान्दृष्टान्वा अनुश्रुतान्वेदोक्तान्वा अनुध्यायत् ॥ अथ
अनंतरं ध्यायमानेषु उद्यत्सु । आविर्भवत्सु पूर्वविषयेषु च सीदत्सु लीनमावं भवति । तदनंतरं तस्

भा॰ए॰
१०८

सिद्धवत्कृत्योक्तावयोवस्थाः प्रपंचयति । निषेको जठरे प्रवेशः गर्भस्तन्मध्ये वृद्धिः ॥ बाल्यं आपंचमाब्दात् । कौ
मारं आषोडशाद्वर्षात् । ततो यौवनं आपंचचत्वारिंशतः ततो वयोमध्यमाषष्टिवर्षात् । तदुपरि जरा ।
तदुपरि मृत्युः ॥४५॥ देहसंबंधात् जन्ममरणादीनां तूपपादितमर्थमुपसंहरति एता इति । हि स्फु
टं । अन्यस्य देहस्य तनोः अवस्थाः गुणसंगात् प्रकृत्यविवेकात् ॥ कश्चित्परमेश्वरानुगृहीतः क्वचिज्ज
हाति अवस्थावतो देहस्य द्रष्टासौऽवस्थावान्नेति विवेकज्ञानेन ॥४६॥ ननु तदानीमं किं तत्त्वेन

निषेकगर्भजन्मानि बाल्यकौमारयौवनं ॥ वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ॥४५॥ एता
मनोरथमयीर्ह्यन्यस्योच्चावचास्तनूः ॥ गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ॥४६॥ आत्म
नः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ॥ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः ॥४७॥ तरोर्बीज
विपाकाभ्यां यो विद्वान् जन्मसंयमौ ॥ तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ॥४८॥ प्रकृतेरेव
मात्मानमविविच्याबुधः पुमान् ॥ तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ॥४९॥

208

जन्ममरणवान् दे
होन दृश्यते तत्राह । आत्मन इति पितृदेहस्यौर्द्ध्वदैहिकं कुर्वताप्ययदर्शनात् ॥ पुत्रदेहस्य च जातक
र्मणि जन्मदर्शनादात्मनः स्वदेहस्यापि भवाप्ययावनुमेयौ । एवं च दृश्यत्वे सति भवाप्ययवतां
वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणः भवाप्ययधर्मको न भवति ॥४७॥ एतदेव दृष्टांतेन स्पष्टयति
तरोरिति । तरुशब्देनोद्भिज्जमात्रस्योपलक्षणं फलपाकान्तस्य व्रीह्यादेरित्यर्थः ॥ यद्वा । तरोरेवान्त्य
परिणामो विपाकः बीजाज्जन्म विपाकात्संयमं नाशं च विद्वान् ॥४८॥ अविवेकिनः संसारं प्रपंचय
ति प्रकृतेरिति पंचभिः तत्त्वेन तत्त्वतोऽविविच्य । तत्त्वदृष्ट्या स्पर्शेषु विषयेषु संमूढ इति वा ॥४९॥

राम॰
१०८

तदेवं लोकप्रसिद्धो जन्ममरणनिरूपणप्रसङ्गमावश्यकत्वापि तौ वैराग्याय निरूपयति॥ नित्यदा ह्यङ्ग भूतानि
शरीराणि उत्पद्यन्ते नश्यन्ति च॥ कालस्याति सूक्ष्मत्वात् तत्कृतं भवनमभवनं चाविवेकिभिर्न लक्ष्यते॥४१
सतोर्जन्ममरणयोरज्ञानेकारणमेतद्भवेत् सत्वमेव तयोः कुतः इत्याशङ्क्यानुमानेन साधयति॥ अर्चि
षां परिणामादिभिः स्रोतसां गत्यादिभिः॥ फलानां रूपादिभिर्यथावस्थाविशेषाः कृताः कालेनेति पूर्वस्या
नुषंगः॥ आदिशब्देन तेजोबलकामकोशलादीनामुपादानं॥ विमतं प्रतिक्षणोत्पत्तिविनाशवत्॥ अ

[illegible] नित्यदा ह्यङ्ग भूतानि भवन्ति न भवन्ति च॥ कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते॥४१
यथार्चिषां स्रोतसां च फलानां वा वनस्पतेः॥ तथैव सर्वभूतानां वयोवस्थादयः कृताः॥४२॥ सोयं दीपो
र्चिषां यद्वत् स्रोतसां तदिदं जलं॥ सोयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां॥४३॥ मा स्वस्य कर्मबीजेन
न जायते सोप्ययं पुमान्॥ म्रियते चामरो भ्रान्त्या यथाग्निर्दारुसंयुतः॥४४॥

वस्थाभेदवत्वात्॥ दीपज्वा
लादिवदित्यनुमानं॥४२॥ कथं तर्हि प्रत्यभिज्ञा तत्राह देवसादृश्यात्वलं विनीत्याह। सोयमिति॥ सादृश्यादर्चिषा
मेव यथा सोयं दीप इति प्रत्यभिज्ञा यथा स्रोतसां प्रवाहजलानां तदिदं जलमिति॥ तथा सोयं पुमानिति धीर्गी
श्च मृषा॥ नृणां बहूनां शरीराणां मृषात्वमर्थमायुर्येषामविवेकिनां तेषां भवति॥४२॥ ननु कथं देहा
ध्यासवतः पुंसः कर्मजन्ममरणानि संतिनान्यस्येति व्यवस्थानिहि घटे तद्घटस्यपुरुषभेदेन स्त्व
मस्त्वं चेति॥ नश्वरत्वस्यापि वस्तुतः तदभावादित्याह। मा स्वस्य नेवात्मनः॥ कर्मणा बीजभूतेन सोपि
अन्योपि पुमान् जायते म्रियते च। किंतु अयं भ्रान्त्या अजन्मापि जायत इव॥ अमरोपि म्रियत इव।
यथा महाभूतं तेजोरूपोग्निराकाल्यान्तमवस्थितोपि दारुयोगवियोगाभ्यां जन्मनाशौ प्राप्नोतीन्नहृत्॥४४॥

दुःखप्रतीकारोद्यममपि परित्यज्य परमेश्वरनिष्ठेनैव भाव्यमित्याह क्षिप्त इति द्वाभ्यां । क्षिप्त आक्षिप्तः ।
नुन्न इति वा । प्रलब्धः उपहसितः ॥५६॥ निष्ठ्युतः । निष्ठीवनविषयीकृतः ॥ मूत्रितः मूत्रेणार्द्रीकृतः
प्रकंपितः परमेश्वरनिष्ठातः प्रच्यावितोपि कृच्छ्रगतः कष्टं प्राप्तोपि ॥५७॥ एवं त्वदुक्तं यथावद्बुध्ये

क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धोऽसूयितोऽथवा । ताडितः सन्निरुद्धो वा वृत्त्या वा परिहापितः ॥५६॥
निष्ठ्युतो मूत्रितो वाज्ञैर्बहुधैवं प्रकंपितः । श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ॥५७॥
उद्धव उवाच ॥ यथैवमनुबुध्येयं वद नो वदतां वर ॥ सुदुःसहमिमं मन्य आत्मन्यसदति-
क्रमं ॥५८॥ विदुषामपि विश्वात्मन् प्रकृतिर्हि बलीयसी ॥ ऋते त्वद्धर्मनिरतान् शान्तांस्ते
चरणालयान् ॥५९॥ इति श्री भागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे ।
द्वाविंशोऽध्यायः ॥

यं तथा नः सर्वान्प्रतिषद । त्वद्धर्मनिरतान्ते विदुषामपि असद्भिः कृतमतिक्रमं अपराधं सु-
दुःसहं मन्य इत्यन्वयः ॥ प्रकृतिः स्वभावः ॥५९॥ निरस्य सर्वसंदेहानेकीकृत्य सुदर्शनं । प्रकाशि-
तरहस्यं तं भजामि गुरुमीश्वरं ॥५९॥ इत्येकादशे द्वाविंशः ॥ ॥

गुणभेदेन त्रिविधं तत्रापि तत्तारतम्येनानेकं कर्तृ द्विविधं संसारमाह सत्त्वेति ॥५०॥ ननु अकर्तुरात्मनः कुतः
कर्म्मभिर्भ्रमणं तत्राह । नृत्यतो गायतो जनान्पश्यन् अनुकरोतीति । तत्कृतस्वरतालादिगतिं शृंगारक-
रुणादिरसं च मनसानुवर्त्तयतीत्यर्थः ॥ अनुकार्यते गुणैर्बलादित्यर्थः ॥ अनेन दृष्टांतेन दृश्यधर्म्मो
द्रष्टरि स्फुरतीति दर्शितं ॥५१॥ उपाधिधर्म्माश्चोपहिते ऽवभासंत इत्यत्र दृष्टांतमाह । यथांभसे

सत्त्वसंगादृषीन्देवान्रजसासुरमानुषान् । तमसा भूततिर्यक्त्वं भ्रामितो याति कर्म्मभिः ॥५०॥ नृत्य-
तो गायतः पश्यन्यथैवानुकरोति तान् ॥ एवं बुद्धिगुणान्पश्यन्ननीहोप्यनुकार्यते ॥५१॥ यथांभ-
सा प्रचलता तरवोपि चला इव । चक्षुषा भ्राम्यमाणेन दृश्यते भ्राम्यतीव भूः ॥५२॥ यथा मनोरथधि-
यो विषयानुभवो मृषा ॥ स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ॥५३॥ अर्थे ह्यविद्यमाने-
पि संसृतिर्न्न निवर्त्तते ॥ ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ॥५४॥ तस्मादुद्धव मा भुं-
क्ष्व विषयानसदिंद्रियैः ॥ आत्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमं ॥५५॥

ति । तीरस्थास्तर-
वो धावन्त इव दृश्यन्ते । जले प्रतिबिंबिता वा तं च चला इवेति विषयग्राहकेण मनसा परिकल्पिता एव ते-
षु विषयेषु लावण्यादयो गुणाः न वस्तुतः संति । अतो मनो निबंधनमेव संसार इत्यभिप्रेत्याह कथं गुण-
ग्राह्यत्वेनावभासन्त इत्यत्र दृष्टांतमाह चक्षुषेति ॥५२॥ भोगस्यापि मिथ्यात्वे दृष्टांतद्वयमाह यथेति ॥५३॥ न-
नु यदि मिथ्या तर्हि किं तन्निवृत्तिप्रयत्नेन तत्राह अर्थे हीति । अस्य आत्मनः ॥५४॥ अतो भोगोद्यमो न कर्त्तव्य इत्याह । तस्मा-
ति ॥५

सत्तभिक्षुः पूर्वं धनाढ्यः कृच्छ्रार्जितस्य धनस्य नाशेन सन्तप्यमानो निर्विण्णः सन् प्रव्रज्य भिक्षामटन् दु
तः प्रस्तुतोपयोगिनीं गाथामगायदिति वक्तुं तस्य चरितमाह । अवन्तिष्वित्यादिना । अवन्तिषु मालवे
षु वार्त्तां कृषिवाणिज्यादिरूपां वृत्तिर्यस्य । कदर्यश्च स मतानुक्तः । आत्मानं धर्म्मं कृत्यं च पुत्रदारां

केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः ॥ स्मरता धृतियुक्तेन विपाकं निजकर्म्मणां ॥ ५ ॥
अवन्तिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया ॥ वार्त्तावृत्तिः कदर्यस्तु कामी लुब्धोऽतिकोपनः ॥ ६
ज्ञातयोऽतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः ॥ शून्यावसथ आत्मापि काले कामैरनर्चितः ॥
७ ॥ दुःशीलस्य कदर्यस्य द्रुह्यन्ते पुत्रबांधवाः ॥ दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियं ॥ ८ ॥
तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः ॥ धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ॥ ९ ॥

अपीडयन् । देवतातिथिभृत्यांश्च स कदर्य इति स्मृत इति ॥ ६ ॥ तस्य ये ज्ञातयो बांधवाः अतिथ
योऽध्वनीनाश्च ते न नार्चिता इत्यर्थः ॥ शून्यावसथे धर्म्मकर्म्महीने गृहे देहे वा ॥ ७ ॥ यक्षाणां वि
त्तमिव केवलं रक्षणीयं वित्तं यस्य । पंचभागिनः पंचयज्ञदेवताः ॥ ८ ॥ ॥

त्रयोविंशेतिरस्कारसहनोपायईर्यते। भिक्षुगीतप्रकारेण मनसःसंयमोधिया। दुर्जनोपद्रवोन्हनंदुःसहोपिमहीयसां। अतश्चतुर्भिरध्यायैःसहनोपायवर्णनं॥२॥ तत्रतावदस्मिन्नध्यायेभिक्षुगीतयामनोविजयः। उत्तरस्मिन्प्रकृतिपुरुषविवेकः तदुत्तरस्मिन्गुणवृत्तिविजयः। ततःपरस्मिन्नैलगीतयाविषयसंगत्यागेनसत्संगइतिक्रमेणोपायाभगवताचार्प्यते। आशंसितःप्रार्थितः। भृत्यस्यवचःसत्कु

श्रीशुकउवाच॥ सएवमाशंसितउद्धवेनभागवतमुख्येनदशार्हवर्येण॥ सभाजयन्भृत्यवचोमुकुंदस्तमाबभाषेश्रवणीयवीर्यः॥१॥ श्रीभगवानुवाच॥ बार्हस्पत्यनसोस्त्यत्रसाधुर्वैदुर्जनेरितैः॥ दुरुक्तैर्भिन्नमात्मानंयःसमाधातुमीश्वरः॥२॥ नतथातप्यतेविद्धःपुमान्बाणैरमर्म्मगैः॥ यथातुदंतिमर्म्मस्थाह्यसतांपरुषेषवः॥३॥ कथयंतिमहत्पुण्यमितिहासमिहोद्धव॥ तमहंवर्णयिष्यामिनिबोधसुसमाहितः॥४॥

र्वन्नतंभृत्यंप्रतिआबभाषे॥१॥ तत्रतावदंगीकारतस्तद्वचःसंपूजयतिद्वाभ्यां। हेबार्हस्पत्यबृहस्पतेःशिष्यअत्रलोकेससाधुर्नास्ति। योदुर्जनोक्तैर्भिन्नंक्षुभितंमनःशमयितुमीश्वरःस्यात्॥२॥ कुतइत्यतआह। नेति। यथामर्म्मस्थाःमर्म्मस्वेवनित्यंस्थिताःपरुषोक्तिरूपाइषवस्तुदंतिव्यथयंतितथाइतरेबाणानतुदंति। अतस्तैस्तथानतप्यतइत्यर्थः॥३॥ तथापिमयावक्ष्यमाणोरुपायैःसर्वंसोढुंशक्यमित्यभिप्रायेणेतिहासंप्रस्तौति। महदिति। यथाभवतितथापुण्यमितिहासंगाथांकथयंति॥४॥

भा॰ए॰ १११

श्वित्रश्वेतकुष्ठं ॥१६॥ सिद्धे प्राप्ते अर्थे सत्युत्कर्षे संवर्द्धने नाशे उपभोगयोर्द्वंद्वैक्यं। नाशेऽपभोगे चेत्यर्थः। साधनोत्कर्षयो रायासः त्नतः त्रासः चिंताच। नाशे भ्रमइति ॥१७॥ किंच अर्थमूला पंचदशानर्थाः संतीत्याह स्तेयादयः ष डनर्थाः ॥ प्राप्तेऽर्थे स्मयादयो व्यसनैः सह नव। व्यसनानि स्त्री द्यूतमद्यादिविषयाणि त्रीणि ॥१८॥ भे

यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ॥ लोभः स्वल्पो पितान्हंति श्वित्रो रूपमिवाह्रु तं ॥१६॥ अर्थस्य साधने सिद्ध उत्कर्षे रक्षणे व्यये॥ नाशोपभोग आयासः त्रासः चिंता भ्रमो नृणां॥ १७॥ स्तेयं हिंसानृतं दंभः कामः क्रोधः स्मयो मदः॥ भेदो वैरमविश्वासः संस्पर्द्धा व्यसनानि च ॥१८॥ एते पंचदशानर्था ह्यर्थमूला मता नृणां॥ तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजे त् ॥१९॥ भिद्यंते भ्रातरो दाराः पितरः सुहृदस्तथा॥ एकास्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः ॥२०॥ अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः॥ त्यजंत्याशु स्पृधो घ्नंति सहसो त्सृज्य सौहृदं ॥२१॥

दवैरस्पर्द्धाः प्रपंचयति द्वाभ्यां। भिद्यंते स्नेहं त्यजंति कथंभूताः एकाः स्नि ग्धाः एके एकप्राणाः ते चते अस्निग्धाः अति प्रियाश्चेत्यर्थः॥ कुतः काकिणिना पुंस्त्वमार्षं। विंशतिवराटिकाकाकिणी तया ॥२०॥ संरब्धाः क्षुभिताः स्पृधः स्पर्द्धमानाः ॥२१॥ रामराम

राम॰ १११

तेषामवध्यानमनादरः तेन विस्रस्तो विशीर्णः पुण्यस्कंधः अर्थलाभमात्रहेतुरंशो यस्य तस्य व
ह्वायासैः कृष्यादिभिः केवलं श्रमो यस्मिन्सः ॥१०॥ दैवतः गृहदाहादिना। कालतः निखातधा
न्यादि। नृपात्पार्थिवानां चहृद्दैकं तस्मात् ॥११॥ नष्टरायः नष्टो रायो ऽर्थो यस्य तस्य तपस्विनः।

तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद ॥ अर्थोप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥१०॥
ज्ञातयो जगृहुः किंचिद्दस्यवः किंचिदुद्धव ॥ दैवतः कालतः किंचिद्ब्रह्मबंधोर्नपार्थि
वात् ॥११॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः ॥ उपेक्षितश्च स्वजनैश्चिंतामापदुरत्य
या ॥१२॥ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः ॥ खिद्यतो बाष्पकंठस्य निर्वेदः सुम
हानभूत् ॥१३॥ स चाहेदमहो कष्टं वृथात्मा मेनुतापितः ॥ न धर्माय न कामाय यस्यार्थाया
स ईदृशः ॥१४॥ प्रायेणार्थाः कदर्याणां न सुखाय कदाचन ॥ इह चात्मोपतापाय मृतस्य नरकाय च
॥१५॥

सन्नष्टस्य ॥१३॥ मे मया। आत्मा देहः वृथैवात्मानुतापनं प्रपंचयति न धर्मायेत्यादिना। य
स्य ईदृशो ऽर्थायासस्तेन मया ॥१४॥ नरकाय च सत्यप्यर्थे धर्माननुष्ठानात् ॥१५॥ रामराम

अन्यमपिस्वसदृशंशोचति। कस्मादेवमनर्थं विद्वानपिसंक्लिश्यति। कारणंसंभावयति। कस्यचिदिति २६ ननुनायंमोहितः क्लिश्यति। किंतुधनादिभिर्भोगादिविधित्सया। अतआह किंधनैरिति। उतापुनरपि २७ इदानींसंपन्नविवेकःसन्हृष्यन्नाह नूनमितित्रिभिः। येनप्रीतेनात्मनःप्लवरूपोनिर्वेदश्चभवतिसहरिर्मेनूनंप्रीतइति २८ अंगंशोषयिष्येतपसायद्वाविद्ययाल्पयंनेष्यामि

कस्मात्संक्लिश्यते विद्वान् व्यर्थयार्थेहयासकृत् कस्यचिन्मायया नूनंलोकोयंसुविमोहितः २६ किंधनैर्धनदैर्वाकिंकामैर्वाकामदैरुत मृत्युनाग्रस्यमानस्यकर्मभिर्वोतजन्मदैः २७ नूनंमेभगवान्प्रीतःसर्वदेवमयोहरिः। येननीतोदशामेतांनिर्वेदश्चात्मनःप्लवः २८ सोहंकालावशेषेणशोषयिष्येंगमात्मनः अप्रमत्तोखिलस्वार्थेयदिस्यात्सिद्धआत्मनि २९ तत्रमामनुमोदेरन्देवास्त्रिभुवनेश्वराः मुहूर्तेनब्रह्मलोकंखट्वांगःसमसाधयत् ३० श्री भगवानुवाच इत्यभिप्रेत्यमनसात्यावन्त्योद्विजसत्तमः उन्मुच्यहृदयग्रंथीन्शांतोभिक्षुरभून्मुनिः ३१

यदिस्यात्कालावशेषस्तर्ह्यात्मन्येवसिद्धस्तुष्टःसन् अखिलेस्वार्थेधर्मादिसाधनेऽप्रमत्तःसन् २९ अनुमोदेरन्। अनुगृह्णन्तु। ननुदेवैरनुमोदितोपिजरठः॥ अल्पेनकालेनकिंसाधयिष्यति। तत्राह। मुहूर्तेनेति ३० अभिप्रेत्यनिश्चित्य। आवन्त्यः। अवन्तिदेशभवः

इत्थंतावदर्थानित्यानामेतेनर्थाः परलोकेप्यनर्थाएवतेषामित्याहलब्ध्वेतित्रिभिः। मानुष्यंजन्मतत्र तत्रापिद्विजाग्र्यतांब्राह्मण्यंच। स्वार्थंघ्नंतिआत्महितंनकुर्वंतियेतेयांति ॥२२॥ अमरप्रार्थ्यत्वं दर्शयन्नाहस्वर्गेति। लोकंदेहं ॥ अनुषज्जेत। आसक्तिंकुर्यात् ॥२३॥ ऋषयोमनुष्ययज्ञब्रह्म

लब्ध्वाजन्मामरप्रार्थ्यंमानुष्यंतद्द्विजाग्र्यतां ॥ तदनादृत्ययेस्वार्थंघ्नंतियांत्यशुभांगतिं ॥२२॥ स्वर्गापवर्गयोर्द्वारंप्राप्यलोकमिमंपुमान् ॥ द्रविणेकोनुसज्जेतमर्त्योनर्थस्यधामनि ॥२३॥ देवर्षिपितृभूतानिज्ञातीन्बंधूंश्चभागिनः ॥ असंविभज्यचात्मानंयक्षवित्तःपतत्यधः ॥२४॥ व्यर्थयार्थेहयावित्तंप्रमत्तस्यवयोबलं ॥ कुशला येनसिध्यंतिजरठः किंनुसाधये ॥२५॥

यज्ञयोर्देवताः। देवर्षिपितृभूतानीतरेषुज्ञातयःसमोत्राः ॥ बंधवोविवाहादिनासंबद्धाः। तान् अन्यांश्चभागिनः॥भागार्हान्॥ आत्मानंच असंविभज्य अन्नादिभिरसंतर्प्य ॥२४॥ एवंविमृश्य अनुतप्यमानआह। व्यर्थयार्थेहयाप्रमत्तस्यमेवित्तादिगतमितिशेषः। येनवित्तादिनाकुशलाशा लाविवेकिनःसिद्ध्यंतिमुच्यन्ते। जरठोवृद्धः ॥२५॥ ॥ ॥ ॥

भा०ए० ११२

महासारः अतिवली ॥३८॥ दुर्वानयंतितदुपर्यधोवायुंमुंचनि वबंधुःअंरवत्ते ॥ निरुरुधुःकारागृहादिषु हिजंशुकसारिकादियथा ॥३९॥ मौतिकंदुर्जनादिकृतं। देहिकंजरादिनिमित्तं। दैविकं शीतोष्मादिप्रभवं। दिष्टंदेवप्राप्तं ॥४॥ धर्म्मात्पातयद्भिः परिभूतोपिसात्विकीधृतिमास्थायस्वधर्मएवस्थितइमांवक्ष्यमाणांगाथामगायतसात्विकीधृतिश्च। धत्पापयाधारयतेमनःप्रा॥

अहोएषमहासारोधृतिमान्गिरिराडिव ॥ मौनेनसाधयत्पर्थंबकवदृढनिश्चयः ॥३८॥
इत्येकेविहसंत्येनमेकेदुर्वातयंतिच ॥ तंववबंधुरुरुधुर्यथाक्रीडनकंद्विजं ॥३९॥
एवंसभौतिकंदुःखंदैविकंदैहिकंचयत् ॥ भोक्तव्यमात्मनोदिष्टंप्राप्तंप्राप्तमबुध्यत ॥४०॥
परिभूतइमांगाथामगायतनराधमैः ॥ पातयद्भिःस्वधर्म्मस्थोधृतिमास्थायसात्विकीं ॥४१॥
द्विजउवाच ॥ नायंजनोमेसुखदुःखहेतुर्नदेवतात्माग्रहकर्मकालाः ॥ मनःपरंकारणंमामनंतीसंसारचक्रंपरिवर्त्तयेद्यत् ॥४२॥

णेंद्रियक्रियाःयोगेनाव्यभिचारिण्याधृतिः सापार्थसात्विकीतिस्मृतेः ॥४१॥ तामेवाख्यादशश्लोकीगाथामाह। नायमिति। नचात्मानापिग्रहादयः॥ मनःपरंकेवलंसुखदुःखयोःकारणंवदंतिमनसाह्येवपश्यतिमनसाशृणोतीत्यादिश्रुतयः ॥४२॥ ॥ ॥ ॥ ॥

राम ११२

असंगः आसक्तिशून्यः अलक्षितः आत्मानमद्योतयन् ॥ ३२ ॥ मवयसंवृद्धं । अवधूतं मलिनं पर्यभवन् अवमे
निरे हेभद्रापरिभूतिभिस्तिरस्कारैः ॥ ३३ ॥ परिभवानेव दर्शयति । केचिदिति सप्तभिः ॥ ३४ ॥ भो भगवन्
गृहाणेति दर्शितानि नानि प्रदाय पुनश्चाददुः ॥ ३५ ॥ अन्नं मूत्रयंति । मूर्द्धनि चष्ठीवंति । थूत्कारे

सचचारमहीमेतां संयतात्मेंद्रियानिलः ॥ भिक्षार्थं नगरग्रामानसंगोलक्षितोविशत् ॥ ३२ ॥ तं
वैप्रवयसंभिक्षुमवधूतमसज्जनाः ॥ दृष्ट्वापर्यभवन्भद्रबह्वीभिःपरिभूतिभिः ॥ ३३ ॥ केचित्त्रि
वेणुंजगृहुरेकेपात्रंकमंडलुं ॥ पीठंचैकेक्षसूत्रंचकंथांचीराणिकेचन ॥ ३४ ॥ प्रदायचपुन
स्तानिदर्शितान्याददुर्मुनेः ॥ अन्नंचभैक्ष्यसंपन्नंभुंजानस्यसरित्तटे ॥ ३५ ॥ मूत्रयंतिचपापिष्ठाः
ष्ठीवंत्यस्यचमूर्द्धनि ॥ यतवाचंवाचयंतिताडयंतिनवक्तिचेत् ॥ ३६ ॥ तर्जयंत्यपरेवाग्भिः
स्तेनोयमितिवादिनः ॥ बध्नंतिरज्ज्वातंकेचिद्बध्यतांबध्यतामिति ॥ ३७ ॥ क्षिपंत्येकेवजा
नंतएषधर्मध्वजःशठः ॥ क्षीणवित्तइमांवृत्तिमग्रहीत्स्वजनोज्झितः ॥ ३८ ॥ ॥

एतच्छ्लेष्माणं प्रक्षिपंति ॥ ३६ ॥ क्षिपंति निंदंति । निंदामेवाह । एष धर्मध्वजः त्रिदंडलिंगोपजीवी
शठो लोकवंचकः । न देवादृत्तोण वित्तइति ॥ ३८ ॥ ॥ ॥ ॥

अतो मनोनिग्रहे कृते सर्वं कृतं स्यात्तं विना तु सर्वं व्यर्थमित्याह दानमिति द्वाभ्यां ॥ स्वधर्म्मः नित्य
नैमित्तिकः ॥ सद्वृतानि एकादश्युपवासादीनि ॥ अन्यानि च यावन्ति कर्म्माणि एतेसर्वे उपा-
यामनो निग्रहलक्षणाः अन्तो निष्ठा फलं येषां ते तथा ॥ ननु ज्ञानांगत्वं तेषां प्रसिद्धं । तत्राह

दानं स्वधर्म्मो नियमो यमश्च श्रुतं च कर्म्माणि च सद्वृतानि ॥ सर्वे मनो निग्र
हलक्षणान्ताः परो हि योगो मनसः समाधिः ॥ ४५ ॥ समाहितं यस्य मनः प्रशान्तं दा
नादिभिः किं वद तस्य कृत्यं ॥ असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः
॥ ४६ ॥

मनसः समाधिर्न्निग्रह एव परो योगः ज्ञानं ॥ ४५ ॥ यस्य मनः समाहितं भवति तस्य किं कृत्यमस्ति
वदेति परं प्रत्युपदिशन्निव स्वयमेवाह ॥ असंयतं विक्षिप्तं चेत् यद्वा विनश्यत् आलस्यादिना
लीयमानं चेद्भवेत् तर्हि एभिर्दानादिभिः किमपरं प्रयोजनं स्यात् न किंचिदित्यर्थः ॥ ४६ ॥ राम

परिवर्त्तनप्रकारमेवाह। मनइत्यादि। गुणान्गुणवृत्तीः सृजति। ततश्चतेभ्यो गुणेभ्यः॥ शुक्लानिसात्त्वि
कानिकृष्णानितामसानि। लोहितानिराजसानिसवर्णास्तत्तत्कर्मानुरूपाः सृतयः देवतिर्यङ्नरा
दिगतयः॥४३॥ तर्हिमनसएवसंसारः स्यान्नात्मनइत्याशंक्याह। अनीहइति। अयमर्थः अविद्ययाम
नोध्यासेनैयमात्मनः संसृतिः ननुस्वतःयतस्तद्रहितस्येश्वरस्यसानास्ति॥ किंतुतद्बद्धतोजीव
स्यैवेतितदेतदाह। मनसासमीहमानेनसृष्टानि यंत्रत्वेनवर्त्तमानोपिपरमात्माऽनीहः तत्कि

मनोगुणान्वैसृजते बलीयस्ततश्चकर्म्माणि विलक्षणानि॥ शुक्लानि कृष्णान्यथलोहितानि
तेभ्यः सवर्णाः सृतयो भवंति॥४४॥ अनीह आत्मा मनसासमीहता हिरण्मयो मत्सखउ
द्विचष्टे॥ मनः स्वलिंगंपरिगृह्य कामान् जुषन्निबद्धो गुणसंगतोसौ॥४५॥ ॥ ॥

यासंगरहितः यतो हिरण्मयः विद्याशक्तिप्रधानः कुतो यतो मत्सखः॥ ममजीवस्यसखानि
यंता अतः उत्तउच्चैर्विचष्टे अतिरोहितज्ञानेनकेवलंपश्यतीत्यर्थः॥ असौपुनरयंजीवः स्व
लिंगंस्वस्मिन्नात्मनिलिंगयतिद्योतयतिसंसारमितितथा। तन्मनः परिगृह्य आत्मत्वेनस्वी
कृत्यतस्यमनसोगुणैः कर्म्मभिः संगतः संबद्धः गुणसंगाद्वाकामान्जुषन्निबद्धइति॥४५॥ राम

भा०ए०
११५

ततश्च ते अनेनप्रकारेण संसारेभ्रमंतीत्याह देहमिति मनोमात्रपरिकल्पितमिमं स्वदेहमहमिति पुत्रादिदेहं चममेति स्वीकृत्य पतमसि संसारे ॥४९॥ तदेवं मनसएव सुखदुःखकारणत्वमुपपाद्येदानीं जनादीनां घस्मामकारणत्वम प पंचयति ॥ जनस्त्विति षड्भिः ॥ अत्र च अस्मिन्न पि पद्ये आत्मनः किं नकिंचित् ॥ सुखदुःखकर्म्मत्वं तत्कर्तृत्वं चेत्पर्थः ॥ कुतइत्यत आह

देहंमनोमात्रमिमं गृहीत्वाममाहमित्यंधधियोमनुष्याः ॥ एषोहमन्योयमिति भ्रमेणदुरंतपारेतमसिभ्रमन्ति ॥४९॥ जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनश्चा त्रहिभौमयोस्तत् ॥ जिह्वांक्वचित्संदशातिस्वदद्भिस्तद्वेदनायांकतमायकुप्येत ॥५०॥

हिनिश्चितं । भौमयोर्भूविकारयोर्देहयोस्तत् । नत्वात्मनः अमूर्त्तस्यात्क्रियस्य च हननादिषु । कर्मत्वकर्तृत्वानुपपत्तेः ॥ तथापिदुःखमात्मपर्यवसायीतिचेत् । एवमपि । परमात्मनश्चा भयत्राप्येकत्वात्कोपविषयोस्तीतिस्वदद्भांतेनदर्शयति जिह्वामिति ॥५०॥ रामर

225

राम
११५

नचेतरेंद्रियजयः प्रयोजनं स्यान्नेत्याह। मनोवश इति। देवाः इंद्रियाणि तदधिष्ठातारो वा। भीष्मो यो
गिनामपि भयंकरः मनोलक्षणो देवः कुतः सहसो बलादपि बलिनोपि वा सहीयान् बलीयान्॥
अनस्तं येऽवशवर्तिनं कुर्यात् स एव देवदेवः सर्वेंद्रियजेता भवति। नान्यः॥ तथा च श्रुतिः। म
नो वशे सर्वमिदं बभूव नान्यस्य मनो वशमन्वियात्॥ भीष्मो हि देवः सहसः सहीयानिति॥४७॥

मनोवशेऽन्ये ह्यभवंश्च देवा मनश्च नान्यस्य वशं समेति॥ भीष्मो हि देवः सहसः सहीया
न्युंज्याद्वशे तं स हि देवदेवः॥४७॥ तं दुर्जयं शत्रुमसह्यवेगं मरुंतुदं तन्न विजि
त्य केचित्॥ कुर्वंत्यसद्विग्रहमन्नमर्त्यैर्मित्राण्युदासीनरिपूंश्च मूढाः॥४८॥

अतः असह्या रागादयो वेगा यस्य तं। अत एव अरुंतुदं अरुः मर्म मर्मंतुदति व्यथयतीत्यरुंतुद
स्तं। तन्नेति छेदः। तं न विजित्य अजित्वा ततः ये केचिन्मर्त्यैः कैश्चित् असद्विग्रहं कुर्वंति। त
त्र चानुकूलप्रतिकूलादीन्॥ अन्यान्मित्रादीन्कुर्वंति ते नमूढा इत्यर्थः॥४८॥ ॥

कर्म्महेतुश्चेत्। अस्त्वित्यस्य योपगमः कर्म्मैव नास्ति कुतस्तस्य हेतुत्वमिति॥ तदाह॥ हि यस्मात्तात्कर्म्मणः कस्य जडाजडत्वे सति स्यात्॥ जडत्वाद्धि कारित्वोपपत्तेः॥ अजडत्वाद्बुद्धितानुसंधानतः प्रवृत्तिसंभवात्॥ अचिज्जडो देहः अतः तस्य प्रवृत्तिर्न संभवति॥ पुरुषस्तु सुपर्णः शुद्धज्ञानस्वरूपः अतः कस्मै कुप्येत्। यतः सुखदुःखयोर्मूलभूतं कर्म्मैव नास्तीति॥ ५४

कर्म्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि जडाजडत्वे। देहस्त्वचित्पुरुषोयं सुपर्णः कुध्येत कस्मै न हि कर्म्ममूलं॥ ५४॥ कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोसौ। नाग्नेर्हि तापो न हिमस्य तत्स्यात्कुध्येत कस्मै न परः स्य द्वंद्वं॥ ५५॥

तत्र कालपक्षेपि॥ आत्मनः किं। यतोऽसौ कालात्मक एव ब्रह्मांशत्वात्। स्वांशस्य स्वतः पीडा नास्तीत्यत्र दृष्टांतः॥ नाग्नेर्हितो स्तदंशस्य ज्वालादेस्तापो दाहतो नाशो स्ति॥ तत्रोपाधिभूतकाष्ठांशदाहात् नाशः स्यादिति दृष्टांतांतरमाह। हिमस्य तच्छैत्यं तदंशस्य तुषारकणस्य नाशकं न स्यादित्यर्थः किंच आत्मा मंशत्वं॥ वस्तुतः पर एवायं न च परस्य द्वंद्वं सुखदुःखादिकमस्तीति॥ ५५॥ राम

यदि देवता असुनाम ॥ तत्रापिपक्षे आत्मनः किं यतो विकारयोर्विक्रियमाणयोर्देवतयोस्तत् ॥ हस्तेन
मुखं निहन्ति तेन वा हस्ते दुःखे न तदभिमानिनोर्वह्नीन्द्रयोरेव तत्त् ॥ न त्वविक्रियस्याहंकारस्य
चात्मनः देवतानां च सर्वदेहेष्वभेदान्न कोप विषयोस्तीति स्वदेहदृष्टान्तमाह ॥ यत्र यदाङ्ग
गं देवताधिष्ठानं हस्तमुखादि अतएव पर्वत्र देवतानधिष्ठानरूपभू विकारदन्तोदाहरणं।
५१ ॥ आत्मनः सुखदुःखाद्याकारः परिणामः अतः स एव हेतुर्यदि स्यात्त। तत्र तस्मिन्पक्षे अन्यतः
किं न किंचिदन्यतो भवति ॥ यस्मै कुप्येदित्यर्थः ॥ यतो निज एव स्वभावः सः न त्वात्मनः तथापरि

दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत् ॥ यदंगमंगेन निहन्यते क्वचित्क्रुध्येत
कस्मै पुरुषः स्वदेहे ॥ ५१ ॥ आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजस्वभावः नत्त्या
त्मनोन्यद्यदि तन्मृषा स्यात् क्रुध्येत कस्मान्न सुखं न दुःखं ॥ ५१ ॥ ग्रहा निमित्तं सुखदुःखयोश्चे।
ग्रं त्किमात्मनोजस्य तेवै ॥ ग्रहैर्ग्रहस्यैव वदन्ति पीडां क्रुध्येत कस्मै पुरुषस्ततोन्यः ॥ ५३ ॥ रामराम

जनस्य

णामोन्यनिमित्ततो भवति। अतोस्ति कोपि विषय इति चेन्नत्राह ग्रहानहीति ॥ आत्मव्यतिरिक्तं नास्त्येव
यदि स्यात्। अस्तीति प्रतीयेत तर्हि तन्मृषैव ॥ अतः कस्माद्धेतोः क्रुध्येत् यतो निमित्तं नास्ति न च सु
खदुःखं चेत्यर्थः ॥ ५२ ॥ ग्रहपक्षे पाजस्यात्मनः किं । यतः जन्यत इति जनो देहस्तस्यैव जन्मलग्ना पे
क्षया ह्यादशाद्यष्टमादिराशिस्थास्ते सुखदुःखयोर्निमित्तं भवन्ति॥ किंच। अतारतस्थ ग्रहैस्तत्रस्थस्य
ग्रहस्यैव पादादृष्ट्यादिभेदैः पीडां वदन्ति दैवज्ञाः न तु ग्रहकोणादिषु स्थितस्य तद्दृष्टिगोचर
स्य पुरुषस्य ग्रहगतैव तु पीडा तदुद्भवोत्पन्ने देहे तस्याभिमानाद्भवति ॥ अतः पुरुषस्ततो ग्रहादेहा

चतुर्विंशेतु सांख्येन मनोमोहो निवार्यते ॥ आत्मनः सर्वभावानामारोपापायचिंतया स्वपदद्वंद्वभक्तानामद्वैं
त्वाय संयमं ॥ चिंतनस्थोत्काथुनः कृष्णः सांख्यमत्राहतत्कृते ॥ अद्वितीयात्परमात्मनो मायया प्रकृतिपुरु
षद्वारा सर्वं द्वैतमुदेति ॥ पुनस्तत्रैव लीयत इत्येतु संदधानस्य द्वंद्वभ्रमो निवर्त्तत इति वक्तुं सांख्यं प्रस्तौति
अथेति ॥ पूर्वैः कपिलादिभिर्निश्चितं ॥ वैकल्पिकं भेदनिमित्तं भ्रमं सुखदुःखादिरूपं ॥ १ ॥ अथो शब्दः
कार्त्स्न्ये ज्ञानं द्रष्टा तेन दृश्यः कृत्स्नो प्यर्थश्च विकल्पशून्यमेकमेव ब्रह्मण्येव लीनमासीदित्यर्थः ॥

श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं ॥ यद्विज्ञाय पुमान्सद्यो ज
ह्याद्वैकल्पिकं भ्रमं ॥ १ ॥ आसीज्ज्ञानमथो अर्थ एकमेवाविकल्पितं ॥ यदा विवेकनिपुणा आ
दौ कृतयुगेऽयुगे ॥ २ ॥ तन्मायाफलरूपेण केवलं निर्विकल्पितं ॥ वाङ्मनोगोचरं सत्यं द्विधा सम
भवद्बृहत् ॥ ३ ॥ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ॥ ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधी
यते ॥ ४ ॥ तमो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः ॥ मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च ॥ ५ ॥

कदेत्यपेक्षायामाह । अयुगे युगेभ्यः पूर्वं प्रलय इत्यर्थः । तथा आदौ यत्कृतयुगं तस्मिंश्च ॥ अन्यदापि यदा
विवेकनिपुणा जना भवंति । तदापि तेषां भेदास्फुर्त्तेः ॥ २ ॥ तद्ब्रह्म स्ववाङ्मनोगोचरं यथा भवति
तथा मायादृश्यफलं तत्प्रकाशः तद्रूपेण मायाविलासरूपेण वा द्विधाऽभूत् ॥ ३ ॥ तयोर्द्वि
धाभूतयोरंशयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी ॥ ४ ॥ अभवन् अभिव्यक्ता बभूवुः ।
मया परमेश्वरेण जीवादृष्टमंगीकृत्वात्स्वैः पुरुषानुमतत्वं ॥ यद्वा स्वस्यैव प्रकृतीक्षण
रूपाया पुरुषावस्था तदनुमतेन तद्द्वारेणेत्यर्थः ॥ ५ ॥ ॥ ॥

तदेवं षड्भिरेते हेतवः प्रसिद्धा निरस्ताः ॥ यदि कश्चिद्धेत्वंतरमुद्भावयेत् ॥ तदपि वस्तुमहिमावेक्षायां न संभवतीत्या
ह ॥ न केनचिदिति ॥ नन्वपरोक्षः कथमपह्नूयते तत्राह ॥ यथेति ॥ संसृतिमविद्यमानामेव रूपयति प्रका
शयतीति तथा तस्य भ्रमः अहंकारस्यैव यथा स्यात् ॥ न तथा परतः प्रकृतेः परस्यात्मनो द्वंद्वसंबंधः ॥
अहंकारनिमित्तो संसारो न वास्तव इत्यर्थः एवं प्रबुद्धो यः स भूतेः कृत्वा न बिभेति ॥ ५५ ॥ अतोऽहमप्येतये

नकेनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य ॥ यथाहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति
भूतैः ॥ ५६ ॥ एतां स आस्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः ॥ अहं तरिष्यामि दुरंतपारं तमो
मुकुंदांघ्रिनिषेवयैव ॥ ५७ ॥ श्रीभगवानुवाच ॥ निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य गां पर्यटमा
न इत्थं ॥ निराकृतोऽसद्भिरपि स्वधर्मादकंपितोऽमुं मुनिराह गाथां ॥ ५८ ॥ सुखदुःखप्रदो नान्यः पुरुष
स्यात्मविभ्रमः ॥ मित्रोदासीनरिपवः संसारस्तमसः कृतः ॥ ५९ ॥ तस्मात्सर्वात्मना तात निगृहाण मनो धि
या ॥ मय्यावेशितया युक्त एतावान्योगसंग्रहः ॥ ६० ॥ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः ॥ धार
यं श्रावयं छृण्वन् द्वंद्वैर्नैवाभिभूयते ॥ ६१ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे त्रयोविं
शोऽध्यायः ॥

अपरमात्मनिष्ठया तरिष्यामीत्याह ॥ एतामिति ॥ सोऽहमित्यन्वयः ॥ नन्वियं निष्ठैव कथं भवेत्
तदाह ॥ मुकुंदेति ॥ ५७ ॥ प्रस्तावेन सह गाथार्थं संक्षेपतो दर्शयति द्वाभ्यां ॥ इत्थं नष्टद्रविणो निर्विद्य गतक्ल
मः प्रव्रज्य गां पर्यटन् असद्भिर्निराकृतोऽपि स्वधर्मादकंपितः सन्नमुं निरस्य गाथामगायदित्यन्वयः ॥ ५८ ॥ मित्रो
दासीनरिपवः सर्वोऽपि च संसारः तमसः अज्ञानतः आत्मनो मनसो विभ्रममात्रः कृतः न तात्त्विक इत्यर्थः ॥ ५९ ॥ उ
क्तं द्वंद्वसहनोपायमुपसंहरति ॥ तस्मादिति ॥ ६० ॥ मनोनिग्रहाशक्तोऽप्येतच्छ्रवणादिना तत्फलं प्राप्नोती
त्याह ॥ य इति ॥ द्वंद्वैः सुखदुःखादिभिः ॥ ६१ ॥ भिक्षुगीतमिदं कृत्वा भक्तचित्तगतं हरिः ॥ मोहान्निवृत्तिं ह्याभाति

तस्मात्त्रिविधात्त्रिविधप्रपंचोत्पत्तिं दर्शयति। अर्थ इति। तन्मात्रिकात्शब्दादितन्मात्रकारणात्तता
मसात्तद्वारार्थोमहाभूतरूपोजज्ञे बभूव भूतानामावरणस्वभावत्वात्॥ इंद्रियाणि दशतेजसात्त
तेषांप्रवृत्तिस्वभावत्वात्॥ वैकृता[...] त्सात्त्विकात्तादेवताःदिग्वातार्कप्रचेतोऽश्विवह्नींद्रो
पेंद्रमित्रकाः चंद्रश्चेत्येकादशचशब्दान्मनश्च तेषां प्रकाशस्वभावत्वात्॥ ५॥ ममवेराज्ञां त
र्यामिणः॥ ६॥ सलिलेसंस्थितेयस्पत्तसलिलसंस्थितमिति स्मिन्। सलिलसंस्थितांवडेऽ

अर्थस्तन्मात्रिकाज्जज्ञेतामसादिंद्रियाणिच॥ तेजसा देवता आसन्नेकादशचवैकृतात्॥ ५॥ म
यासंचोदिताभावाःसर्वेसंहत्यकारिणः॥ अंडमुत्पादयामासुर्ममायतनमुत्तमं॥ ६॥ तस्मि
न्नहं समभवमंडेसलिलसंस्थितौ॥ ममनाभ्यामभूत्पद्मं विश्वाख्यंतत्रचात्मभूः॥ १०॥ सोस
जत्तपसायुक्तो रजसामदनुग्रहात्॥ लोकान्सपालान्विश्वात्माभूर्भुवःस्वरितित्रिधा॥
११॥ देवानामोकआसीत्स्वर्भूतानांचभुवःपदं॥ मर्त्यादीनांचभूर्लोकः सिद्धानांत्रितया
त्परं॥ अधोसुराणांनागानांभूमेरोकोऽसृजत्प्रभुः॥ १२॥ नारायणरूपोलीलाविग्रहेणासम

भवंस्थितइत्यर्थः॥ विश्वाख्यं लोककारणभूतं। तत्रचात्मभूःचतुराननरूपभोगविग्रहे
णपुनर्वैराजात्तस्मिन्नाविर्भूतइत्यर्थः॥ १०॥ रजसायुक्तोमदनुग्रहात्तपसासृजत्। भूःअ
तलादिसहिता। भुवःअंतरिक्षलोकःस्वःस्वर्गःमहर्लोकादेरप्युपलक्षणं॥ ११॥ लोकस्त्रिप
योजनमात्रेदेवानामितिसार्द्धेन॥ ओकोनिवासः पदंस्थानत्रितयात्परंत्रितयात्परंमहर्लोका

सूत्रंक्रियाशक्तिमान्प्रथमोधिकारः। ततोमहान् ज्ञानशक्तिः तत्त्वयंमहानेवप्रथमोविकारः प्रसिद्धः। त
त्राहा सचज्ञानक्रियागर्भत्वात्सूत्रेणसंयुतः नपृथक् एकमेवतत्त्वंक्रियाज्ञानशक्तिभ्यांद्विधोच्यत
इत्यर्थः॥ विमोहनः जीवस्यभ्रमहेतुः सजातः॥६॥ यतस्तन्मात्रादीनांकारणं॥ मनःशब्देनदेवा
नामप्युपलक्षणं॥ चिदचिन्मयः चिदाभासव्याप्तत्वादुभयग्रंथिरूपइतिजीवोपाधित्वंदर्शितं य
द्यपितस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतेरन्नमयंहिसोम्यमनइत्यादिश्रुतेश्च

तेभ्यःसमभवत्सूत्रंमहान्सूत्रेणसंयुतः॥ ततोविकुर्वतोजातोयोहंकारोविमोहनः॥६॥
वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिधा॥ तन्मात्रेंद्रियमनसांकारणंचिदचिन्मयः॥७॥

प्रथमंभूतानिजायंतेतेभ्योऽपंचीकृतेभ्यःशास्त्रादिक्रमेणसमष्ट्यात्मकंलिंगशरीरंपंचीकृ
तेभ्यश्चब्रह्मांडं।तस्मिन्वैराजस्तदंतर्यामीलीलाविग्रहः क्षीराब्धिशायीश्रीनारायणः॥ तन्नाभि
पद्मेचवैराजस्यभोगायचतुर्मुखश्चतुराननः ततोयथावसरमन्येषांजीवानामाविर्भावइतिप्रक्रिया।
तथापिचिन्नाभिव्यक्तिपर्वकोहंकारस्ततोभूतेंद्रियादिश्चवक्ष्यतेइत्येतावतामहदादिक्रमेणस
ष्टिरुच्यते तथोक्तं। मत्तोहविष्णुलिंगाद्यैः सद्भिर्याचोदिताऽन्यथा ज्यायःसोऽवतारायनास्तिभेदः
कथंचनेति॥७॥

भा०ए०
११९

नन्वेवंतर्हिस्वकार्यंप्रतिमहदादीनामप्याद्यंतवत्वात्सत्वंस्यात्तत्राह।यदिति।यद्यमुपादायउपादानकारणतयास्थीकृत्यपूर्वःकारणरूपोमहदादिर्भावःपरंअहंकारादिकंभावंविकुरुतेसृजति यथापिंडमुपादायस्वयंनिमित्तभूतोघटंसृजति॥तद्वत्सएवसन्नितिपूर्वस्यानुषंगः कथंतर्हिमृत्तिकेत्येवसत्यमित्यादिश्रुतिः॥तत्राह।आदिरिति॥यत्तुयदायस्यादिरंतश्चविवक्ष्यतेतदातत्सत्यमित्यभिधीयते॥अतःपरमकारणस्यात्मनःसत्यत्वंविवक्षितमित्यर्थः।१८।ननुतथापिप्रकृतिपुरुषकालानामकार्यभूतानांभिन्नत्वात्कथमद्वितीयतातत्राह॥प्रकृतिरिति॥अस्यसतः

यदुपादायपूर्वस्तुभावोविकुरुतेपरं॥आदिरंतोयदायस्यतत्सत्यमभिधीयते॥१८॥प्रकृतिर्ह्यस्योपादानमाधारःपुरुषःपरः॥सतोभिव्यंजकःकालोब्रह्मतत्त्रितयंत्वहं॥१९॥सर्गः प्रवर्त्ततेतावत्पौर्वापर्येणनित्यशः॥महान्गुणविसर्गार्थःस्थित्यंतोयावदीक्षणं॥२०॥

229

कार्यस्योपादानंयाप्रकृतिःप्रसिद्धायश्चतस्याआधारःअधिष्ठातापरःपुरुषःयश्चगुणक्षोभेणाभिव्यंजकःकालस्तत्त्रितयंब्रह्मरूपोहमेवनतुपृथक्॥प्रकृतेःशक्तित्वात्॥पुरुषकालयोरवस्थारूपत्वात्।१९।एवंतावत्कालत्रयेप्यव्यभिचारित्वात्ब्रह्मैवसत्यमितिव्युत्पाद्यतस्यसद्विकारणत्वनादोसत्वमुक्तोमध्येपितस्यैवसत्वमुपपाद्यतेऽप्यवधित्वेनमतत्वदर्शीतिप्रपंचसर्गप्रवाहरूपायाःस्थितेरवधिमाह।सर्गइति।महानुबहुलःपौर्वापर्येणपितृपुत्रादिरूपेणनित्यशःअविच्छेदेनकिमर्थंप्रवर्त्तते॥तदाह।गुणेषुदेहेषुविविधतयासृज्यतइतिगुणविसर्गोजीवःतदर्थःतद्भोगप्रयोजनः किंपर्यंतंप्रवर्त्तते।तदाह।यावत्स्थितेरंतःसोपिकिमवधिः॥तदाह।यावदीक्षणंपरमेश्वरस्यतावत्।२०॥

राम
११९

एवंव्यवस्थायांकारणमाह॥स्पार्द्धेन॥त्रिलोक्यांयानानादिसहितायां॥योगादितारतम्येनयथोत्तरंमहत्त्रैकाद
यःमहत्तिर्वैकुंठलोकः।१३।तत्रतुमद्भक्तिव्यतिरेकेणतरागतयश्चंचलाइत्याह्वैराग्यार्थांमयाकालश
क्तिनाधात्रापरमेश्वरेणकर्म्मफलप्रदेनहेतुभूतेनगुणप्रवाहेसंसारेउन्मज्जंति॥आसत्यलोकमुन्नमा
गतिंप्राप्नोतिपुनर्निमज्जंतिआस्थावरंनीचांगतिंप्राप्नोति॥१४॥सत्त्विनिरूपणस्याद्धितीयात्मप्रति

त्रिलोक्यांगतयःसर्वाःकर्म्मणांत्रिगुणात्मनां॥योगस्यतपसश्चैवन्यासस्यगतयोमलाः।१३।मद्दर्शनंत
पःसत्यभक्तियोगस्यमद्गतिः॥मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत्॥१४॥गुणप्रवाहएतस्मि
न्नुन्मज्जतिनिमज्जति॥अणुर्बृहत्कृशःस्थूलोयोयोभावःप्रसिद्ध्यति॥सर्वोप्युभयसंयुक्तःप्रकृ
त्यापुरुषेणच।१५॥यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यसन्॥विकारोव्यवहारार्थोयथातैजसपार्थिवाः।१६

पदार्थत्वात्तत्प्रतिपादनायकारणेनकार्यव्याप्तिमाह॥अणुरिति॥उभयेनसंयुक्तोव्याप्तः॥नदेवादिःप्रकृत्ये
ति।१५॥इदानींकार्यस्यकारणात्मतांदर्शयति॥यस्यकार्यस्ययश्चादिःकारणंअंतःलयस्थानंचतस्यम
ध्यमप्यावस्थाऽपिसएवचैतत्प्रसिद्धंमृत्सुवर्णादिषु॥अततएवाव्यभिचारित्वात्सएवसन्नन्येनतरः॥अलं
तर्हिमिथ्याभूतकार्यसृष्ट्या॥तत्राह॥विकारइति॥तैजसाःकटककुंडलादयःपार्थिवाघटशरावा
दयश्चयथेति॥१६॥

वायुश्चकालाग्निरितिनेतावरेणग्रस्तःस्पर्शमात्रःसन्तस्मिन्नंबरंचभूतादिनाहंकारेणग्रस्यमानंशब्दत
न्मात्रं।तदेवंतामसाहंकारकार्यस्यशब्दपर्यंतस्यलयमुक्त्वाराजसाहंकारकार्यस्याप्याह॥इंद्रियाणिस्व
योनिषुइति।स्वप्रवर्तकदेवतासु।तेषांप्रवृत्तिस्वभावत्वात्प्रवृत्तेश्चदेवताधीनत्वात्तासुलयइति
वाचोयुक्तिः॥वस्तुतस्तुस्वकारणेराजसाहंकारएवलयोभिप्रेतः॥२४॥योनिरित्युद्देश्यगतत्वादेकत्व
मविवक्षितं॥योनयोदेवतास्तुमनसि।कुतःईश्वरेनियंतरिमनोवशेऽन्येत्यभवन्समदेवाइत्यु
क्तत्वात्॥इंद्रियलयोक्तएवात्राप्यभिप्रायःमनश्चदेवताभिस्सहवैकारिकेऽहंकारइत्यर्थः॥ताम

रूपंवायौसचस्पर्शोलीयतेसोपिचांबरे॥अंबरंशब्दतन्मात्रइंद्रियाणिस्वयोनिषु॥२४॥योनिर्वै
कारिकेसोम्पलीयतेमनसीश्वरे॥शब्दोभूतादिमप्येतिभूतादिर्महतिप्रभुः॥२५॥सलीयतेमहा
न्स्वेषुगुणेषुगुणवत्तमः॥तेव्यक्तेसंप्रलीयंतेतत्कालेलीयतेव्यये॥२६॥

साहंकारकार्यविशेषि
तस्यशब्दस्यलयमाह॥शब्दोभूतादितामसाहंकारंअप्येतितस्मिंल्लीयतइत्यर्थः॥भूतादिरि
त्युपलक्षणंत्रिविधोप्यहंकारोमहति।जडांशंविहायज्ञानक्रियाशक्तिमात्ररूपोभवति।क
थंभूतःप्रभुःसमर्थःसर्वजगन्मोहकत्वात्॥२५॥सचमहान्स्वकारणेषुगुणेषुज्ञानक्रि
याशक्तिमत्त्वाद्गुणवत्तमस्तादृग्भावंविहायगुणमात्ररूपोभवति।तेऽव्यक्तेप्रकृतौसाम्या
वस्थांगच्छंतीत्यर्थः॥तदव्यक्तंकालेकालाधीनत्वात्तेनैकीभूयावतिष्ठते।अव्ययेउपरतवृत्तौ॥२६

प्रलयं निरूपयति विराट् ब्रह्मांडमयात्कालात्मनाव्याप्यमानः लोकानां महरादिकल्पाः सृष्टिप्रलयादि विविधाः क
ल्प्यंते यस्मिन् ॥ तान्नाशयस्मिन् विकल्पयतीति तथा सति तथाभूतोऽपि पंचत्वरूपाय विशेषाय विभागाय क
ल्प्यते योग्यो भवति । पंचानां भूतानामैक्यरूपस्तेषां पृथग्भावापत्या नश्यतीत्यर्थः ॥ २१ ॥ तत्र तस्माद्वा एतस्मा
दात्मनः आकाशः संभूतः आकाशाद्वायुर्वायोरग्निः । अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधी
भ्यो अन्नं अन्नात्पुरुष इति श्रुत्युक्तसृष्टिक्रमप्रातिलोम्येन प्रलयमाह अन्नइति । मर्त्त्यं शरीरं येनोप

विराडन्नमयासाद्यमानो लोककल्पविकल्पकः । पंचत्वाय विशेषाय कल्पते भुवनैः सह ॥ २१ ॥ अन्नं प्र
लीयते मर्त्त्यमन्नं धानासु लीयते । धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते ॥ २२ ॥ अप्सु प्रलीयते
गंध आपश्च स्वगुणे रसे । लीयते ज्योतिषि रसो ज्योतिरूपे प्रलीयते ॥ २३ ॥

पचितं तस्मिन्न
न्ने शतवर्षायामनावृष्ट्यां क्षीणे सति तत्रैव लीयत इत्यर्थः । अन्नं धानासु बीजमात्रावशेषं भवती
त्यर्थः । धाना भूमौ उप्ता न प्ररोहंतीत्यर्थः । भूमिर्गंधे । संवर्त्तकादित्यशोषिता संकर्षणमुखाग्निद
ग्धा च सती भूतसूक्ष्मरूपगंधमात्रावशेषा भवति ॥ २२ ॥ अप्सु गंधः शतवर्षयावृष्ट्या प्लाव्यमानोऽ
प्सु लीयते एवमेवापश्च ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवंति । ततो रसो पि तस्मिन् ली
यते । ज्योतिश्च वायुनाभिभूयमानं रूपमात्रं सत्तस्मिन् लीयते ॥ २३ ॥ ॥

पंचविंशे स्वनैर्गुणप्रतिपत्त्ये निरूप्यते ॥ चित्तप्रभवसत्वादिगुणवृत्तिरनेकधा ॥१॥ प्रकृतिपुरुषविवेक
ज्ञानवतोपि यावत्सत्वविशेषेण गुणत्रयवृत्तिजयो न स्यात्तावत् दृढो परमः ॥ अतस्तज्जयोपाय
कथनाय गुणवृत्तिनिरूपणमथमाह ॥ गुणानामिति ॥ सह मिश्रीभूय वर्त्तमानाः संमिश्राः न संमिश्राः
असंमिश्रास्तेषां विभक्तानां गुणानां मध्ये येन गुणेन यथा यादृशो भवेत् ॥ तदिदं कथयतो मत्तो
निबोधेत्यर्थः ॥१॥ तत्र सत्ववृत्तीराह । शमइति ॥ ईक्षा विवेकः तपः स्वधर्मवृत्तिः त्वस्मृतिः पूर्वापरानु
संधानं ॥ तुष्टिर्यथालाभसंतोषः ॥ त्यागो व्ययशीलत्वं अस्पृहा वैराग्यं ॥ श्रद्धा आस्तिक्यं ह्रीः अनु
चिते कर्मणि लज्जा ॥ दयादानं ॥ दयदानगतिस्त्वाघिति स्मरणात् ॥ आदिशब्देनार्जवविनयादि
स्वनिर्वृतिः आत्मरतिः ॥२॥ रजसो वृत्तीराह । कामइति ॥ कामोऽभिलाषः ॥ ईहा व्यापारः । मदो दर्पः तस्मात्लाभे सत्यप्यसं

श्रीभगवानुवाच ॥ गुणानामसमिश्राणां पुमान्येन यथा भवेत् ॥ तन्मे पुरुषवर्येदं उपधारय
शंसतः ॥१॥ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः ॥ तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः ।
स्वनिर्वृतिः ॥२॥ काम ईहा मदस्तृष्णा स्तंभ आशीर्भिदा सुखं ॥ मदोत्साहो यशः प्रीतिर्हास्यं वी
र्यं बलोद्यमः ॥३॥ क्रोधो लोभोऽनृतं हिंसा याच्ञा दंभः क्लमः कलिः ॥ शोकमोहौ विषादार्ती निद्रा
शा भीरनुद्यमः ॥४॥ तोषः । स्तंभो गर्वः ॥ आशीः धनाद्यभिलाषेण देवतादिप्रार्थनं ॥ भिदा भेदः सुखं विषय
भोगः ॥ मदोत्साहः ॥ मदेन युद्धाद्यभिनिवेशः ॥ यशः प्रीतिः स्तुतिप्रियता हास्यमुपहासः । वीर्यं प्रभावावि
ष्कारः बलेनोद्यमः ॥ न्यायेनोद्यमः सात्विक एव ॥३॥ तमोवृत्तीराह । क्रोधइति ॥ क्रोधोऽसहिष्णुता लोभो व्ययप
राङ्मुखता अनृतमशास्त्रीयप्रमाणं हिंसा द्रोहः ॥ याच्ञा प्रार्थना दंभो धर्मध्वजित्वं क्लमः श्रमः ॥ कलिः
कलहः शोकमोहौ अनुशोचनं भ्रमश्च ॥ विषादार्ती दुःखं दैन्यं च ॥ निद्रा तंद्रा आशा इदं मे भविष्यतीति
अन्वीक्षाभीः भयं । अनुद्यमो जाड्यं ॥४॥ ॥ ॥ ॥ ॥ ॥

मायामये मायाप्रवर्त्तके ज्ञानमये वा अत एव जीवयतीति जीवस्तस्मिन्महापुरुषे ॥ अयं भावः विश्वस्य
सुर्महापुरुषस्योपचाराः रूपः कालो ह्यत्यंशेन स्वरूपश्च अत स्तदात्मनावतिष्ठतइति ॥ ननु उक्तं सप्तमे
कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृदिति ॥ दशमे चायोयं कालस्तस्य ते व्यक्तः
बंधो चेष्टामाहुश्चेष्टते येन विश्वं ॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये । इति

कालो मायामये जीवे जीव आत्मनि मय्यजे ॥ आत्मा केवल आत्मस्थो विकल्पापायलक्षणः ॥ २७
एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः ॥ मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः ॥ २८ ॥ ए
ष सांख्यविधिः प्रोक्तः संशयग्रंथिभेदनः ॥ प्रतिलोमानुलोमाभ्यां परावरदृशा मया ॥ २९ ॥ इ
ति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे चतुर्विंशतितमोऽध्यायः ॥

जीव आत्मनि ॥ प्रकृतेर्लीनत्वेन प्रतियोग्यभावात् ॥ परिपूर्णस्वरूपेणावतिष्ठते ॥ आत्मा त्वात्म
स्थ एव । यतः केवलो निरुपाधिः ॥ अत्र हेतुः ॥ विकल्पापायाभ्यां विश्वोत्पत्तिलयाभ्यां लक्ष्यते अवधि
त्वानत्वेनावधित्वेन चेति तथा सः ॥ २७ ॥ अस्य कथनस्य प्रस्तुतोपयोगमाह ॥ एवमिति ॥ मनसः कथं
भेदनिमित्तो भ्रमः स्यात् ॥ जातो वा कथं हृदि तिष्ठेदिति ॥ २८ ॥ उपसंहरति ॥ एवमिति ॥ २९ ॥ प्रत्यक्तत्वं
येनेदं दर्शितं नत्वमात्मनः ॥ सांख्यप्रख्यानतस्तस्मै हरये गुरवे नमः ॥ इति एकादशे चतुर्विंशः ॥ २४ ॥

भा०ए०
१२२

नदेवंमिश्रामिश्रगुणवृत्तीःप्रदर्शयंदानीपुमानयेनयथाभवेदितियदुक्तंतदर्शयति॥पुरुषमितित्रिभिः
९॥१०॥हिंसांशत्रुमरणादिकमाशास्ययोभजेत्तंतामसंविद्यात्॥एतेगुणोरवभक्तोभवतीतितात्पर्यार्थः
११॥ननुतत्वापिगुणावशनकर्तत्वाविशेषात्केनविशेषेणत्वंसेव्यःजीवश्चसेवकइतिनियमः
यतोमांभजतेतिवारंवारमुच्यते।तत्राह।सत्वमिति।जीवस्यैवनमम॥कुतःयतश्चित्तजाःजी
वोपाधौचित्तेभिव्यज्यंते॥अतोयैःसएवबध्यतेकीदृशाःभूतानांदेहरूपाणामन्येषांचम

पुरुषंसत्वसंयुक्तमनुमीयात्कुमादिभिः॥कामादिभीरजोयुक्तंक्रोधाद्यैस्तमसायुतं॥९
यदाभजतिमांभक्त्यानिरपेक्षःस्वकर्मभिः॥तंसत्वप्रकृतिंविद्यात्पुरुषंस्त्रियमेववा॥१०
यदाआशिषआशास्यमांभजेतस्वकर्मभिः॥तंरजःप्रकृतिंविद्यात्हिंसामाशास्यतामसं॥
११॥सत्वंरजस्तमइतिगुणाजीवस्यनैवमे॥चित्तजायैस्तुभूतानांसज्जमानोनिबध्यते॥१२
यदेतरौजयेत्सत्वंभास्वरंविशदंशिवं॥तदासुखेनयुज्येतधर्मज्ञानादिभिःपुमान्॥१३॥

श्चसज्जमानः॥अहंत्वनासज्जमानोगुणानियंतत्वेनसृष्ट्यादिकर्तापिनित्यमुक्तः॥अतोमहानवि
शेषइतिभावः॥यद्वाभूतानांमपंचीकृतानांयत्कार्यभूतंचित्तंअन्नमयंहिसोम्यमनइतिश्रुतेः।
तत्प्रभवाः॥अतोभूतोपहितस्यजीवस्यैवेति॥अन्यत्समानं१२॥तदेवंमिश्रामिश्रगुणकार्या
णिप्रदर्श्यइदानीएकैकगुणोद्रेककार्याणिदर्शयतीति॥सप्तदशभिः।यदेतरौगुणौजयेत्अ
भिभवेत्॥भास्वरंप्रकाशकंविशदंस्वच्छं॥शिवंशांतंशिवत्वविशदत्वभास्वरत्वानांयथाक्रमंसु

१२२

द

ना

राम
१२२

अनुपूर्वशः क्रमेण। एनाः श्लोकत्रयोक्ताः वर्णितप्रायाः॥ अन्या अप्युत्थाद् इति भावः॥५॥ विभक्तानां गुणानां
वृत्तयो वर्णिताः॥ मिश्राणामाह। सन्निपात इति त्रिभिः॥ अहं ममेति च मतावुक्तः सर्ववृत्तिसामानाधि
करण्यदर्शनात् सन्निपातजत्वं॥ अदृशांतः कामी क्रोधी त्यादि॥ तथा ममशान्तिरस्तिकामः क्रोध
इत्यादि इच्छ व्यातत्पूर्वकः सर्वोप्ययं व्यवहारश्च संनिपातकार्यमित्यादि॥ व्यवहार इति। अत्र हेतुः॥
मनश्च मात्राणि चेंद्रियाणि च असंवेश्च तेः मनआदीनां सात्त्विकतामसराजसत्वान्नैव व्यवहा

सत्वस्य रजसश्चेताः तमसश्चानुपूर्वशः॥ वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु॥५॥ सन्नि
पातस्त्वहमिति ममेत्युरुच या मतिः॥ व्यवहारः सन्निपातो मनो मात्रेंद्रियासुभिः॥६॥ धर्मे चार्थे
च कामे च यदासौ परिनिष्ठितः॥ गुणानां संनिकर्षोयं श्रद्धा रतिधनावहः॥७॥ प्रवृत्तिल
क्षणे निष्ठा पुमान्यर्हि गृहाश्रमे॥ स्वधर्मे चानु गुणानां तमितिरे सा॥८॥ रामः तिष्ठेत

स्सन्निपात इति भावः॥६॥ असौ पुरुषो यदा धर्मादिषु परिनिष्ठितो भवति तदायं त्रिषु निष्ठारूपः
सन्निकर्षः संनिपातकार्यं धर्मादीनां सत्वतमोरजःकार्यत्वात्॥ विषयतः संनिपातजत्वस्य तत्फ
लतश्च तत्त्वमाह। श्रद्धा रतिधनानि सत्वरजस्तमोमयानि आवहती ति तथा॥७॥ धर्मनिष्ठाया
मेव सन्निपातं दर्शयति॥ प्रवृत्तिलक्षणे काम्ये धर्मे यदा पुंसो निष्ठा भुवति तथा पुमान् यदा गृ
हाश्रम एवासक्तः स्थितः अनु अनुपश्चात् स्वधर्मे च नित्यनैमित्तिके तिष्ठेत्॥ सापि साम्यतिः सन्नि
पातः॥ हियस्मात् काम्य धर्मे गृहासक्तिः स्वधर्मे रजस्तमः सत्वमयाइत्यर्थः॥८॥ ॥

भा०ए० १२३

यदासीदन्न। तिरोभवत्। चेतसो ग्रहणे चिदाकारपरिणामे। अक्षमं स चित्तं विलीयेत मनोपि संक
ल्पात्मकं नष्टं लीनं तमो। ज्ञानं ग्लानिर्विषादश्च भवति तत्तदा तमउत्कटं उपधारय विद्धि॥१८॥
किंच। एधमान इति। इंद्रियाण्येव निवृत्तिप्रवृत्तिमोहस्वभावानि देवासुररक्षांसि। यद्वा प्रसंगा
दाधिदैविकानां गुणानामुत्कर्षकार्याण्युक्तानीति ज्ञेयं॥१९॥ गुणोत्कर्षतोवस्थाभेदं दर्शयति स

सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमं॥ मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय॥१८॥ एध
मानेगुणे सत्वे देवानां बलमेधते॥ असुराणां च रजसि तमस्युद्धव रक्षसां॥१९॥ सत्वाज्जा
गरणं विद्यात् रजसा स्वप्नमादिशेत्॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततं॥२०॥ उप
र्युपरि गच्छंति सत्वेन ब्राह्मणा जनाः॥ तमसाधोध आमुख्याद्रजसांतरचारिणः॥२१॥

223

सत्वादिति॥ प्रसंगान्निर्गुणावस्थामाह॥ तुरीयं चतुर्थमवस्थांतरं नाम त्रिषु जागरणादिषु
संततमेकरूपं आत्मतत्वमेवेत्यर्थः॥२०॥ गुणोत्कर्षद्वारेण तत्तत्कर्मफलनियमं प्रदर्श
यति॥ उपर्युपरीति॥ ब्राह्मणा वेदार्थानुष्ठानाभियुक्ताः आब्रह्मण इति पाठे ब्रह्मलोक
मभिव्याप्येत्यर्थः॥ आमुख्यात् स्थावरमभिव्याप्य अंतरचारिणो मनुष्या एव भवंति॥२१॥

राम १२३

तमश्चसत्वंच॥ कर्मभूतंरजः कर्तृसंगंसंगहेतुः॥ भिदाभेदहेतुः॥ चलंप्रवृत्तिस्वभावं। अतः संगहेतुत्वात्
यशसाश्रियाचयुज्येत। तत्कामःपुमान्भवतीत्यर्थः भिदाहेतुत्वात् दुःखेनयुज्येत। द्वितीयाद्वैभयं
भवतीतिश्रुतेः। चलत्वात्कर्मणाचयुज्येत॥१४॥ यदारजः सत्वंकर्मभूतंतमः कर्तृजयेत्। मूढंविवे
कभ्रंशकं। लयं आवरणात्मकं जडं अनुद्यमात्मकं॥ अतोमूढत्वाच्छोकमोहहिंसाभिः। लयत्वान्नि

यदाजयेत्तमः सत्वंरजः संगंभिदाचलं॥ तदादुःखेनयुज्येतकर्मणायशसाश्रिया॥१४॥ यदाजये
द्रजःसत्वंतमोमूढंलयंजडं॥ युज्येतशोकमोहाभ्यांनिद्रयाहिंसयाशया॥१५॥ यदाचित्तंप्रसीदे
तइंद्रियाणांचनिर्वृतिः॥ देहेऽभयंमनोसंगंतत्सत्वंविद्धिमत्पदं॥१६॥ विकुर्वन्क्रिय
याचाधीरनिवृत्तिश्चचेतसां॥ गात्रास्वास्थ्यंमनोभ्रांतंरजएतैर्निशामय॥१७॥ रामराम

द्रया। जडत्वादुद्यमाभावेनकेवलमाशयायुज्येतेतिद्रव्यांजनइतिपाठेलयात्मकत्वमेव।
निद्राशयोर्हेतुः॥१५॥ किंचयदाचित्तंप्रसीदेत्स्वच्छंभवेत्। निर्वृतिःउपरतिः॥ तत्तदामत्पदंम
दुपलब्धिस्थानंसत्वमुद्रिक्तंविद्धि॥१६॥ यदापुनः क्रिययाविकुर्वन्॥ विकारंप्राप्नुवन्। अ
धीर्भवति आसमंताद्दीप्तिप्राधीर्यस्यसः। चेतसांबुद्धीइंद्रियाणांअनिवृत्तिः॥ गात्राणिकर्मेंद्रि
याणितेषामस्वास्थ्यं। विकाराधिक्यं॥ मनोभ्रांतंचंचलं। रजउत्कटंनिशामयजानीहि॥१७॥

कारकः कर्त्ता असंगी अनासक्तः ॥ रागांधः अत्यभिनिवेशवान् ॥ स्मृतिविभ्रष्टः अनुसंधानशून्यः मदपाश्र
यः मदेकशरणः स हि निरहंकारत्वान्निर्गुणः ॥ २६ ॥ अधर्मे अधर्म्म इति या श्रद्धा ॥ २७ ॥ पथ्यं हितं पूतं शुद्धं
अनायस्तं अनायासतः प्राप्तं ॥ आहार्यं भक्ष्यभोज्यादि इंद्रियाणां प्रेष्ठं कटुम्ललवणादि ॥ आर्तिदं अशुचि
दैन्यकरं अशुद्धं च ॥ चशब्दात्मन्निवेदितं निर्गुणमित्यभिप्रेतं ॥ २८ ॥ आत्मोत्थं सुखं मदपाश्रयमित्यपि

सात्त्विकः कारकोऽसंगी रागांधो राजसः स्मृतः ॥ तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥ २६ ॥ सात्त्वि
क्याध्यात्मिकी श्रद्धा कर्म्मश्रद्धा तु राजसी ॥ तामस्यधर्म्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥ २७ ॥ पथ्यं
पूतमनायस्तमाहार्यं सात्त्विकं स्मृतं ॥ राजसं चेंद्रियप्रेष्ठं तामसं चार्तिदाशुचि ॥ सात्त्विकं सुख
मात्मोत्थं विषयोत्थं तु राजसं ॥ तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं ॥ २९ ॥ द्रव्यं देशः फलं
कालो ज्ञानं कर्म्म च कारकः ॥ श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥ ३० ॥

त्वं तत्पदार्थविषयत्वेन ज्ञानवदेव द्रष्टव्यं ॥ २९ ॥ उक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्यां
द्रव्यं पथ्यपूतादि देशो वनग्रामादिः फलं सात्त्विकं सुखमित्यादि ॥ कालः यदा भजेत्तं मां भक्त्याय
देत रो जये दित्यादिनायोर्थोदुक्तः ॥ ज्ञानं कैवल्यं सात्त्विकं ज्ञानमित्यादि कर्म मदर्पणमित्यादि
कारकः सात्त्विकः कारकोसंगीत्यादि श्रद्धा सात्त्विक्याध्यात्मिकीत्यादि ॥ अवस्थास्त्वाजागरणमित्या
दि आकृतिः उपर्युपरि गच्छंतीत्यादिनोक्ता देवत्वादिरूपा निष्ठा सत्त्वे प्रलीनाः स्वर्यांतीत्यादिनोक्ता स्व

देहादुत्क्रांतकालीनगुणोत्कर्षफलमाह ॥ सत्त्वेवृद्धे सति प्रलीनाः मृताः रजोलयाः रजसि प्रवृद्धे सति
त्तयोयेषांते ॥ एवंतमोलयाइत्यपि। निर्गुणाइत्यत्रतुलयशब्दानुपादानाज्जीवंतोपिनिर्गुणाश्चे
न्मामेवयांतीत्यर्थः ॥२२॥ इदानींगुणोत्कर्षकृतमेवतत्तत्फलसाधनकर्म्मत्रैविध्यमाह ॥ मदर्पणम
त्मीत्युद्देशेनकृतं। निःफलंकेवलंदासभावेनैवकृतंयन्निजंकर्मनित्यादितत्सात्विकं ॥ फलसंक

सत्वेप्रलीनाःस्वर्यांतिनरलोकंरजोलयाः ॥ तमोलयास्तुनिरयंयांतिमामेवनिर्गुणाः ॥२२॥
मदर्पणंनिःफलंवासात्विकंनिजकर्मतत् ॥ राजसंफलसंकल्पंहिंसाप्रायादितामसं ॥२३॥
कैवल्यंसात्विकंज्ञानंरजोवैकल्पिकंतुयत् ॥ प्राकृतंतामसंज्ञानंमन्निष्ठंनिर्गुणंस्मृतं ॥२४॥
वनंतुसात्विकोवासोग्रामोराजसउच्यते ॥ तामसंद्यूतसदनंमन्निकेतंतुनिर्गुणं ॥२५॥

ल्पतेयस्मिन्तत्हिंसाप्रायंहिंसोद्देशेनकृतं ॥ हिंसाबहुलंच। आदिशब्दाद्दंभमात्सर्यादिकृतंच
२३ ॥ इदानींसगुणनिर्गुणभेदेनज्ञानादीनांचातुर्विध्यमाह ॥ कैवल्यंदेहादिव्यतिरिक्तात्मवि
षयं। वैकल्पिकंदेहादिविषयंयत्तद्रजःराजसं ॥ प्राकृतंबालमूकादिज्ञानतुल्यं ॥ मन्निष्ठं
परमेश्वरविषयं ॥२४॥ वनंविविक्तत्वात्सात्विकोवासः भगवन्निकेतनंतुसाक्षात्तदाविर्भावान्निर्गु
णंस्थानम् ॥२५॥

षड्विंशे योगनिष्ठाया विघातो दुष्टसंगतः॥ साधुसंगेन तन्निष्ठा परा काष्ठेति वर्ण्यते। योगिनो योगविभ्रंशः
संगतः संभवेदिति। सर्वथा तन्निवृत्त्यर्थमैलगीतं विरच्यते। निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः
तत्र विपदेऽनर्थकथयिष्यन् जीवन्मुक्तस्यापि तर्हि संगो दुर्वार इत्यर्थः स्यादित्याशंक्योक्तानुवादपू
र्वकं परिहरति सार्द्धाभ्यां मल्लक्षणं मत्स्वरूपं लक्ष्यते येन तमिमं नरदेहं लब्ध्वा मद्धर्मे भक्तिलक्षणे
आस्थितः सन् आत्मस्थं आत्मन्येव नियंतृत्वेन स्थितं परमानंदरूपमात्मानं मां समुपैति सम्य

श्रीभगवानुवाच॥ मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः॥ आनंदं परमात्मानमात्मस्थं
समुपैति मां॥१॥ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया॥ गुणेषु मायामात्रेषु दृश्यमाने
ष्ववस्तुतः॥२॥ वर्त्तमानोपि न पुमान् युज्यतेवस्तुभिर्गुणैः॥ संगं न कुर्यादसतां शिश्नोदरतृपां
क्वचित्॥३॥ तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत्॥

क्प्राप्नोति॥१॥ नचैवंभूतस्य विष
यसंगो नामास्तीत्याह॥ गुणमय्या या जीवयोनिः जीवोपाधिस्तया विमुक्तः॥ गुणेषु वर्त्तमानोपि
तैर्न युज्यते संगं न प्राप्नोति। अत्र हेतुः। अवस्तुभिः। न च वस्तुभिरप्यन्ये युज्यमाना दृश्यते तत्राह।
अवस्तुत्वेन दृश्यमानेषु॥२॥ तथापि संगं वर्जयेदित्याह। संगमिति॥ असतां लक्षणमाह शिश्नो
दरे तृप्यंतीति शिश्नोदरतृपस्तेषां क्वचित्कदाचिदपि आस्तां तावत् बहूनां संगः किंतु तस्यै
कस्याप्यनुगः अनुवर्त्ती। अंधमनुगच्छति योंधस्तद्वत्॥३॥ ॥ ॥

नवोचत्तं एषा एव किंतु यावंतः पुरुषाव्यक्ताधिष्ठिताः ॥ अधिष्ठिताः ते सर्वे भावा गुणमया एव तत्प्रपंचः इ
त्यभिमिति ॥ ३१ ॥ इदानीमुक्तत्रैगुण्यस्य संसारहेतुत्वमनुवदंस्तन्निर्जयान्मोक्ष इत्याह । एता इति सार्द्धेन ।
येन निर्जिताः स पश्चाद्विविक्तेन भक्तियोगेन मन्निष्ठः सन् मद्भावाय मोक्षाय प्रपद्यते ॥ योग्यो भवति ॥
३२ ॥ तस्माद्विवेकिना मिदमेवयुक्तमित्याह तस्मादिति । ज्ञानविज्ञानयोः संभवो यस्मिन् तमिमं नरदे

सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः ॥ दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ ३१ ॥ एताः संसृतयः पुं
सो गुणकर्मनिबंधनाः ॥ येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः ॥ ३२ ॥ भक्तियोगेन मन्निष्ठो मद्भा
वाय प्रपद्यते ॥ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं ॥ गुणसंगं विनिर्द्धूय मां भजंति विचक्ष
णाः ॥ ३३ ॥ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः ॥ रजस्तमश्चाभिजयेत्सत्वसंसेवया मुनिः ॥ ३४
सत्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शान्तधीः ॥ संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां ॥ ३५ ॥ जीवो
जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः ॥ मयैव ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत् ॥ ३६ ॥ इति श्रीभागव
ते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे पंचविंशतितमोध्यायः ॥

हं ॥ ३३ ॥ भजनप्रका

रमाह ॥ निःसंग इति सार्द्धेन ॥ सत्वसंसेवया सात्विकान्येव सेवेत पुमान् सत्वं विवृद्धयइति प्रा
गुक्तया नैरपेक्ष्येण उपशमात्मकेन सत्वेनैव ३४ एवं सति मां प्राप्नोतीत्याह संपद्यत इति । जीवं जीव
त्वकारणं लिंगशरीरं ॥ ३५ ॥ मां प्राप्तस्य न पुनः संसार इत्याह । जीव इति । न बहिः विषयभोगेन नां
तरः तत्स्मरणेन ॥ ३६ ॥ गुणाकृतामुरु संसरण प्रथामजितपुण्यकथा कथनादिभिः ॥ सुनुतभ
क्तिरसेन विवेकिनो न नहि पुनः सुलभं जनुरीदृशं एकादशे पंचविंसः ॥ ॥

भा०नं०
१२६

येनसम्मोहेन आत्मादेहः क्रीडामृगवत्तत्रधीनः॥९॥ ननु भार्ययकुपितायाः अनुनयार्थमधीनतायुक्तैव। सत्यं नत्वत्र तदस्तीत्याह। सपरिच्छदं राज्यादिसहितं ईश्वरं चक्रवर्त्तिनं। तमामिवत्प स्त्रियाय्रत्नी मपि अन्वगमं अनुगतोस्मि॥१०॥ किंचाममपूभावादाभिमानोऽव्यर्थवेत्याह॥ कुतस्तस्यमेनेजोचतं। स्वरोयथापादताडितोपि खरीमनुगच्छति। तद्वत्॥११॥ एवंभूतस्य सर्वं साधनं व्यर्थमाह। किं।

अहोमेआत्मसंमोहोयेनात्मायोषितांकृतः॥ क्रीडामृगश्चक्रवर्तीनरदेवशिखामणिः॥९॥ सपरिच्छदमात्मानंहित्वातृणमिवेश्वरं॥ यांतींस्त्रियंचान्वगमंनग्नउन्मत्तवद्रुदन्॥१०॥ कुतस्तस्यानुभावःस्यात्तेजईशित्वमेववा॥ योन्वगच्छंस्त्रियंयांतींखरवत्पादताडितः॥११॥ किंविद्ययाकिंतपसाकिंत्यागेनश्रुतेनवा॥ किंविविक्तेनमौनेनस्त्रीभिर्यस्यमनोहृतं॥१२॥ स्वार्थस्याकोविदंधिङ्मांमूर्खंपंडितमानिनं॥ योहमीश्वरतांप्राप्यस्त्रीभिर्गोखरवज्जितः॥१३॥ सेवतोवर्षपूगान्मेउर्वश्याअधरासवं॥ नतृप्यत्यात्मभूःकामोवह्निराहुतिभिर्यथा॥१४॥ पुंश्चल्यापहृतंचित्तंकोन्वन्योमोचितुंप्रभुः॥ आत्मारामेश्वरमृतेभगवंतमधोक्षजं॥१५॥

मिति। त्यागेनसंन्यासेन विविक्तेन एकांतसेवया॥ मौनेनवाङ्नियमेन॥१२॥ अनुतप्तःसन् आत्मानंनिंदति। द्वाभ्यां। स्वार्थस्येति। अकोविदमज्ञातारं गोखरवत्। गौश्चखरश्चेति॥१३॥ अधरासवंसेवया। मौनेनवाङ्नियमेमानस्य आत्मभूर्मनसिभू न रुद्धवन्॥१४॥ एवमसभिर्निर्वेदोनिरूपितः इदानींतस्यविवेकमाह दशभिः पुंश्चल्येति। अयंभावः कर्म्मभिर्देवादिना

राम
१२६

आत्मानं राजानं त्यक्त्वा अथवा शय्यायां आत्मानं त्यक्त्वा व्रजंतीमन्वगात्

अत्रेतिहासमाह। ऐलः पुरूरवाः सम्राट् चक्रवर्त्ती बृहच्छ्रवः कीर्त्तिर्यस्य सः उर्वशीविरहात् प्रथमं मुह्यन् पश्चात्कुरुक्षेत्रे तां समागम्य गंधर्वदत्तेनाग्निना देवानिष्ट्वा। पुनरुर्वशीलोकं प्राप्य शोकसंयमे शोकापगमे सति ततो निर्विण्णः सन्निमां गाथामगायत इति नवमस्कंधानुसारेणेदं द्रष्टव्यं॥४॥ प्राक्तनीं मोहावस्थामाह त्यक्त्वेति। घोरे तिष्ठेति। हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै इत्युक्तानेनौ मंत्रावनुदितास एते मयस्करन्परतरे व्योमन्नित्येवं मंत्रैर्विलपन्॥५॥ वैक्लव्यकारणमाह। कामानिति। वर्षा

ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः॥ उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे॥४॥ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः॥५॥ कामानतृप्तोऽनुजुषन् क्षुल्लकान्वर्षयामिनीः॥ न वेद यान्तीर्नायान्तीरुर्वश्याकृष्टचेतनः॥६॥ ऐल उवाच॥ अहो मे मोहविस्तारः कामकश्मलचेतसः॥ देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः॥७॥ नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितोऽमुया॥ मुषितो वर्षपूगानां बताहानि गतान्युत॥८॥

णां यामिनी रात्रीः

यांतीः अपयांतीः आयांतीः आगामिनीः॥ आकृष्टा चेतना यस्य सः॥६॥ तस्य गंधर्वलोकं प्राप्य चिरकालं उर्वशीसंभोगानंतरं निर्विण्णस्य गाथामाह अष्टादशभिः तत्राद्याभिरनुतापः प्रपंच्यते। अहो इति। यतो मया इमे अहोरात्ररूपाः आयुःखंडा न स्मृताः॥७॥ न वेदाहमिति। अभिनिर्मुक्तः म यि रममाणे अस्तंगतः अभ्युदितो वा सूर्य इति। अमुया उर्वश्या वंचितः। बत खेदे। उत अपि। वर्षपूगा

तुच्छा कृमिविड्भस्मान्तत्वेन निष्ठा अन्तो यस्य तस्मिन्कायकलेवरे नियत्वेन गृहीते। विषंगमेवाह। सुन संशोभननासिकं॥२०॥ अन्तो गुणोत्कर्षो रमणा मादृशाः कृमिसमा इत्याह। त्वगादिसंहतौ तत्सं घाते देहे विराम त्रादिसंहतौ रमतां कृमीणां वा॥२१॥ यद्यप्येवं बीभत्सितास्तथापि स्त्रियः। अथा पि नोपसजेत अवलोकनादिनापि संगं न कुर्यात्। अर्थवित् विवेकी॥ अत्र हेतुः विषयेति॥२२

तस्मिन्कलेवरेमेध्ये तुच्छनिष्ठे विषजते॥ अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः॥२०॥ त्वङ्मां सरुधिरस्नायुमेदोमज्जास्थिसंहतौ॥ विण्मूत्रपूये रमतां कृमीणां कियदंतरं॥२१॥ अथापि नोप सजेत स्त्रीषु स्त्रैणेषु चार्थवित्॥ विषयेंद्रियसंयोगान्मनः क्षुभ्यति नान्यथा॥२२॥ अदृष्टादश्रुता द्भावान्न भाव उपजायते॥ असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः॥२३॥ तस्मात्संगो न कर्त्त व्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः॥ विदुषां चाप्यविस्रब्धः षड्वर्गः किमु मादृशां॥२४॥ श्रीभगवानुवाच एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय॥ आत्मानमात्मन्यवगम्य मां वै उपारम ज्ज्ञानविधूतमोहः॥२५॥

नन्वकस्मिन्निमीलितनयनादेरपि मनःक्षोभो दृश्यते। सत्यं। सोपि पू र्वदर्शनादिकं विना न भवतीत्याह। अदृष्टादिति। भावात्पदार्थात्॥ भावो मनःक्षोभः अतः प्राणान्वइंद्रियाणि असंप्रयुंजतः नियच्छतः स्तिमितं निश्चलं सत्॥२३॥ इंद्रियैः कृत्वा अविस्रब्धः अ विश्वसनीयः मादृशां अविवेकिनां॥२४॥ फलितमाह। द्वाभ्यां। एवमिति। नृपेषु देवेषु च दीव्यतीति तथा॥२५॥

परमेश्वरप्रसादं विनादृष्टैरुपदिष्टादपि वेदवाक्यान्मोहो न निवर्त्तते। इत्याह बोधितस्यापीति। देव्यादृश्य
मन्त्रवाक्येन यथार्थवचनेन। पुरूरवो मामृथा मा प्रपप्तो मा त्वा वृकासो अशिवास उक्षन्। न वै स्त्रैणा
नि सख्यानि सन्ति शालावृकाणां हृदयान्येता इत्यनेन॥१८॥ पूर्वं पुंश्चलापहृतचित्तमित्यादिना तस्या
अपकारोऽनुस्मृतः इदानीमस्मैवायमपराध इत्याह किमेतयेति। नः अस्माकं कामिना एतया कि
मपकृतं न किंचिदपि॥ यथा रज्जुस्वरूपाविदुषो रज्ज्वां पुंसः स्वतः सर्पकल्पनया खिद्यतोपि
रज्ज्वा किमपि नापकृतं न हृत्॥ यद्वास्माचोद्द्रमेवं भूतः सखा अजितेंद्रियत्वादपराधीत्यर्थः॥२१॥ न

बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः॥ मनोगतो महामोहो नापयात्यजितात्मनः॥१६॥ किमेत
यानोपकृतं रज्ज्वा वा सर्पचेतसः॥ रज्जुस्वरूपाविदुषो योऽहं यदजितेंद्रियः॥१७॥ क्वायं मलीमसः
कायो दौर्गंध्याद्यात्मकोऽशुचिः॥ क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः॥१८॥ पित्रोः
किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः॥ किमात्मनः किं सुहृदामिति यो नावसीयते॥१९॥

नु तथापि सैव सौगंध्यप्रेमादिगुणैः संमोहमस्मिन्नित्याशंक्य तेपि स्वमतिपरिकल्पिता एवेत्याह। चतु
र्भिः। क्वायमिति। मलीमसः अतिमलिनः सुमनसां कुसुमानामिव गंधसौकुमार्यादि सौमनस्यं श
मनमनोभावो वा॥१८॥ ममत्वमपि तत्स्मिन्परिकल्पितमेवेत्याह। पित्रोः किं स्वं कायः जनकत्व
त्वानुचितं कं भार्यायाः वा भोगप्रदत्वात् अत्रानुपयुक्तमप्येतन्न्यायतुल्यत्वादुक्तं स्वामिनो वाऽन्न
आधीनत्वात् अग्नेर्वा अंते स्मात्तदाहुतित्वात्॥ श्वगृध्रयोर्वा भक्ष्यत्वात् किं वा आत्मनः तत्कृ
तशुभाशुभभागित्वात्। सुहृदां वा उपकारित्वात्। एवं यो न निश्चीयते॥१९॥ ॥

भा०ए०
१२८

किंच। यथान्नमेव प्राणिनां जीवनं। अहमेव यथा शरणं। धर्म एव यथा प्रेत्य परलोके वित्तं। तथा संत एव अर्वाक्
संसारपाताद्बिभ्यतः पुंसः अरणं शरणं॥३३॥ किंच। संतश्चक्षूंषि भगवत्ता निर्गुणज्ञानानि नित्य अर्कः पुनः सम्-
मुत्थितः बहिः तदप्येकमेव चक्षुरित्यर्थः॥३४॥ अध्यायार्थमुपसंहरति। वैतसेन इति। सुद्युम्नभावेनोमा-
वनप्रविष्टस्य वीतासेनास्त्रीभावप्राप्तायस्य तस्य स्त्रीभावं प्राप्तस्य पुत्रो वैतसेनः। पुरूरवाः। एवमु-

अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहम्॥ धर्मो वित्तं नृणां प्रेत्य संतोर्वाग्बिभ्यतोरणं॥३३॥ सं-
तो दिशंति चक्षूंषि बहिरर्कः समुत्थितः॥ देवता बांधवाः संतः संत आत्माहमेव च॥३४॥ वैतसे-
नस्ततोप्येवमुर्वश्या लोकनिःस्पृहः॥ मुक्तसंगो महीमेतामात्मारामश्चचार ह॥३५॥ इति
श्रीभागवते महापुराणे एकादशस्कंधे पुरूरवोगीतं षड्विंशोध्यायः॥ उद्धव उवाच॥ क्रिया-
योगं समाचक्ष्व भवदाराधनं प्रभो॥ यस्मात्त्वां ये यथार्चंति सात्वताः सात्वतर्षभ॥१॥ राम

228

क्तप्रकारेणोर्वश्या लोकात् स्थानादवलोकनादवलोकनाद्वा निःस्पृहः ततोपि सत्संगादपि हेतो।
मुक्तसंगः सन्नात्मारामो भूत्वा यथेष्टं चचारेति॥३५॥ इति एकादशे षड्विंशः॥ सप्तविंशे क्रियायोगः सप-
श्चित्तप्रसादकः॥ सर्वकामाप्तिहेतुश्च संगः प्रोक्तः समासतः॥१॥ रागाद्याकुलचित्तानां कुतः संगादिसंभ-
वः॥ इति तत्साध्यं न भद्रमनुस्मृत्यानुपृच्छति॥२॥ क्रियायोगमिति। भवदाराधनरूपं यस्मादिति करण-
अधिष्ठानादिप्रश्नः सर्वकारकाणां निमित्तत्वस्याविशिष्टत्वात्। यथेति कस्मिन्नधिष्ठानादौ केन प्रकारेण

राम
१२८

उक्तिभिः हितोपदेशैरिति ॥२३॥ तीर्थदेवादिसंगादपि सत्संगः श्रेयानिति दर्शयति ॥२६॥ सतां लक्षणमाह
सन्त इति विशेषणाग्रस्य यथेष्टं हेतुहेतुमद्भावः ॥२७॥ न च तेषूपदेशापेक्षा। अपि तु केवलं तत्सन्नि
धिरेव तारयतीत्याह। तेष्विति ॥ सप्तभिः ॥२८॥ श्रवणादिभिरेव मत्पराः श्रद्दधानाश्च सन्तो भक्तिं वि

ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् ॥ सन्त एतस्य छिन्दन्ति मनोव्यासंगमुक्तिभिः ॥२६॥ स
न्तोनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः ॥ निर्म्ममा निरहंकारा निर्द्वन्द्वा निःपरिग्रहाः ॥२७॥ तेषु नित्यं
महाभाग महाभागेषु मत्कथाः ॥ संभवन्ति हिता नॄणां जुषतां प्रपुनन्त्यघं ॥२८॥ ता ये शृण्वन्ति गायं
ति ह्यनुमोदन्ति चादृताः ॥ मत्पराः श्रद्दधानाश्च भक्तिं विंदन्ति ते मयि ॥२९॥ भक्तिं लब्धवतः साधोः
किमन्यदवशिष्यते ॥ मय्यनन्तगुणे ब्रह्मण्यानन्दानुभवात्मनि ॥३०॥ यथोपश्रयमाणस्य भगवन्तं
विभावसुं ॥ शीतं भयं तमोप्येति साधून्संसेवतस्तथा ॥३१॥ निमज्ज्योन्मज्जतां घोरे भवाब्धौ पर
मायनं ॥ सन्तो ब्रह्मविदः शान्ता नौर्दृढेवाप्सु मज्जतां ॥३२॥

इति ॥१९॥ विभावसुमग्निं सेवमा
नस्य ॥ अप्येति नश्यति ॥ तथा कर्म्मादिजाड्यं। आगामिसंसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः
३१॥ निमज्ज्योन्मज्जतामुच्चावचयोनीर्गच्छतां। परमायनं परमाश्रयः ॥३२॥ ॥

भा०ए०
१२६

किञ्च। संध्योपासनादीनि कर्म्माणीति॥ अचोदितानि साकल्येन विहितानि यस्य यानि तैः सह मे पूजां कुर्यात्। न तु तानि परित्यजेदित्यर्थः॥ सम्यक् परमेश्वरार्पणबुद्ध्या एव संकल्पो यस्य तथाभूतः सन्। कर्मपावनी कर्मनिर्हरणी॥ ११॥ अर्चाभेदानाह। सार्द्धेन। शैली शिलामयी लौही सुवर्णादिमयी लेप्या मृच्चंदनादिमयी॥ तद्वत्पूजायां मनोमयी॥ १२॥ प्रकर्षेणेति स्वल्पस्यापि मनि प्रतिष्ठा प्रतिमैव। जीवस्य भगवतो मंदिरं॥ यद्वा प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवति प्रति

संध्योपास्त्यादिकर्म्माणि वेदेनाचोदितानि मे॥ पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनी॥ ११॥
शैली दारुमयी लौही लेप्या लेख्या च सैकती॥ मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता॥ १२॥
चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं॥ उद्वासावाहने न स्तः स्थिरायामुद्धवार्च्चने॥ १३॥
अस्थिरायां विकल्पः स्यात्स्थण्डिले तु भवेद्द्वयं [illegible]
स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं॥ १४॥ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः॥ भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि॥ १५॥

माभेदेन विशेषमाह। सार्द्धेन। उद्वासो विसर्जनं॥ १३॥ अस्थिरायां सर्वे निविकल्पः शालग्रामे न कुर्यात् सैकतायां कुर्यात्॥ अन्यत्र कुर्याद्वा न वेति। अविलेप्यायां मृन्मयलेख्यप्रतिरिक्तायां॥ अन्यत्र क्लिन्नलेप्यायां लेख्यायां च परिमार्जनमेव॥ १४॥ द्रव्यानां सकामनिष्कामभेदेन विशेषमाह। द्रव्यैरिति प्रकर्षेण सिद्धैः सुशोभनैः। अमायिनो निष्कामस्य भक्तस्य तु यथालब्धैः यत्र चंदनादि सर्वथा न लभ्यते तत्र तद्धृदि भावेन भावनया। य

रामः
१२६

अस्य पुनर्विशेषतः प्रश्नकारणमाह। चतुर्भिः॥ एतत्तत्त्वदर्शनं निःश्रेयसकरं वदंति। आंगिरसः सुतो बृहस्पतिः॥२॥ निःसृतं त्वयोपदिष्टमित्यर्थः देव्यै पार्वत्यै॥३॥ सर्ववर्णानां त्रैवर्णिकानां॥४॥ विश्वेश्वरा ये तेषामीश्वरः॥५॥ कर्म्मकांडस्य पूजाविधानस्य नास्त्यंतो ग्रंथतः पारं वा उपासनतो यस्येति तस्य॥६॥ वैदिक एवम

एतद्वदंति मुनयो मुहुर्निःश्रेयसं नृणां॥ नारदो भगवान्व्यास आचार्योंगिरसः सुतः॥२॥ निःसृतं ते मुखांभोजाद्यदाह भगवानजः॥ पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः॥३॥ एतद्वै सर्ववर्णानामाश्रमाणां च सम्मतं॥ श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद॥४॥ एतत्कमलपत्राक्ष कर्म्मबंधविमोचनं॥ भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर॥५॥ श्रीभगवानुवाच॥ न ह्यंतोनंतपारस्य कर्मकांडस्य चोद्धव॥ संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः॥६॥ वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः॥ त्रयाणामीप्सितेनैव विधिना मां समर्चयेत्॥७॥ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः॥ यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे॥८॥ अर्चायां स्थंडिलेग्नौ वा सूर्ये वाप्सु हृदि द्विजे द्रव्येण भक्तियुक्तोर्च्चेत्स्वगुरुं माममायया॥९॥ पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये॥ उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना॥१०॥

त्रो वैदिकान्येवांगानि च यस्मिन्सु

रूपस्य तांत्रिकः स वैदिकः॥ एवं तांत्रिकोपि। मिश्र उभयात्मकः। मखः पूजा॥७॥ यदा त्रैवर्णिकाय जन्म तदा विशेषमाह। यदा गर्भाष्टमैकादशद्वादशादिकाले स्वनिगमेन स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्विजत्वं उपनयनं॥८॥ अर्चायां प्रतिमादौ स्नाने विशेषमाह॥ उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः॥१०॥

पाद्यार्घ्यार्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत्। तत्र पाद्यादि द्रव्याणि। पाद्ये श्यामाकदूर्वाब्जविष्णुक्रान्तादिरिष्यते॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः। दूर्वा चेति क्रमादर्घ्य द्रव्याष्टकमुदीरितं॥ जातीलवंगकक्कोलैर्मतमाचमनीयकमिति॥२१॥ तानि च त्रीणि पात्राणि यथाक्रमं त्वदयादिमंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत्॥ तदनंतरं पिंडे देहे वाय्वग्निसंशुद्ध इति॥ कोष्ठगतेन वायुना शोषिते आधारगतेनाग्निना दग्धे। पुनर्ललाटस्थचंद्रमंडलामृतप्लावनेनामृ

तोल्पपात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत्॥ पाद्यार्घाचमनीयार्थं त्रीणि पात्राणि देशिकः॥२१॥
त्वदाशीर्माचशिखया गायत्र्या चाभिमंत्रयेत्॥ पिंडे वाय्वग्निसंशुद्धे देहेत्स ब्रस्थां परां मम॥२२॥
अग्रांबीजीवकलां ध्यायेन्नादांते सिद्धभावितां॥ तयात्मभूतया पिंडे व्याप्ते संपूज्य तन्मयः॥२३॥ आवाह्यार्घ्यादिभिः स्थाप्य न्यस्तांगं मां प्रपूजयेत्॥२४॥

भूतन्मये जाते तस्मिन् त्वत्स ब्रस्थां परां श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्यायेत्॥२२॥ कथंभूतां नादांते सिद्धभावितां प्रणवस्याकारोकारमकारबिंदुनादाः पंचांशाः तत्र नादांते सिद्धैर्ध्यातां तथा च श्रुतिः॥ यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति॥२३॥ तयात्मभूतया स्वेनैव भावेनानुचिंतितया अमृतमये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति॥ तस्मिन्नेवादौ मानसैरुपचारैः संपूज्य तन्मयः सन्नर्घ्यादिभिरावाह्य स्थापनमुद्रया स्थापयित्वा॥२५॥

अधिष्ठानभेदेनप्रधानोपचारमाह॥सार्द्धेन। स्नानेति। तत्त्वविन्यासः यथास्थानमंगप्रधानदेवतानांतत्
न्मंत्रैः स्थापनं॥१६॥अभ्यर्हणं उपस्थानार्घादि सलिलादिभिस्तर्पणादिना यजनं। सर्वत्रसाधारणमा
ह। श्रद्धयेति॥पा॥एवमधिकारादिव्यवस्थामुक्त्वेदानीं पूजाप्रकारमाह। शुचिरिति। संभृताः संभाराः पूज
नानियेनसः प्रागग्रैर्दर्भैः। यद्वा प्रागेवसंभृतसंभारः सन्नासीनः नत्वासीनः सन्पश्चात्तत्संभारार्थंवा

स्नानालङ्करणंप्रेष्ठमर्चायामेवतद्धव॥स्थण्डिलेतत्त्वविन्यासोवह्नावाज्यप्लुतंहविः॥१६॥सूर्ये
चाभ्यर्हणंप्रेष्ठं सलिलेसलिलादिभिः॥श्रद्धयोपहृतंप्रेष्ठंभक्तेनममवार्य्यपि॥१७॥भूर्य्यप्यऽभक्तो
पहृतंनमेतोषायकल्पते॥गंधोधूपः सुमनसोदीपोन्नाद्यंचकिंपुनः॥१८॥शुचिः संभृतसंभारः
प्राक्दर्भैःकल्पितासनः॥आसीनः प्रागुदग्वार्चेदर्चायांत्वथसम्मुखः॥१९॥कृतन्यासः कृत
न्यासांमदर्चांपाणिनामृजेत्॥कलशंप्रोक्षणीयंचयथावदुपसाधयेत्॥तदद्भिर्देवयजनं
द्रव्याण्यात्मानमेवच॥२०॥
रंवारभुक्तियेदित्यर्थः। प्राङ्मुखः उदङ्मुखोवा आसीनः॥ अर्चा
यांतुस्थिरायांसम्मुखः अर्चाभिमुखउपविष्टः सन्॥१९॥अनंतरंगुर्वादिनमस्कारपूर्वकंयथो
पदेशंस्वस्मिन्कृतन्यासः कृतोमूलमंत्रन्यासोयस्यांतांममार्चां आमृजेत्। निर्माल्याद्यपकर्षणादि
नाशोधयेत्। कलशंपूर्णकुंभंप्रोक्षणीयंप्रोक्षणार्थोदकपात्रं। उपसाधयेत् चंदनपुष्पादिभिः
संस्कुर्यात्तदद्भिः प्रोक्षणीयाद्भिः देवयजनंदेवपूजास्थानं॥२०॥ ॥

भा०ए०
१३१

पाद्यादीनुपचारान्प्रकल्पयेदित्युक्तं। नानेवगुणविधिभिः प्रपंचयति चंदनेतिषड्भिः ॥३०॥ मंत्रानाह। स्व
र्णधर्मानुवाकः॥ सुवर्णं घर्मं परिवेदनमित्यादिमहापुरुषविद्या जितंते पुंडरीकाक्षनमस्ते विश्वभा
वन। सुब्रह्मण्य नमस्तेस्तु महापुरुषपूर्वज इति। पौरुषं सूक्तं सहस्रशीर्षेत्यादिनी राजनादीनि सा
मानि। इंद्रं नरोनेमधिताहवंत मित्यस्याम्नायगीतानि आदिशब्देन रौहिणादीनि ॥३१॥ वस्त्राद्युपच
रेषु अलंकारलक्षणं गुणं विधत्ते। वधत्ते। वस्त्रेति। पत्राणि कपोलवक्षस्थलादिषु लिखिताः पत्रभं

चंदनोशीरकर्पूरकुंकुमागुरुवासितैः ॥ सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति ॥३०॥ स्वर्ण
घर्म्मानुवाकेन महापुरुषविद्यया ॥ पौरुषेणापि सूक्तेन सामभी राजनादिभिः ॥३१॥ वस्त्रोपवी
ताभरणपत्रस्रग्गंधलेपनैः ॥ अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितं ॥३२॥ पाद्यमाचमनीयं
च गंधं सुमनसोक्षतान् ॥ धूपदीपोपहार्याणि दद्यान्मे श्रद्धयार्चकः ॥३३॥ गुडपायससर्पीं
षि शष्कुल्यापूपमोदकान् ॥ संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत् ॥३४॥ अभ्यंगो
न्मर्दनादर्शदंतधावाभिषेचनं ॥ अन्नाद्यगीतनृत्यानि पर्वणि स्युरुतान्वहं ॥३५॥ राम

गपः। मद्भक्तश्चेत्सप्रेम यथा भवति तथा ॥३२॥ यथोचितमलंकुर्वीतेत्युक्तार्थं ॥ सर्वसाधारणं श्रद्धा
लक्षणं गुणं विधत्ते पाद्यमिति ॥३३॥ नैवेद्ये वैभवलक्षणं गुणं विधत्ते। गुडपायसेति शष्कुल्यः तैल
पक्वविशेषाः आपूपाः अपूपानां मंडकादीनां समूहाः॥ सूपाः व्यंजनानि सति विभवद्रातिशे
षः ॥३४॥ कालभेदेन गुणं विधत्ते अभ्यंगेति अभिषेचनं पंचामृतादिस्नपनं॥ अन्नाद्येति। अन्नं
भोज्यं आद्यं भक्ष्यं पर्वणि एकादश्यादौ। अन्वहं प्रत्यहं वा विभवे सतीति ॥३५॥ राम

राम
१३१

कथं पूजयेत्तदाह॥ पाद्येति द्वाभ्यां॥ धर्म्मादिभिर्म्मम आसनं॥ तत्र पद्मं च कल्पयित्वा उभाभ्यां वेदतंत्राभ्यां उभ
भयसिद्धये मत्स्य पाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः उपस्पर्शः आचमनं अर्हणां अर्घ्यं॥२५॥ उभय
सिद्धये वेदतंत्रोक्त भुक्तिमुक्तिप्राप्तये॥ अयमर्थः धर्मज्ञानवैराग्यैश्वर्याणि आसनपर्य्यंकरूपाग्ने
यादिचतुष्कोणेषु पादाः। अधर्म्मादीनि पूर्वादिदिक्षु गात्राणि। त्रयो गुणाः पट्टिका। तत्र पूर्वादिक्र
मेण मध्ये च विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्येशानानुग्रहेति नव शक्तयः। एवं यथोप

पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेत्॥ धर्म्मादिभिश्च नवभिः कल्पयित्वासनं मम॥२५॥ प
द्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलं॥ उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये॥२६॥ सुदर्शनं पां
चजन्यं गदासीषुधनुर्हलान्॥ मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत्॥२७॥ नन्दं सुनन्दं
गरुडं प्रचंडं चंडमेव च॥ महाबलं बलं चैव कुमुदं कुमुदेक्षणं॥२८॥ दुर्गां विनायकं व्यासं विष्व
क्सेनं गुरून् सुरान्॥ स्वे स्वे स्थाने त्वभिमुखान् पूजयेत्प्रोक्षणादिभिः॥२९॥ देशे धर्म्मादिभिर्न

वभिश्च शक्तिभिरासनं कल्पयित्वेति कर्णिकायाः केसरैस्तत्रस्थसूर्यादिमंडलैश्च उज्ज्वलमि
त्यर्थः॥२६॥ आयुधादिपूजामाह। सुदर्शनमिति त्रिभिः तत्र न्यस्तांगमित्यंगावरणपूजा सूचिता॥ आ
सनेनैव शक्त्यावरणमप्युक्तं॥ ततः सुदर्शनादि मुशलांतान्यायुधान्यष्टदिक्षु कौस्तुभमालां
श्रीवत्सं हृदि रसि॥२७॥ सनंदादीन्पार्षदान्गरुडं पुरतः॥२८॥ दुर्गादीन्कोणेषु। गुरून्वाम
तः सुरानिंद्रादिलोकपालान्पूर्वादिदिक्षु एवमेतान्स्वस्वाभिमुखान्प्रोक्षणादिभिरर्घ्यादिभिः प्र

भा०ए०
१३२

मूलमंत्रेणाभ्युच्चारेण॥ तथा षोडशञ्चोयस्मिन्तेन पुरुषसूक्तेन च अवदानतः प्रत्यृचमाहुतिग्रह
णेनेत्यर्थः। पुरुषसूक्तेनाराधनप्रदेसाच्च मूलमंत्रः नेनैव प्रत्यृचमवदानतो होमइति। मंत्रैः स्वाहांते
नौममंत्रैर्यथाम्नायं पूजाक्रमेणैव अग्नये स्विष्टकृते स्वाहेत्येवं स्विष्टकृतं च हुत्वा॥४१॥ ततो वह्नि
स्थं भगवंतं अभ्यर्च्य। अथ नमस्कृत्य पार्षदेभ्यो नंदादिभ्योऽप्यसुदित्त्वबलिं हरेत्। ततः पूजास्थाने
मागत्य देवस्याग्रे समुपविश्य यथाशक्ति मूलमंत्रं जपेत्॥४२॥ ततश्च भयत्र भगवतो भोजनसमाप्ते

जुहुयान्मूलमंत्रेण षोडशर्चावदानतः॥ धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः॥४१॥ अभ्यर्च्या
थ नमस्कृत्य पार्षदेभ्यो बलिं हरेत्॥ मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकं॥४२॥ दत्वाचमनमुच्छे
षं विष्वक्सेनाय कल्पयेत्॥ मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत्॥४३॥ उपगायन्गृणन्नृत्य
न्कर्माण्यभिनयन्मम॥ मत्कथाः श्रावयञ्छृण्वन्मुहूर्तं क्षणिको भवेत्॥४४॥ स्तवैरुच्चावचैः
स्तोत्रैः पौराणैः प्राकृतैरपि स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत्॥४५॥ शिरो मत्पादयोः
कृत्वा बाहुभ्यां च परस्परं॥ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्॥४६॥

232

ध्यात्वाऽऽचम
नं दत्वा उच्छेषं विष्वक्सेनाय कल्पयित्वा तदनुज्ञया पश्चात्स्वयं भुंजीत। ततः सुरभिमत् सुगंध
वत्॥ तांबूलाद्यं मुखवासं दत्वाऽथ पुनरपि अर्हयेत्। पुष्पांजलिना पूजयेत्॥४३॥ अभिनयन्स्व
स्मिन्नाविष्कुर्वन्क्षणिकः वैयग्र्यं परित्यज्य तत्त्वावसरो भवेत्॥४४॥ स्तवस्तोत्राणां भेदं दर्शयति पौरा
णैः प्राकृतैरिति॥४५॥ कथं प्रणमेदित्यपेक्षायामाह॥ शिरइति॥ बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मम
दक्षिणोत्तरौ पादौ गृहीत्वा॥ यद्वा पृष्ठतः परस्परं निबद्धाभ्यां कृतापराधइव प्रपन्न मित्यादि विज्ञप्या

राम
१३२

फलभयस्यार्थिनोऽग्नावपि पूजाप्रकारमाह विधिनास्वगृह्योक्तप्रकारेण मेखलादिभिरुपलक्षिते विहि
तेन निर्मिते। तदुक्तं विस्तारोऽन्नायतस्तिस्रो मेखलाश्चतुरंगुलाः। हस्तमात्रो भवेदूर्ध्वस्तस्य योनिर्वेदिका
तथेत्यादि। ३ इति। तत्र प्रज्वलितमग्निं परितः समूहनेन एकत्रमेलयेत्। दर्भैः परिस्तीर्य परितः प्रोक्ष
येत्। अत्राधाय अन्वाधानसंज्ञकं स्वाद्येतिभिः समित्प्रक्षेपादिरूपं कर्म कृत्वा अग्नेरुत्तरतो द्रव्या

विधिना विहिते कुंडे मेखलागर्तवेदिभिः ॥ अग्निमाधाय परितः समूहेत्पाणिनोदितं ॥ ३६ ॥ प
रिस्तीर्याथ पर्युक्षेदन्वाधाय यथाविधि ॥ प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत माम् ॥ ३७
तप्तजांबूनदप्रख्यं शंखचक्रगदांबुजैः ॥ लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं ॥ ३८ ॥ स्फु
रत्किरीटकटककटिसूत्रवरांगदं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ॥ ३९ ॥ ध्याय
न्नभ्यर्च्य दारूणि हविषाभिघृतानि च ॥ प्रास्याज्यभागावाघारौ दत्त्वा चाज्यप्लुतं हविः ॥ ४०

णि होमोपयोगीन्यासाद्य निधाय प्रोक्षणीपात्रोदकेन प्रोक्ष्याग्नौ मां ध्यायेत् ॥ ३६ ॥ शंखादिभि
रुपलसंतः शोभमानाश्चत्वारो भुजा यस्य तं ॥ ३७ ॥ स्फुरंति किरीटादीनि यस्य तं ॥ ३८ ॥ हविषा घृतेन अ
भिघृतानि संसिक्तानि दारूणि शुष्कसमिधः प्रास्य प्रक्षिप्य आघारौ तत्संज्ञकौ यागौ एवमाज्यभागौ
च दत्त्वा तदर्था आहुती हुत्वेत्यर्थः। तत्राघारौ प्रजापतये स्वाहा॥ इंद्राय स्वाहेति चोत्तरदक्षिणपरिधि
संधिमारभ्याग्निमध्यादापरिध्यंतं च तत्तरणरूपौ। आज्यभागौ अग्नये स्वाहा॥ सोमाय स्वाहेत्येवं होमरूपौ॥ ४०

दातुः फलमुक्तं अपहर्तारं निंदति। य इति विड्भुक् विष्ठाभोजी कृमिः ॥५४॥ कर्तुर्यत्फलं तद्देवान्येषामित्याह। कर्तुरिति सारथेः सहकारिणः हेतोः प्रयोजकस्य अनुमोदितुश्च प्रेत्य तत्फलमित्यन्वयः। कुतः यतः कर्मणामेते भागिनः भागार्हाः तत्रापि विशेषमाह। भूय इति कर्मणि सारथ्यादौ च। भूयः अधिकं फलमिति ॥५५॥ पयः पत्रादिमात्रेण पूजितो यः परः पदः। प्रागेव दशितिप्रीतः सकृष्णः शरणं मम ॥१॥ एकादशे सप्तविंसः ॥ अथाष्टाविंशे तु यः पूर्वं विस्तरेण प्रवर्णितः॥ ज्ञानयोगः पुनश्चासौ समासात्त्प निरू

यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः। वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतम् ॥५४॥ कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च। कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलम् ॥५५॥ इति श्रीभागवते महापुराणे एकादशस्कंधे सप्तविंशोध्यायः ॥ श्रीभगवानुवाच ॥ परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्। विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ॥१॥ परस्वभावकर्माणि यः प्रशंसति निंदति। स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः ॥२॥ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः। मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान् ॥३॥

प्यते ॥१॥ इदानीमतिविस्तरेणोक्तं ज्ञानयोगं संक्षेपेणाववक्तुमाह। परेषां स्वभावान् शांतघोरादीन्। कर्माणि च तत्र हेतुः विश्वमिति ॥१॥ विपक्षे दोषमाह। परेति। स्वार्थात् ज्ञाननिष्ठालक्षणात्॥ असति मिथ्याभूते द्वैते अभिनिवेशात् ॥२॥ भ्रंशमेव दृष्टांतेनादर्शयति। तैजसे राजसाहंकारकार्ये इंद्रियगणे। निद्रया आपन्ने अभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति। ततो मनसि लीने सति नष्टचेतनः सन् मृत्युं वा मृत्युतुल्यां वा सुषुप्तिं प्राप्नोति यथा तद्वदेव नानार्थदृक् द्वैताभिनिवेशी विक्षेपं लयं च प्राप्नोतीति ॥३॥

ततः शेषाग्रहणपूर्वकं वैकल्पिकोद्वासनप्रकारमाह इति। अनयैव प्रार्थनया शेषां निर्माल्यं मया द
त्तां ध्यात्वा शिरस्याधाय चेत्त्वायमुद्वासयेत्तर्हि प्रतिमायाः पत्थस्तं ज्योतिस्तत्पुनरपि तत्प्रत्यग्ज्यो
तिष्येवोद्वासनीयं ॥४७॥ एतेषु विषयान्तिषु किं मुख्यमित्यपेक्षायामाह ॥ अर्चादिष्विति। यदा यत्र श्र
द्धा तदा तत्रानलाधिष्ठानेषु मुख्यामुख्यत्वं ॥ कुतः यतः सर्वभूतेष्विति ॥४८॥ उभयतः इहामुत्र च ॥४९॥

इति शेषां मया दत्तां शिरस्याधाय सादरं ॥ उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः ॥४७॥ अ
र्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत् ॥ सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ॥४८॥ एवं
क्रियायोगपथैः पुमान्वैदिकतान्त्रिकैः ॥ अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां ॥४९॥ मदर्चां
संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं ॥ पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ॥५०॥ पूजा
दीनां प्रवाहार्थं महापर्वस्वथान्वहं ॥ क्षेत्रापणपुरग्रामान्दत्वा मत्सार्ष्टितामियात् ॥५१॥ प्रति
ष्ठया सार्वभौमं सद्मना भुवनत्रयं ॥ पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥५२॥ मा
मेव नैरपेक्ष्येण भक्तियोगेन विंदति ॥ भक्तियोगं स लभत एवं यः पूजयेत मां ॥५३॥

समर्थं प्रत्याह। मदर्चामिति त्रिभिः। पुष्पोद्यानानि च कारयेत्। पूजायात्रोत्सवाश्रितान् पूजाप्रत्य
हं। यात्रा विशिष्टपर्वणि बहुलजनसमागमः उत्सवः वसंतादिमहोत्सवः तदाश्रितान् ॥५०॥ क्षे
त्रादीन्दत्वा पूजायात्रोत्सवाश्रिता नित्यस्य निवर्णप्रजादीनामिति। प्रवाहार्थं सन्ततानुवृत्त्यर्थं
मत्सार्ष्टितां मत्समानैश्वर्यं ॥५१॥ प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह। प्रतिष्ठयेति। मत्साम्य
तां मया साम्यमित्यर्थः ॥५२॥ सकामं प्रत्युक्तो। अहैतुकभक्तं प्रत्याह ॥५३॥ मामेवेति अहैतुकभक्ति
योगं कथं भवतीत्याह। भक्तियोगमिति ॥५३॥

ननुयद्यात्मसंविदासर्वदृश्यमसदित्युच्यते॥ तर्ह्यात्मास्वप्रकाशोदेहादिद्वैतंचजडमित्युक्तं।
स्यात्॥ तथाचसंसारप्रतिभासोनघटतेतिचोदयति॥ नैवेति अनात्मस्वदृशोर्जडाजडयोः अ
त्रद्रष्टृदृश्ययोः॥ माभूत्तद्वयोरपितत्राह॥ उपलभ्यतइति॥१०॥ एतत्प्रपंचयति। आत्मेति।
ति। अव्ययत्वादिपंचविशेषणैर्नाशादिरागादिपुण्यपुण्याज्ञानपरिक्षेदानामसंभवंदर्श।
यति। हेतुहेतुमत्वंतुयथेष्टंअचिजडः॥ अयंभावः यथैवाग्निदारुणोर्भेदेनानुपलंभेपिदा

उद्धवउवाच॥ नैवात्मनोनदेहस्यसंसृतिर्द्रष्टृदृश्ययोः॥ अनात्मस्वदृशोरीशकस्यस्यादुपल
भ्यते॥१०॥ आत्माऽव्ययोऽगुणःशुद्धःस्वयंज्योतिरनावृतः॥ अग्निवद्दारुवदचिद्देहःकस्येहसं
सृतिः॥११॥ श्रीभगवानुवाच॥ यावद्देहेंद्रियप्राणैरात्मनःसन्निकर्षणं॥ संसारःफलवांस्ता।
वदपार्थोऽप्यविवेकिनः॥१२॥ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्त्तते॥ ध्यायतोविषयानस्य
स्वप्नेऽनर्थागमोयथा॥१३॥

रुप्रकाश्यमेव। अग्निश्चप्रकाशकः। तथादेहात्मनोरपीति। नसंस
निस्तयोरन्यतरस्यापिघटतइति॥११॥ सत्यं तथाप्युभयोरेवमविवेकाएवसंसारालंबनमित्या
हापंचभिः॥ यावदिति॥ सन्निकर्षणंसंबंधः॥ नत्वसंगस्यकुतःसंबंधःतत्राह। अविवेकिनः
अज्ञानकृतइत्यर्थः॥ ननुस्वप्रकाशस्यकथमज्ञानतःसंसारःतत्राह। अपार्थोपिमिथ्याभूतोपि
केवलंफलवान्फलंस्फूर्तिः नतुतत्वतोऽस्तीत्यर्थः॥१२॥ नत्वसतोदेहादेःकुतःसंसारस्फूर्तिरि

134

केनासत्पतयास्तुतिनिंदयोर्निर्विषयत्वं प्रपंचयति सार्द्धैः षड्भिः। किं भद्रमिति। अवस्तुनो द्वैतस्य मध्ये किं भद्रं किं वाभद्रं कियद्वाऽभद्रमित्यर्थः अवस्तुत्वमेवाह। वाचेति वाचा इंद्रियोपलक्षणं। वाचोदितं उक्तं च क्षुरादिभिन्नं यद्दृश्यं तदनृतमिति॥४॥ न चैवं सति देहादिभावानामप्यसत्त्वात्कथं भयहेतुत्वं तत्र सदृष्टांतमाह॥ छायाप्रतिबिंबः प्रत्याह्वयः प्रतिध्वनिः आभासः शुक्तिरजतादिः एते यथाऽसंतोऽप्यर्थकारिणो भवंति। आमृत्युतः मृत्युमभिव्याप्य॥ यद्वा मृत्युश्चेयः पावन्नैव लीयते तावत्पर्यं

दि

किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्॥ वाचोदितं तदनृतं मनसा ध्यातमेव च॥४॥ छायाप्रत्याह्वयाभासा ह्यसन्तोऽप्यर्थकारिणः॥ एवं देहादयो भावा यच्छन्त्यामृत्युतो भयं॥५॥ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः॥६॥ तस्मान्न ह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः॥ निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि॥७॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतं॥ एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणं॥८॥ न निंदति न च स्तौति लोके चरति सूर्यवत्॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा॥९॥ आद्यन्तवदसज्ज्ञात्वा निःसंगो विचरेदिह॥

तमित्यर्थः॥५॥ ननु सृष्ट्यादिश्रुतिभिरेव द्वैतं निरूपितं कथमसत्यं स्यात्तत्राह। आत्मैवेति द्वाभ्यां। त्रायते पाल्यते त्राति पालयति॥६॥ अन्यस्मात् सृज्यादिव्यतिरिक्तात्। त्रिविधा अध्यात्मादिरूपा भातिः प्रतीतिः॥७॥ ननु कथं निर्मूला प्रतीयते तत्राह॥ इदमिति। ज्ञानविज्ञानयोर्नैपुणं निष्ठा॥८॥ सूर्यवत्समो भवत्वात् तत्रोपायमाह। प्रत्यक्षेणेति। यदाद्यन्तवत् द्वैतं तदसत् इति ज्ञात्वा निःसंगो विचरेत्। आद्यन्तवत्त्वे प्रमाणानि प्रत्यक्षेण घटादि अनुमानेन सावयवत्वेन दृश्यं पृथिव्यादि निगमेनाप्युत्पत्तिमाकाशादि। आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यन्तवदसच्चेति ज्ञात्वेति॥९॥ रामस

भा० ए०
१३५

तदेव ज्ञानं स्वरूपसाधनफलैर्निरूपयति ॥ ज्ञानमिति ॥ विवेको ज्ञानं ॥ साधनान्याह । निगमो वेदः तपः स्वधर्मः प्रत्यक्षं स्वानुभवः । ऐतिह्यमुपदेशः अनुमानं तर्कः ॥ फलमाह । आद्यन्तयोर्यदस्य जगतः मध्येऽपि तदेव केवलं न तु जगदिति ॥ किं तत् कालः कलयति प्रकाशयति यः तथा हेतुः कारणं च यत् ॥ तदेव ॥ एतदुक्तं भवति ॥ यदस्य विश्वस्य कारणं प्रकाशकं च ब्रह्म तदात्मक

ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं ॥ आद्यन्तयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥१८॥ यथा हिरण्यं सुकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य ॥ तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥१९॥

235

मेवैतत् न ततः पृथगित्येवं निश्चयफलो नियमादिसाधनैर्ज्ञायते यो विवेको ज्ञानमिति ॥१८॥ तत्र नानाभेदव्यवहारालंबनस्याऽपि विश्वस्य कारणमात्रात्मकत्वं सदृष्टान्तमाह यथेति । स्वकृतं सुष्ठु कुण्डलादिरूपेणाविरचितं यद्धिरण्यं कीदृशं हिरण्मयस्य कुण्डलादेरुत्पत्तेः । पुरस्तान्नाशाच्च पश्चाद्यदस्ति कटककुंडलमित्यादिनानाव्यपदेशैर्व्यवहार्यमाणमपि तदेव यथा ॥ तद्वदस्य विश्वस्य कारणभूतोऽहमेव नानाव्यवहारालंबनं न तु मत्तः पृथग्विश्वमिति ॥१९॥

राम
१३५

ननु कथंचिज्ज्ञानतो विषयस्फूर्त्तिर्जीवन्मुक्तस्यापि दुर्वारेत्यनिर्मोक्षप्रसंगः स्यात्तत्राह। यथाही
ति। प्रस्वापः स्वप्नः बह्वनर्थान्विभर्त्ति पुष्णातीति तथा॥१४॥ अहंकारस्तन्त्र एणो देहादिसन्निक
र्ष एव संसारालंबनमित्यन्वयव्यतिरेकाभ्यां दर्शयति शोकेति॥ सुषुप्त्यादौ तेषामदर्शनादहं
सुखीति वदेहोऽहंसुखीति प्रतीत्यभावाच्च दृश्यत्वाच्च सुखादीनां कृशत्वादिवत् द्रष्टृधर्मत्वा
नुपपत्तेरिति भावः॥१५॥ ननु यद्यहंकारस्य संसारस्तर्हि मुक्तिरपि तस्यैवेति मुक्तावहंकारावशेषः

यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत्॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते॥१४॥ शोक
हर्षभयक्रोधलोभमोहस्पृहादयः॥ अहंकारस्य दृश्यंते जन्म मृत्युश्च नात्मनः॥१५॥ देहेंद्रियप्रा
णमनोऽभिमानो जीवोंतरात्मा गुणकर्ममूर्त्तिः॥ सूत्रं महानित्युरुधेव गीतः संसार आधावति
कालतंत्रः॥१६॥ अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म्म॥ ज्ञानासिनोपास
नयाशितेन छित्वा मुनिर्गां विचरत्यतृष्णः॥१७॥ प्रसज्येत। तत्राह। देहादिष्वभिमानो यस्य सः
आत्मैव तेषामंतर्हितो जीवः अत एव गुणकर्ममयी मूर्त्तिर्यस्य सः। एवं च सूक्ष्मोपाधिभिर्बहु
धैव सूत्रादिशब्दैर्गीतः संसारे परमेश्वराधीनः सर्वतो धावति। अतो नायं दोष इति भावः॥१६॥
तदेवमहंकारकृतं बंधमुपपाद्येदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह॥ अमूलमिति। वस्तुतो
मूलशून्यं अज्ञानतस्तु बहुभी रूपैः रूपितं प्रकाशितं। एतज्जालिकातुल्यमितिवा किंतत्॥ तदा
ह॥ मनइति॥ मनआदीनां द्वंद्वः। यद्वा मन आदिषु क्रियतइति कर्म्म अहंकारस्तं गुरूपासनयानि

भा० ए०
१३६

एवंसामान्यतः कार्यप्रकाशयोः कारणप्रकाशकाभ्यामभेदं व्युत्पाद्य वस्तुतस्तदुभयविवेकपूर्वकं प्रपंच
स्य ब्रह्माभेदमाह ॥ अविद्यमान इति । योयं वैकारिकः विकारसमूहः । स एष प्रागविद्यमानो राज
ससर्गः रजोद्धरणे ब्रह्मकार्यभूत इत्यर्थः ॥ अवभासते प्रतीयते प्रकाशपश्चेत्यर्थः ॥ ब्रह्म तु स्वयं
स्वतः सिद्धं न तु कार्यमित्यर्थः । ज्योतिः स्वप्रकाशकमित्यर्थः ॥ अतः कारणात् इंद्रियाणि च अर्था
स्तन्मात्राणि च ॥ आत्मा मनश्च देवानामप्युपलक्षणं विकाराः पंचभूतानि एवं चित्रं ब्रह्मैव भा
तीति ॥२२॥ उपसंहरति ॥ एवं निगमतः प्रत्यक्षेतित्यानुमानैः स्फुटं यथा भवति तथा ब्रह्मवि

अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः ॥ ब्रह्मस्वयंज्योतिरतो विभाति ब्रह्मे
न्द्रियार्थात्मविकारचित्रं ॥२२॥ एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन ॥ छि
त्वात्मसंदेहमुपारमेत स्वानंदतुष्टोऽखिलकामुकेभ्यः ॥२३॥ नात्मा वपुः पार्थिवमिंद्रियाणि
देवा ह्यसुर्वायुर्जलं हुताशः ॥ मनोऽन्नमात्रं धिषणा च सत्वमहंकृतिः खं क्षितिरर्थसाम्यं ॥२४॥ राम

236

वेकहेतुभिः तथा परस्पदेहादेरपवादेन आत्मत्वनिरासेन च कौ दर्शनविशारदेन निपुणेन गुरुणा नि
मित्तभूतेन नेति वा आत्मविषयसंदेहं छित्वा स्वानंदतुष्टः सन्नखिलेभ्यः कामुकेभ्यः इंद्रियादिभ्य उपार
मेत निःसंगो भवेत् ॥२३॥ परापवादं प्रपंचयति ॥ वपुरात्मा न भवति । पार्थिवत्वात् घटवत् तथा इंद्रि
याणि तद् धिष्ठातारो देवा असुर्मनः धिषणा बुद्धिः सत्वं चित्तं अहंकृतिरित्येते आत्मा न भवति कुतः
अन्नमात्रं अन्नोपस्तंभत्वात् शरीरवत् वायुर्जलं च हुताशस्तेजः खं क्षितिरिति पंचभूतानि अर्थाः
शब्दादयः साम्यं प्रकृतिश्च नात्मा । जडत्वात् । घटवदिति । यद्वा हिशब्देन अनुमानान्तराणि सूचितानि
तद्यथा । इंद्रियाणि आत्मा न भवति । करणत्वात् [illegible]वत् प्राणश्च वायुत्वाद् बाह्यवायुवदिति ॥२४॥

प्राण

राम
१३६

तदिदं कार्यस्य कारणमात्रात्मकता मुक्त्वा प्रकाशस्य प्रकाशकात्मतामाह। विज्ञानमिति। त्रियवस्थयका
रस्य पृथक्पाठः छंदोनुरोधेन। जाग्रदादित्र्यवस्थयद्विज्ञानं मनः तदवस्थाकारणभूतं च यद्गुणत्रयं य
च्च कारणकार्यकर्तृ कारणमध्यात्मं कार्यमधिभूतं कर्तृ अधिदैवं। एवं गुणत्रयकार्यभूतं त्रिविधं जग
त्। एतद्येन तुर्येण सामान्यज्ञानमात्रेण समन्वयेन भवति येनानुगतं प्रकाशत इत्यर्थः। तमेव भांत
मनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति।। तथाचक्त. घञ्चक्त. रुत श्रोत्रस्य श्रोत्रं मनसो यन्म

विज्ञानमेतत्त्रिवयेस्थमङ्ग गुणत्रयं कारणकार्यकर्तृ ॥ समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदे
व सत्यं ॥२०॥ न यत्पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रं ॥ भूतं प्रसिद्धं च परेण यद्यत्तदे
व तत्स्यादिति मे मनीषा ॥२१॥

नो विदुरित्यादिश्रुतेः। ननु विशेषविज्ञानव्यतिरेकेण न तुर्यना
मोपलभामहे। तत्राह। व्यतिरेकतश्च समाध्यादौ यदस्ति तदेव सत्यमिति ॥२०॥ एवं कालत्रयेप्यव्य
भिचारिणः सत्यत्वमुक्तं।। व्यभिचारिणस्त्वसत्यतामाह। न यदिति। मध्ये च न पृथगस्ति किंतु व्यपदे
शमात्रं कुतः यतः यद्यत्परेण अन्येन भूतं जातं प्रसिद्धं प्रकाशितं च तत्तत्तदेव कारणप्रकाशकं
तावन्मात्रं स्यान्न पृथगिति मे मनीषा बुद्धिः।। वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं ख
ल्विदं ब्रह्मेत्यादिश्रुतेः। कारणप्रकाशकव्यतिरेकेण च कार्यस्य प्रकाशस्य चानुपलंभादिति भावः ॥२१॥

भा०१° १३१

ननु कथंचिन् विषयसंयोगवियोगभ्रंशः स्यात् अलं तर्हि सोपायेन योगमार्गेण तत्राह॥ कुयोगैर् नड
ति मनुष्यभृते वन्धुशिष्यादिरूपैः त्रिदशोरुपसर्गैः परितः। तथा च श्रुतिः॥ यस्मात्तदेषां न प्रियं य
देतन्मनुष्या विद्युरिति भयो जन्मान्तरे॥ ननु कर्म्मतंत्र कर्म्म विस्तार॥२९॥ ननु विदुषामपि सर्वे
षां कर्म्म दुष्परिहरमिति पुनः संसारः स्यात् अत आह। करोतीति विद्वानन्यो सो जंतुर्देह एव भो
जनादिकर्म्म करोति क्रियते विक्रियते च तेन कर्म्मणा पुण्यपापयोः पि प्राप्नोतीत्यर्थः॥ केनापि संस्का
रादिना चोदितः सन् विद्वांस्तु प्रकृतौ देहे स्थितोपि न तत्र कर्म्मणि न विक्रियते॥ निरहंकारित्वात् इ

कुयोगिनो ये विहतास्त्वंतरायैर्मनुष्यभृते त्रिदशोपसर्गैः॥ ते प्राक्तनाभ्यासबलेन भूयो युं
जंति योगं न तु कर्म्मतंत्रं॥२९॥ करोति कर्म्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात्॥ न
तत्र विद्वान् प्रकृतौ स्थितोपि निवृत्ततृष्णः स्वसुखानुभूत्या॥३०॥ तिष्ठंतमासीनमुत व्रजंतं शया
नमुक्षंतमदंतमन्नं॥ स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न्न वेद॥३१॥ यदि स्म प
श्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत्॥ न मन्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय ति
रोदधानं॥३२॥ र्षविषादादिभिः संसारं न प्राप्नोति॥३०॥ किंच आस्तां तावद्देहिककर्म्मभिर्विकारशं
का यतो देहमप्यसौ न पश्यतीत्याह। तिष्ठंतमिति। मूत्रं तं मूत्रयंतं स्वभावं प्राप्तं मन्यदपि दर्शनस्पर्श
नादि इहमानं कुर्वंतं आत्मानं देहं॥३१॥ नन्विंद्रियवतः सर्वथा कथमदर्शनं संभवति तत्राह॥ य
दि स्मेति। यद्यपि असत् नाबाह्यसुखानामिंद्रियाणामर्थं पश्यति॥ तथापि नानात्वान्मिथ्या स्वप्नव
दित्यनुमानेन विरुद्धं बाधितं सत् अन्यदात्मव्यतिरिक्तं मनीषी वस्तुतया न मन्यते स्वापादु
त्थाय प्रबुद्धः संस्कारमात्रेण स्वाप्नं विषयं स्फुरंतं अतएव स्वयमेव तिरोभवंतं यथा तद्वत्॥३२

२३७

राम १३१

एवं विवेकज्ञानवतो मुक्तस्येन्द्रियादिकृतो गुणदोषसंबंध इत्याह समाहितैरिति ॥ मत्सु विविक्तधाम्नः मम सुष्ठु विविक्तधामस्वरूपं येन तस्य प्रकाशकस्य प्रकाशस्य गुणदोषा न भवन्ति इति रविदृष्टान्तेनोक्तं ॥ ३५ ॥ असंगवद्दूरत्वेनावस्थितस्य न केपि गुणदोषा इत्याकाशदृष्टान्तेनाह यथेति । वाय्वादीनां शोषणदाहनक्लेदनरजोभूसरत्वादिभिर्गतागतै रागमापायिभिः अतुगुणैः शीतोष्णादि

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सु विविक्तधाम्नः ॥ विलिप्यमानो रुत किं तु दूषणं घनैरुपेतैर्विगतै रवेः किं ॥ ३५ ॥ यथा नभो वाय्वनलाम्बुभूगुणैर्गतागतैर्वर्त्तुगुणैर्न सज्जते ॥ तथाक्षरं सत्त्वरजस्तमोमलैरहं मतेः संसृतिहेतुभिः परं ॥ ३६ ॥ तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत् ॥ मद्भक्तियोगेन दृढेन यावद् रजो निरस्येत मनःकषायः ॥ ३७ ॥ यथामयोऽसाधु चिकित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् ॥ एवं मनोऽपक्वकषायकर्म्म कुयोगिनं विध्यति सर्व्वसंगं ॥ ३८ ॥

दिभिर्वा अहंमतेः अहंकारात्परमक्षरं संसृतिहेतुभिर्न युज्यते । यद्वा अहंकारस्य संसृतिहेतुभिरिति ॥ ३६ ॥ मुक्तवदसम्यक्ज्ञानी न यथेष्टमाचरेदित्याह ॥ द्वाभ्यां तथापीति । गुणेषु विषयेषु रजो रागः मनसः कषाय इति दुर्निरासतामाह ॥ ३७ ॥ एतदेव दृष्टान्तेनोपपादयति यथेति नृणामामयो रोगः असाधु असम्यक् यथा भवति तथा अपक्वकषायकर्म्म अदग्धाः कषाया रागादयः तन्मूलानि कर्म्माणि च यस्मिन् तत् अत एव सर्व्वसंगं सर्व्वेषु पुत्रादिषु सज्जमानं अतः कुयोगिनं असम्य

भा० ए०
१३८

आत्मनो निर्विकारतां प्रपंचयति। एष इत्यनेन अपरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति। स्वयं
ज्योतिरिति। अज्ञानमलापाकरणलक्षणां विक्रियां निवारयति। अज इत्युत्पत्तिं निवारयति। अप्रमेय इति।
मानलक्षणातिशयाधानेन संस्कारं। महानुभूतिरिति देशकालपरिच्छेदाभावेनास्तित्वं हि विप
रिणामापक्षयनाशान्। स्वयंज्योतिष्ट्वादौ हेतुः सकलानुभूतिरिति। एको द्वितीय इति विका
रहेतोरन्यस्याभावान्नकोऽपि विकार इति दर्शयति। ननु श्रुतिविषयस्य कथं स्वयंज्योतिष्ट्वा-
दित्यत्राह॥ वचसां विरामे अगोचरत्वेन निवृत्तौ सत्यां तथा च श्रुतिः यतो वाचो निवर्तन्ते अप्राप्य

एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिस्सकलानुभूतिः॥ एकोऽद्वितीयो वचसां विरा
मे येनेषिता वागसवश्चरन्ति॥३५॥ एतावानात्मसम्मोहो यद्विकल्पस्तु केवले॥ आत्म
न्नते स्वमात्मानमवलंबो न यस्य हि॥३६॥

238

मनसा सहेति। तत्र हेतुः। येनेषिताः प्रेषिताः॥
तथा च श्रुतिः॥ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः॥ केनेषितां वाचमिमां व
दन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति। श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स प्राणस्य प्राणश्चक्षु
षश्चक्षुरिति॥३४॥ अद्वितीयत्वं प्रतिपादयितुं भेदस्यावास्तवत्वमाह। एतावानिति केवले अ
भिन्ने आत्मन् आत्मनि। विकल्प इति यत् एतावान् सर्वोऽपि आत्मनो मनसः सम्मोहः भ्रमः।
यतः स्वमात्मानमन्तरेण वीनायस्य विकल्पस्यावलंब आश्रयो नास्ति। रजतभ्रमस्येव शुक्तिं वि
ना। नेह नानास्ति किंचन। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्येवमित्या

राम
१३८

तदेवमात्मानं किं क्रियत इत्युक्तं। नन्वेतदनुपपन्नं॥ बद्धावस्थायामपज्यमानत्वात्मुक्तावस्थायां च गृ
ह्यमाणत्वात्। न हि व्रीह्योः वघातेन व्रीहिभावत्यागतस्तण्डुलीभावेन गृह्यमाणं न विक्रियते।
तत्राह। पूर्वमिति। बंधावस्थायां गुणैः कर्मभिश्च चित्रमज्ञानकार्यं देहे॥ न्द्रियादिलक्षणं आत्म
न्यध्यासेनाविविक्तं गृहीतमासीत्तदेव पुनर्ज्ञानेन विनिवर्त्तते॥ आत्मा तु नकेनापि रूपेण गृ

पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमङ्ग॥ निवर्त्तते
तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा॥३३॥ यथा हि भानोरुद
यो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते॥ एवं समीक्षा निपुणा सती मे ह
न्यात्तमिस्रं पुरुषस्य बुद्धेः॥३४॥

ह्यते नापि त्यज्यते। अयंभावः मुक्तेः क्रियाफलत्वे तावदात्मनो विकारः॥ तस्यास्त्वारोपिताज्ञा
नमात्रनिवृत्तिरूपत्वान्नात्मसंस्पर्शित्वं बंधमोक्षयोः अतो न विकार इति॥३३॥ एतदेव दृष्टां
तेन स्पष्टयति। नितु पूर्वमेव सद्घटादि पुनर्विधत्ते करोति। या समीक्षा आत्मविद्या॥३४

यथेति

भा० ए०
१३९

अन्येतु देहसिद्ध्यर्थमेवैतत्सर्वं कुर्वंतीति तद्दूषयति। केचिदिति। केचित्तु नरैतैरन्यैश्चोपायैर्देहमेवसुकल्पं जरारोगादिरहितं वयसि तारुण्ये स्थिरं च कृत्वा परकायप्रवेशादिसिद्धये तत्तद्धारणारूपं योगं युंजंति। न तु ज्ञाननिष्ठारूपं॥४१॥ कुशलैः प्राज्ञैरादरणीयं न भवति। वनस्पतिवदात्मैवस्थायी शरीरं तु फलवन्नश्वरमित्यर्थः॥४२॥ ननु क्वचित्समाध्यंगत्वेनापि प्राणायामादियोगेक्रियमाणे जरारोगाद्यभावो दृश्यते। सत्यं तथापि समाधिमुत्सृज्य न तत्र सज्जेतेत्याह॥ योगमि

केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं॥ विधाय विविधोपायैरथ युंजंति सिद्धये॥४१॥ नहि तत्कुशलादृत्यं तदायासो ह्यपार्थकः॥ अंतवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः॥४२॥ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात्॥ तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः॥४३॥ योगचर्यामिमां योगी विचरन्मदपाश्रयः॥ नांतरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः॥४४॥ इति श्री भागवते महापुराणे एकादशस्कंधेऽष्टाविंशोध्यायः॥

ति। न तत्तां देहसिद्धिं

न श्रद्दध्यान्न विश्वसेत्॥४३॥ न देवं विघ्नघ्नीकारैर्योगं कुर्यादित्युक्तं। मच्छरणस्य तु न विघ्नशंकापीत्याह। योगचर्यामिति विचरन्नाचरन्स्वसुखेऽनुभूः अनुभूतिर्यस्य। स्पृहा मूलाहि विघ्नाः सा च मदपाश्रयस्य निवर्तते॥ अतोऽन्तरायैरविहतः स्वानंदपूर्णो भवतीति॥४४॥ समाप्य स्वयोगं तु समस्तोपनिषद्रसं। सरव्ये मुख्यतमां भक्तिमुक्तौ पुनरुपादिशत्॥१॥ इतिकार

राम
१३९

केचित्पुनःप्रत्यक्षादिप्रतीतप्रपंचस्यबाधायोगाद्वेदांतानांचकर्त्त्वर्थकर्तृप्रतिपादनपरत्वेनार्थवादत्वात्
द्वैतंसत्यमितिमन्यंते। तन्मतमनूद्यदूषयति॥ यदिति। नामाकृतिभिः नामरूपोपलक्षितंप्रपंचभू
नात्मकंद्वयंद्वैतंयत्तदबाधितमितिपंडितमानिनां अत्रवयमेवपंडिताइत्यभिमानवतांवेदांत
स्वयमर्थवादइतिप्रतीतिः। नतत्त्वविदां यतःअर्थेनापिविनाप्यर्थेनसाप्रतीतिः। तथाहि। नत
द्विद्वाक्यानांकार्यत्वंतेषामस्तियतोऽर्थवादत्वंस्यात्॥ नचाकर्तृभोक्तृपरमानंदात्मप्रतिपादनंक
र्मविधिशेषतांभजते॥ नचाबाधितंद्वैतंतस्यनामरूपात्मकत्वात्। ग्राह्यत्वात्॥ पंचवर्णात्मकत्वात्
स्वप्नवदित्याद्यनुमानैर्विचारभगादिश्रुतिभिश्चबाधितत्वादिति॥३७॥ तदेवंज्ञानयोगंसपरिकरंनि

यन्नामाकृतिभिर्ग्राह्यंपंचवर्णमबाधितं॥ व्यर्थेनाप्यर्थवादोयंद्वयंपंडितमानिनां॥३७॥ योगिनोऽ
पक्वयोगस्ययुंजतःकायउत्थितैः॥ उपसर्गैर्विहन्येततत्रायंविहितोविधिः॥३८॥ योगधारणया
कांश्चिदासनैर्धारणान्वितैः॥ तपोमंत्रौषधैःकांश्चिदुपसर्गान्विनिर्दहेत्॥३९॥ कांश्चिन्ममा
नुध्यानेननामसंकीर्त्तनादिभिः॥ योगेश्वरानुवृत्त्यावाहन्यादशुभदांछनैः॥४०॥ रामः

रूप्येदानींतन्निरस्यविघ्नप्रतीकारमाह। योगिनइतित्रिभिः॥ योगंयुंजतःकायोयद्यंतरैवोत्प
न्नैरुपसर्गैःरोगाद्युपद्रवैःअभिभूयतेतत्रायंविधिःप्रतीकारः॥३८॥ योगधारणयासोमसूर्यादिधार
णयासंतापशैत्यादीन्आसनैर्वायुधारणान्वितैःवातादिरोगान्॥ तपोमंत्रौषधैःपापग्रहसर्प्पा
दिकृतान्॥३९॥ ममानुध्यानादिभिःकामादीन्॥ योगेश्वरसनुवृत्त्यादंभमानादीन्हन्यात्॥४०॥ राम

भा०ए०
१४०

त्वद्भक्तास्तु त्वत्प्रसादेन कृतार्था भवंतीति नातिचित्रमित्याह। किमिति। अनन्यशरणेषु तवात्मसात्त्वं तदधीनत्वं। यत्तु यथा नंदगोपीबलिप्रभृतिषु एतत्किं चित्रं नाश्चर्यमित्यर्थः॥ यतो यो भवान् श्रीरामरूपेण मृगैर्वानरैः सह साहित्यं सख्यमिति यावत्॥ अरोचयत् प्रीत्या कृतवान्॥ कथंभूतः ईश्वराणां ब्रह्मादीनां यानि श्रीमंति किरीटानि तेषां तटान्यग्राणि तैः पीडितं विलुठितं पादपीठं यस्य स्वयं तथाभूतोपि सन् ४ अतस्त्वां परित्यज्य को नामान्यत्संश्रयेदित्याह। तं त्वेति। तमेवंभूतं त्वां को नु विसृजेत् न भजेत् कथं

किंचित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं॥ योरोचयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः॥४॥ तं त्वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु॥ को वा भजेत्किमपि विस्मृतयेनु भूत्यै किं वा भवेन्न तव पादरजोजुषां नः॥५॥

भूतः स्वकृतवित्। बलिप्रह्लादादिषु त्वया कृतमनुग्रहं जानन्॥ यथा स्वस्मिन्नेवांतर्यामितया कृतमुपकारं विद्वान्। तदेवाह। अखिलात्मदयितेश्वरं अखिलस्य जगतः॥ आत्मानं चेतयितारं आत्मत्वादेव दयितं प्रेष्ठं सुसेव्यं ईश्वरत्वादेव भजनीयं। किं च आश्रितानां सर्वार्थदं॥ तत्किं फलोद्देशेनाहं सेव्यः। नहि नहि किमपि अनिरुक्तं त्वद्व्यतिरिक्तं स्वर्गादि त्वया दत्तमपि को वा भजेन्न सेवेत। कथंभूतं तत् यत्केवलं भूत्यै इंद्रियभोगाय अनु अनंतरमेव त्वद्विस्मृतये भवति। यद्वा त्वद्व्यतिरिक्तं किमपि देवतांतरं धर्मज्ञानादि साधनं वा भूत्यै ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय वा को भजेत्। न कोपि। ननु तत्तत्साधनं विना भोगमोक्षादिफलं कथं स्यात्तत्राह। किं वेति॥५॥ तदुक्तं या वै साधनसंपत्तिः पुरुषार्थचतुष्टये। तया विना तदाप्नोति नरो नारायणाश्रय इति।

240

राम
१४०

कनविंशेनुयः पूर्वं विस्तरेण निरूपितः॥ भक्तियोगस्तमेवाह स्वभक्ताय समासतः॥१॥ अतिक्लेशमिवाल
क्ष्य योगेऽसंगैकसंपदि सुखोपायं पुनः कृष्णमुद्धवः परिपृच्छति॥२॥ अनात्मनः अवशीकृतमनसः। अं
जसा अप्रयासेन यथा सिद्ध्येत् तत्तथा अंजसा सुबोधं यथा तथा मे ब्रूहि॥१॥ सुदुःकरतां प्रपंचय
ति। प्रायश इति। मनो युंजंतः निगृह्णंतः विषीदंति क्लिश्यंति। कुतः असमाधानात्। अनिगृही
ता कथंचिन्मनसो निग्रहेण च कर्शिताः श्रांताः संतः॥२॥ यस्मादेवं केचन विषीदंति। अथातः अतए

उद्धव उवाच॥ सुदुष्करामिमां मन्ये योगचर्यामनात्मनः॥ यथांजसा पुमान्सिद्ध्येत्तन्मे ब्रूह्यंजसा
च्युत॥१॥ प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः॥ विषीदंत्यसमाधानान्मनोनिग्रहकर्शिताः॥२॥
अथात आनंददुघं पदांबुजं हंसाः श्रयेरन्नरविंदलोचन॥ सुखं नु विश्वेश्वर योगकर्मभिस्त्व
न्माययामी विहता न मानिनः॥३॥

व ये हंसाः सारासारविवेकचतुराः ते तु आनंददुघं समस्ता
नंदपरिपूरकं तव पदांबुजमेव सुखं यथा भवति तथा तु निश्चितं श्रयेरन्। सेवंते। अमी तु त्वन्माय
या विहताः के ये योगकर्मभिर्मानिनः संतो न श्रयंते। यद्वा अमी त्वत्कृताः॥ त्वन्मायया न विहताः अ
त एव योगकर्मभिः कृत्वा मानिनो न भवंति अन्ये तु त्वन्मायया मोहिताः संतो वयं योगज्ञाः वयं क
र्मकुशला इति केवलं गर्विता भवंति न तु सुखं भजंत इत्यर्थः॥३॥ ॥ ॥

र्ममनिर्वाह। कुर्यादिति त्रयोदशभिः॥ मां स्मरन्। शनकैरसंरंभतः कुर्यात्। तदाह। मयीति। अर्पिते मनःचि
त्ते संकल्पविकल्पानुसंधानात्मके येन अतएव मद्धर्मेष्वेवात्ममनसो रतिर्यस्य सः॥९॥ पुण्यदेशलक्षणं म
द्भक्तैरिति देवादिषु ये मद्भक्तास्तेषां आचरितानि कर्माणि चाश्रयेत्॥१०॥ सत्रेण संभूय वा॥११॥ अंतरंगां
भक्तिमाह। मामिति त्रिभिः सर्वभूतेष्वात्मनि चात्मानमीश्वरं स्थितं मामेवेक्षेत। कथमेकस्य सर्वेषु
वृत्तिः। तत्राह। बहिरंतः पूर्णमित्यर्थः॥ तत्कुतः। अपावृतं अनावरणं तदपि कुतः। यथा खं असंगत्वादि

कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन्॥ मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः॥९॥ देशान्पु
ण्यान्संश्रयेत मद्भक्तैः साधुभिः श्रितान्॥ देवासुरमनुष्येषु मद्भक्ताचरितानि च॥१०॥ पृथक्सत्रेण
वा मह्यं पर्वयात्रामहोत्सवान्॥ कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः॥११॥ मामेव सर्वभू
तेषु बहिरंतरपावृतं॥ ईक्षेतात्मनि चात्मानं यथा खममलाशयः॥१२॥ इति सर्वाणि भूतानि मद्भा
वेन महाद्युते॥ सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः॥१३॥ ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के
स्फुलिंगके॥ अक्रूरे क्रूरके चैव समदृक्पंडितो मतः॥१४॥ त्यर्थः॥१२॥ हे महाद्युते अतिप्राज्ञ इति।
अनेन प्रकारेण केवलं ज्ञानरूपां दृष्टिमाश्रितः सन्सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजयन्
पंडितो मतः इत्युत्तरेणान्वयः॥१३॥ ननु तममध्यमाधमेष्वेकरूपेण सभाजनमपांडित्यमेव स्यात्। पू
ज्यपूजादिव्यतिक्रमादित्याशंक्य तामेव ज्ञानदृष्टिं प्रपंचयति। ब्राह्मण इति। विषमेष्वपि समदृक् स
मं मामेव पश्यन् वैषम्यमेव चतुर्द्धा दर्शयति। ब्राह्मणे पुक्कस इति जातितो वैषम्यं पुक्कसोंत्यजवि
शेषः स्तेने ब्रह्मस्वहारिणि ब्रह्मण्ये दातरीति कर्मतः॥ अर्के विस्फुलिंगके इति गुणतः अक्रूरे शां

आस्तामन्यभजनवार्त्तात्वत्कृतोपकारस्य त्वय्यात्मनिवेदनेनैव च निष्कृतिर्नास्त्यथेत्याह। नैवेति। अपचि
तिमपचितिमुपकारं आनृण्यमिति यावत् कवयो ब्रह्मविदोऽपि नैव प्राप्नुवंति। यतस्त्वत्कृतमुपकारं स्मरंतः उपचि
तपरमानंदाः॥ उपकारमेवाह। यो भवान् बहिः सचार्यवपुषा गुरुरूपेण अंतश्च चैत्यवपुषा अंत
र्यामिरूपेण अशुभं विषयवासनां विधुन्वन् निरस्यन्। स्वगतिं निजं रूपं प्रकटयति तस्य तव॥६॥

नैवापयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः॥ योंतर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति॥६॥ श्रीशुक उवाच॥ इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः॥ गृहीतमूर्त्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः॥७॥ श्रीभगवानुवाच॥ हंत ते कथयिष्यामि मम धर्मान्सुमंगलान्॥ यांछ्रद्धयाचरन्मर्त्यो मृत्युंजयति दुर्जयं॥८॥

ईश्वरत्वे हेतुः। जगत्क्रीडनकं क्रीडोपकरणं यस्य सः ननु जगत्स्रष्टादिना ब्रह्मेशादयः क्रीडंतीति तत्राह। स्वशक्तिभिः सत्वादिभिः गृहीतं मूर्त्तित्रयं येन सः। सप्रेम प्रेमसहितं मनोहरं स्मितं यस्य सः॥ सप्रेमयथा तथा जगादेति वा॥७॥ हंतेति सहर्षं संबोधनं सुमंगलान् सुखरूपान् मृत्युं संसारं दुर्जयं

किंच। योयइति॥ अयमर्थः किंवक्तव्यं। मद्धर्मस्यनुध्वंसइति। यतोलौकिकोपियोयोनिरर्थः व्यर्थआयासः सो
पिमयिपरे निःफलायचेत्कल्प्यते निःकामतयार्पितश्चेत्तर्हिधर्मोभवस्यात्। निरर्थायासेदृष्टांतः। यथा
भयशोकादिहेतोःपलायनाक्रंदनादिक्लेशःतद्वत्॥२१॥ अतोमद्भजनमेवबुद्धेर्विवेकस्यमनीषायाः
श्चातुर्यस्यचफलमित्याह। एषेति। तामेवदर्शयति। सत्यममृतंचामामांअनृतेनासत्येनमर्त्येनवि-

योयोमयिपरेधर्म्मः कल्प्यतेनिष्फलायचेत्॥ तदायासोनिरर्थःस्याद्भयादेरिवसत्तम॥२१॥ एषाबुद्धि
मतांबुद्धिर्मनीषाचमनीषिणां॥ यत्सत्यमनृतेनेहमर्त्येनाप्नोतिमामृतं॥२२॥ एषतेभिहितःकृत्स्नो
ब्रह्मवादस्यसंग्रहः॥ समासव्यासविधिनादेवानामपिदुर्गमः॥२३॥ अभीक्ष्णशस्तेगदितंज्ञानं
मानिव्यद्युक्तिमत्॥ एतद्विज्ञायमुच्येतपुरुषोनष्टसंशयः॥२४॥ सुविविक्तंतवप्रश्नंमयैतदपि
धारयेत्॥ सनातनंब्रह्मगुह्यंपरंब्रह्माधिगच्छति॥२५॥ यएतन्ममभक्तेषुसंप्रदद्यात्सुपुष्कलं॥
तस्याहंब्रह्मदायस्यददाम्यात्मानमात्मना॥२५॥

नाशिनामनुष्यदेहेनइहअस्मिन्नेवजन्म
निप्राप्नोतीतियत्सैवबुद्धिर्मनीषाचेतिबुद्धिर्विवेकः मनीषाचातुर्यं॥२२॥ महाप्रकरणार्थ-
मुपसंहरति॥ एषतइतिद्वाभ्यां॥२३॥ किंच। अभीक्ष्णशस्तावत्ज्ञानं॥ एतदनुसंधानकथनपठनश्र-
वणापराणामप्येतदेवफलंभवतीत्याह॥ चतुर्भिः सुविविक्तमिति। मयासुविविक्तंदत्तोत्तरं॥
एतत्आख्यानमपियोधारयेत्अनुसंदध्यात्। ब्रह्मगुह्यंवेदपिरहस्यं॥२४॥ सुषपुष्कलंय
थाभवतितथा॥ ब्रह्मदायस्यब्रह्मददातीतितथातस्यज्ञानोपदेष्टुः॥२५॥ ॥

नरेष्वीश्वरदृष्टिं कुर्वतः सद्यः फलविशेषमाह। नरेष्विति। समोत्तमहीनेषु स्पर्द्धादयः स्वस्मिन्नहंकारश्च हि निश्चयेन वियंति नश्यंति ॥१५॥ अन्तर्यामीश्वरदृष्ट्या सर्वान्प्रणमेदित्याह विसृज्येति स्मयमानान् हसतः स्वान् सखीन् तथा दैहिकीं दृशं अहमुत्तमः स तु नीच इति दृष्टिं तया दृशा या व्रीडा लज्जा तां च विसृज्य अश्वचांडालादीनपि आप्रणमेत् ॥१६॥ एवं पंचभिः श्लोकैरुक्तायाः समदृष्टेरवधिमाह द्वाभ्यां यावदिति ॥१७॥ तस्य एवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति। कुतः आत्ममनीष

नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् ॥ स्पर्द्धासूयातिरस्काराः साहंकारा वियंति हि ॥१५॥ विसृज्य स्मयमानान् स्वान् दृशं व्रीडां च दैहिकीं ॥ प्रणमेद्दण्डवद्भूमावाश्वचांडालगोखरं ॥१६॥ यावत्सर्वेषु भूतेषु मद्भावो नोपजायते ॥ तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥१७॥ सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया ॥ परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः ॥१८॥ अयं हि सर्वकल्पानां सध्रीचीनो मतो मम ॥ मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः ॥१९॥ नह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि ॥ मया व्यवसितः सम्यङ् निर्गुणत्वादनाशिषः ॥२०॥

या सर्वत्रेश्वरदृष्ट्या या विद्या तया अतः परितो ब्रह्मैव पश्यन् सर्वतः क्रियामात्रादुपरमेत् ॥१८॥ किमयमेवोपायः अस्ति वान्योपी-त्यपेक्षायां सन्निवहवः समीचीनस्त्वयमेवेत्याह। अयं हीति ॥१९॥ भगवद्धर्मत्वलक्षणो मायस्य स-मीचीनत्वमेवोपपादयति। नहीति द्वाभ्यां। अंग हे उद्धव अस्य अनाशिषो निःकामस्य मद्धर्मस्य उपक्रमे सति अण्वपि ईषदपि वैगुण्यादिभिर्नाशो नास्त्येव यतो मयैव निर्गुणत्वादयं धर्मः सम्यग्व्यवसितो निश्चितः न तु मन्वादिमुखेन कथंचित् ॥२०॥ ॥ ॥ ॥ ॥

भा०ए०
१४३

कुतदत्पत आद। मर्न्नेइति। यदात्यक्त समस्तकर्म्मासन्मे निवेदितात्मा भवति। तदा सोमे विचिकीर्षितः विशिष्टः कर्त्तुमिष्टो भवति तेन तस्य अमृतत्वं मोक्षं प्रतिपद्यमानो मया मभूयाय मदैक्याय मत्समानैश्वर्याय तिष्ठन्। कल्पते योग्यो भवति वै ध्रुवं॥३३॥ आदर्शितो योगमार्गो यस्मै सः॥३४॥ प्राणायेनावरुद्धोत्तुभितं चित्तं वैयेण विस्मयवद्धुमन्यमानः आत्मानं कृतार्थं मन्यमानः॥३५॥ मयायमाश्रितआसीत्। सतवसन्निधाने

मर्त्त्योयदात्यक्तसमस्तकर्म्मा निवेदितात्मा विचिकीर्षितोमे॥ तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै॥३३॥ श्रीशुक उवाच॥ स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य बद्धांजलिः प्रीत्युपरुद्धकंठो न किंचिदूचेश्रुपरिप्लुताक्षः॥३४॥ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राजन्बहुमन्यमानः कृतांजलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदं॥३५॥ उद्धव उवाच॥ विद्रावितो मोहमहांधकारो य आश्रितो मे तव सन्निधानात्॥ विभावसोः किंनु समीपगस्य शीतं तमो भीः प्रभवंत्यजाद्य॥३६॥ प्रत्यर्पितो मे भवतानुकंपिनाभृत्याय विज्ञानमयः प्रदीपः॥ हित्वा कृतज्ञस्तव पादमूलं कोन्यं समीयाच्छरणं त्वदीयं॥३७॥ नैव विद्रावितः॥ प्रभवंति किंनु बाधाय समर्था भवंति अजाद्य ब्रह्मणोपि जनक॥३६॥ किंच॥ यद्यपि तव सन्निधानादेवगतः तथाप्यनुकंपिना भवता विज्ञानमयः प्रदीपः प्रत्यर्पितः। स्वमायया पत्हृतः पुनः समर्पितः॥ अतस्तव कृतज्ञः यस्त्वया कृतमनुग्रहं जानाति स कोनाम त्वदीयं पादमूलं हित्वान्यच्छरणं समीयात् आश्रयेत॥३७॥ ॥ ॥ ॥ ॥

143

राम
१४३

समधीयीत उच्चैः पठेत्तु परमं शुचि अन्येषामपि शोधकं पठेत शुद्धेत ॥२६॥ तत्र सम्यक् ज्ञानानुत्पत्तौ पुनरुप
देशमपीमीत्याशयेन पठति ॥ अपीति ॥ अपि किं ॥२८॥ उपधारितमाकल्यमाह ॥ नैतदिति ॥ शठाय वंचका
य ॥२९॥ शूद्राणां यो पितान्वयादिभक्तिः स्यात्तत्तद्धि ब्रूयात् ॥३०॥ एतत्र ज्ञाने च पुमान्कृतार्थो भवतीत्या

य एतत्समधीयीत पवित्रं परमं शुचि ॥ स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन् ॥२६॥ य एतच्छ्रद्धया नि
त्यमव्यग्रः शृणुयान्नरः ॥ मयि भक्तिं परां कुर्वन् कर्म्मभिर्न स बध्यते ॥२७॥ अप्युद्धव त्वया ब्रह्म सखे
समवधारितं ॥ अपि ते विगतो मोहः शोकश्चासौ मनोभवः ॥२८॥ नैतत्त्वया दांभिकाय नास्तिकाय शठा
य च ॥ अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां ॥२९॥ एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च ॥ साध
वे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां ॥३०॥ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते ॥ पीत्वा पी
यूषममृतं पातव्यं नावशिष्यते ॥३१॥ ज्ञाने कर्मणि योगे च वार्तायां दंडधारणे ॥ यावानर्थो नृणां
तात तावांस्तेहं चतुर्विधः ॥३२॥

ह ॥ नैतदिति तत्र दृष्टांतमाह ॥ पीत्वेति पीयूषं स्वादु ॥३१॥ ननु सन्ति
बहूनि ज्ञेयानि तत्तत्फलसाधनानि ॥ सत्यं संत्यभक्तानां ॥ भक्तस्य तु सर्वमहमेव अतो मदेकशरणो
भवेत्याह ॥ ज्ञान इति ॥ ज्ञानादौ यावान् धर्मादिलक्षणश्चतुर्विधोर्थः तावान्सर्वोपि तेहमेव ॥ तत्र ज्ञाने मो
क्षः कर्मणि विहिते धर्मः स्वाभाविके तु कामः ॥ योगे त्वणिमादिसिद्धयः ॥ वार्तायां कृष्यादावर्थः ॥ दं
डनीतावैश्वर्यमिति ॥ सिद्धैश्वर्ययोरपि कामांतर्गतत्वाच्चातुर्विध्यम् ॥३२॥ ॥

हरिमेधसः संसारं हरतिमेधायस्यतेनश्रीकृष्णेनअहं द्वन्द्वपरोपि सुखदुःखविनिर्मुक्तोपि अपक्रमे निर्गमनसमये ४४ किंच दुस्त्यजः स्नेहो यस्मिन् तेन वियोगात्कातरो भीतः। अतएव तत्परिहातुमशक्नुवन्नातुरोविह्वलःसन् कृष्णंकंप्रययौ प्राप्य। ततश्च भर्तुःपादुकेनैव कृपयादत्ते मूर्द्ध्नि बिभ्रत् अतिनिर्बंधरूपयातदाज्ञयातंपुनःपुनर्नमस्कृत्य ययौ। अत्रचपश्चात्तापगमनं भर्तुःपादविश्लेषणात्तमदृत्वा द्वितीयस्कंधोपक्रमोक्तानुसारेण एवबदरिकाश्रमं गच्छन् भगवतः प्रभासयात्रामुपश्रुत्य शनैःपश्चात्गतःसन्नुपसत्तत्निजकुलं भगवंतमकोतिदृष्ट्वातत्कालप्राप्तेन मैत्रेयेणसहपुनःकृपयाभगवतोपदिष्टंतत्वमाकलय्यतदाज्ञातोययाविति द्रष्टव्यं ॥४५॥ विशालां बदरि

श्रीशुक उवाच ॥ सएवमुक्तोहरिमेधसोद्धवः प्रदक्षिणं तंपरिसृत्य पादयोः ॥ शिरोनिधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वन्द्वपरोप्यपक्रमे ॥४४॥ सुदुस्त्यजस्नेहवियोगकातरोनशक्नुवंस्तंपरिहातुमातुरः ॥ कृच्छ्रंययौमूर्द्धनिभर्तृपादुकेबिभ्रन्नमस्कृत्य ययौ पुनः पुनः ॥४५॥ ततस्तमंतर्हृदिसंनिवेश्यगतोमहाभागवतोविशालां ॥ यथोपदिष्टांजगदेकबंधुनातपः समास्थायहरेरगाद्गतिं ॥४६॥ यएतदानंदसमुद्रसंभृतंज्ञानामृतंभागवतायभाषितं ॥ कृष्णेन योगेश्वरसेवितांघ्रिणासच्छ्रद्धयासेव्यजगद्विमुच्यते ॥४७॥ रिकाश्रमं गतःसन् हरेर्गतिमगात्॥ कथंभूतां तेनैव जगदेकबंधुना यथोपदिष्टां तदामृततत्त्वं प्रतिपद्यमाना यातंभक्त्यायचकल्पते वै॥ अतिविद्भ्यगती ज्ञिस्नोमामेष्यसि ततःपरमित्येवमुक्तप्रकारां ॥४६॥ आनंदसमुद्रोभगवद्भक्तिमार्गः तस्मिन्संभृतमेकीकृतं एतद्यःसच्छ्रद्धयाआसेव्यइषदपिसेवित्वावर्त्ततेसविमुच्यतइतिकिंवक्तव्यंतत्संगेनजगदपिविमुच्यतइत्यर्थः ॥४८॥ रामरामराम

किंच॥ दाशार्हादिषु त्वया यः स्वमायया स्नेहपाशः प्रसारितः स त्वयैवात्मतत्त्वज्ञानशस्त्रेणाद्य ।
कृत्तश्छिन्नः ॥ ३८ ॥ एवं यद्यपि त्वया बद्धं कृतं तथाप्येतावत्प्रार्थये इत्याह । नमोस्त्विति । अनुशा
धि अनुशिक्षय अनुशासनीयमाह ॥ यथेति । मुक्तावप्यनपायिनी ॥ ३९ ॥ तदुक्तं मोमंगी

त्वकाध्यस्ते सुदृढः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु ॥ प्रसारितः सृष्टिविवृद्धये त्वया स्वमाययात्मसुबोधहेतिना ॥ ३८ ॥ नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां ॥ यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी ॥ ३९ ॥ श्रीभगवानुवाच ॥ गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं ॥ तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ॥ ४० ॥ ईक्षयालकनंदाया विधूताशेषकल्मषः ॥ वसानो वल्कलान्यंग वन्यभुक्सुखनिस्पृहः ॥ ४१ ॥ तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः ॥ शांतः समाहितधिया ज्ञानविज्ञानसंयुतः ॥ ४२ ॥ मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन् ॥ मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव ॥ अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परं ॥ ४३ ॥

कृत्यं तथापि मयादिष्टो लोकसंग्रहार्थमेतावत्कुर्वित्याह
गच्छेति । आदिष्टो नियुक्तः ॥ ४० ॥ स्नानादेः पूर्वमेव मत्पादतीर्थोदकभूताया अलकनंदाया गंगा
या ईक्षया ॥ वसानः परिदधानः ॥ ४१ ॥ द्वंद्वमात्राणां शीतोष्णादिविषयाणां सुशीलः आर्जवादिस्व
भावः ॥ ४२ ॥ तेत्वया विविक्तं सुविचारितं । तिस्रस्त्रिगुणात्मिका गतीरतिक्रम्य ॥ ४३ ॥ रामराम

तत्प्रपंचयति। अत्याकृष्टुमित्यस्मिन्स्वरूपे लग्नं नयनं परावर्त्तयितुमबला न शेकुः॥ यच्च कर्णरंध्रेण प्रवि
ष्टं सत्सतामात्मनि लग्नं विलिखितमिव तिष्ठति। ततो न सरति निर्गच्छति। यस्य श्रीः शोभा सैव कीर्त्तिमानाकवी
नां वाचा रतिमुल्लासविशेषं जनयति। तेषामानंदजनकत्वात्। जनयतीति किं नु न कवीनां यच्च विश्वरू
पं जिह्मास्तुनस्पर्शयस्थितं दृष्ट्वा युधिमतास्तत्साम्यं सारूप्यं दृशुः प्राप्ताः॥ तत्केन रूपेण त्यजदित्य

प्रत्याकृष्टुं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं॥ यच्छ्रीर्वाचां ज
नयति रतिं किन्नु मानं कवीनां दृष्ट्वा जिह्मा युधि रथगतं यच्च तत्साम्यमीयुः ३ ऋषिरुवाच॥ दि
वि भुव्यंतरिक्षे च महोत्पातान्समुत्थितान्॥ दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं॥ ४॥ श्रीभ
गवानुवाच॥ एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः॥ मुहूर्त्तमपि न स्थेयमत्र नो यदुपुंगवाः ५
स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः॥ वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती॥ ६॥
तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः॥ देवताः पूजयिष्यामः स्नपनालेपनार्हणैः॥ ७॥ ब्रा
ह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयं॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः॥ ८॥

च्चयः॥ ३॥ दिवि सूर्यपरिवेषादीन्॥ भुवि कंपादीन्। अंतरिक्षे दिग्दाहादीन्॥ महोत्पातान्स्व
यमेवोत्पादितत्वादन्यैर्दुःप्रतीकारान्॥ ४॥ यमकेतवे॥ ध्वजा इव मृत्युसूचकाः इत्यर्थः। नो ऽ
स्माभिः॥ ५॥ प्रत्यक् पश्चिमवाहिनी॥ ६॥ अभिषिच्य स्नात्वा॥ ७॥ ब्राह्मणांश्च कृतशांतिकाः संतो
वयं गवादिभिः पूजयिष्यामः॥ ८॥

एवंकृतोपदेशं जगद्गुरुं प्रणमति ॥ भवभयमिति । भवः संसारः भयं च जरारोगादिनिमित्तं तदुभयं निवृत्तानां प्रवृत्तानां च भृत्यवर्गाणां यथायोग्यमपहन्तुं यो ऽमृतद्वयमुपजह्रे उद्धृतवान् । तदेवाह । वेदसारमेकं किं तत् ज्ञानविज्ञानरूपं च तत्सारं श्रेयश्च । भगवतः भृङ्गो यथा पुष्पमकोपयन्नेवामृतमुपहरति यथा स्वयं स्वकृतवेदानुसारेण उदधितश्चैकं तच्चाभयं यथायथं भृत्यवर्गान पाययत् तं नतोस्मीति

भवभयमुपहन्तुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं । अमृतमुदधितश्चापाययद्भृत्यवर्गान्पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोस्मि ॥४९॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे भगवदुद्धवसंवादे बदरीप्रशंसानाम एकोनत्रिंशोध्यायः ॥ राजोवाच ॥ ततो महाभागवत उद्धवे निर्गते वनं ॥ द्वारवत्यां किमकरोद्भगवान्भूतभावनः ॥१॥ ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः ॥ प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् ॥२॥ रम्यापनमः

॥४९॥ येनानुकंपितं विश्वमुद्धवप्रश्ननिर्णयैः । तं वंदे परमानंदं नंदनंदनरूपिणं ॥ इति एकादशे एकोनत्रिंशः ॥ त्रिंशे तु प्रागुपक्षिप्तमौसलं कृत्स्नतो हरिः ॥ स्वधाम गंतुमन्विच्छन् संजहार निजं कुलं ॥१॥ विरागाय पुरा घोरमुपक्षिप्तं हि मौसलं । कथावसाने तत्रैव निःशेषं परिपृच्छति ॥२॥ तत इति त्रिभिः ॥१॥ ब्रह्मशापोपसंसृष्टे कुले सति । अयं भावः भगवति न हि शापः प्रभवति । यादवत्वानुकरणाच्च सोपि कथंचिन्मान्यः ॥ अतः किमकरोदिति लिदे तदुक्तं कथमत्यजदिति सर्वनेत्राणामिति सर्वेंद्रियोपलक्षणं ॥२॥ ॥ रामराम

भा०ए०
१४६

पतंत्यस्ततश्चलंत्यः पताका येषु तै रथादिभिः मिथः समेत्य न्यहनन्त न्यघ्नन् इत्यर्थः । दद्भिर्दन्तैरिव
१५ मिथः समेत्य पंचः प्रद्युम्नसांबादिद्वंद्वैर्भिः । गदो श्रीकृष्णस्य भ्राता एकः पुत्रश्चापरः सौ । सुमित्रा
सुरथौ विति दिद्वौ मार्गे अमुरथ नोमा चा काश्चित् ॥१६॥ मदांधेन मदतमसा वलात्कारिताः ॥१७॥ दाशा

पतत्पताकै रथकुंजरादिभिः खरोष्ट्रगोभिर्म्महिषैर्न्नरैरपि ॥ मिथः समेत्याश्वतरैः सुदुर्म्मदान्यहं
ञ्छरैर्द्दद्भिरिव द्विपा वने ॥१५॥ प्रद्युम्नशांबौ युधिरूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सु
भद्रसंग्रामजितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः ॥१६॥ अन्ये च ये वै निशठोल्मुकादयः
सहस्रजिच्छतजिद्भानुमुख्याः ॥ अन्योन्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृ
शं ॥१७॥ दाशार्हवृष्ण्यंधकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः ॥ विसर्जनाः कुकुराः कुंतय
श्च मिथस्ततस्तेऽथ विसृज्य सौहृदं ॥१८॥ पुत्रा अयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपि
तृव्यमातुलैः ॥ मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वहन्ज्ञातय एव मूढाः ॥१९॥ शरेषु ही
यमानेषु भज्यमानेषु धन्वसु ॥ शस्त्रेषु क्षीयमानेषु मुष्टिभिर्जह्रुरेरकाः ॥२०॥ ता वज्रकल्पा ह्यभ
वन्परिघा मुष्टिना भृताः ॥ जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते ॥२१॥ प्रत्यनीकं मन्यमा
ना बलभद्रं च मोहिताः ॥ हन्तुं कृतधियो राजन्नापन्ना आततायिनः ॥२२॥

र्हादयो नव तत्तद्वंश्याः
अर्बुदा माथुराः शूरसेनाश्च तत्तद्देशीयाः ॥१८॥ भ्रातृभिश्चेति भ्रात्रादिशब्दानां सप्तमीयोगिवा
चित्वात् भ्रातरो मातुलाइत्यादि ज्ञेयाः । मित्रैश्च मित्राणि च अहन् हतवन्तः ॥१९॥ धन्वसु धनुष्षु ज
ह्रुः जगृहुः ॥२०॥ एरका निर्ग्रंथितृणविशेषाः । परिघा लोहदंडाः भृताधृताः । तं च श्रीकृष्णमपि ॥२१॥

रामः
१४६

त्रिविधः प्रकारः ॥ मङ्गलायनञ्ज्ञा । किं च देवद्विजगवां पूजा भवउद्भवहेतुः । देवलोके परमउद्भवो ।
भविष्यतीति भावः ॥९॥ मधुद्विषो वाक्यमाकर्ण्य तथेत्यभिनंद्य उत्तीर्य प्रसमुद्रं ॥१०॥ सर्वश्रेयोपबृंहि
तं इत्यत्र संधिरार्षः । भगवता उक्तैरपि सर्वैः श्रेयोभिः सहितं चक्रुः ॥११॥ पीयत इति पानं मैरेयकं म

विधिरे पत्यचरित्र्य स्नो मंगलायनमुत्तमं ॥ देवद्विजगवां पूजा भवेत्तेषु परमो भवः ॥९॥ इति सर्वे स
माकर्ण्य यदुवृद्धा मधुद्विषः ॥ तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः ॥१०॥ तस्मिन् भगवतादिष्टं
यदुदेवेन यादवाः ॥ चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं ॥११॥ ततस्तस्मिन्महापानं पपु
मैरेयकं मधु ॥ दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः ॥१२॥ महापानाभिमत्तानां वीराणां दृ
प्तचेतसां ॥ कृष्णमायाविमूढानां संघर्षः सुमहानभूत् ॥१३॥ युयुधुः क्रोधसंरब्धा वेलाया
माततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः ॥१४॥ ॥ ॥

दिरा विशेषं मधुसुरसं दिष्टेन दैवेन विभ्रंशितधियः । नत्वा न पयात स्मिन्नस्थाने तदुचितं ।
मिति भावः । यस्य द्रवैः रसैः ॥१२॥ कृष्णमायाविमूढानां मतिमुग्धो हेतुः । संघर्षः कलहः ॥१३॥ त
तो युयुधुः ॥१४॥

जरानामकश्चिल्लुब्धकोमृगायुः। मृगास्यास्यमिवाकारोयस्यतंचरणं ॥३३॥ ब्रह्मशापकृतमेतत्तुनतवापराधइतिचेदत आह। यस्यतवात्मयोगरचितस्वाधीनमायारचितंविरिंच्यः अस्यतनयारुद्रादयश्च येचान्येगिरांपतयोवेदइत्यारःतेपिनविदुःतस्यतेअचिंत्यमायस्यातद्ब्रह्मशापादि अजसाअस

मुसलावशेषायःखंडकृतेषुर्लुब्धकोजरा ॥ मृगास्याकारंतच्चरणंविव्याधमृगशंकया ॥३३॥ चतुर्भुजंतंपुरुषंदृष्ट्वासमकृतकिल्बिषः ॥ भीतःपपातशिरसापादयोरसुरद्विषः ॥३४॥ अजानताकृतमिदंपापेनमधुसूदन ॥ क्षंतुमर्हसिपापस्यउत्तमश्लोकमेनघ ॥३५॥ यस्यानुस्मरणंनृणामज्ञानध्वांतनाशनं ॥ वदंतितस्यतेविष्णोमयासाधुकृतंप्रभो ॥३६॥ तन्माशुजहिवैकुंठपाप्मानंमृगलुब्धकं ॥ यथापुनरहंत्वेवंनकुर्यांसदतिक्रमं ॥३७॥ यस्यात्मयोगरचितंनविदुर्विरिंच्योरुद्रादयोस्यतनयाःपतयोगिरांये ॥ त्वन्माययापिहितदृष्टयएतदंजःकिंतस्यतेवयमसद्गतयोगृणीमः ॥३८॥ श्रीभगवानुवाच ॥ माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहिमे ॥ याहित्वंमदनुज्ञातःस्वर्गंसुकृतिनांपदं ॥३९॥ इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा ॥ त्रिःपरिक्रम्यतन्नत्वाविमानेनदिवंययौ ॥४०॥ दारुकःकृष्णपदवीमन्विच्छन्नाधिगम्यतां ॥ वायुंतुलसिकामोदमाघ्रायाभिमुखंययौ ॥४१॥

कृतयःपाप्योनयोवयंकिंगृणीमःकथंवर्णयामःअ
नस्तदास्तांअस्मांजहीतिभावः॥३८॥ इच्छाशरीरिणेत्यस्यायंभावः॥ शुद्धसत्त्वमयींनिजांश्रीमूर्तिमंतर्धायतस्मातिरकृत्यैवंविडंबनमात्रमिति। एतदेवस्फुटीकरिष्यति। देवादयोब्रह्ममुख्याइत्यादिना ॥४१॥

एरकामुष्टिरूपौ परिघावुद्यम्य ॥२३॥ स्पर्द्धानिमित्तः क्रोधः कुलं क्षयं निन्ये ॥२४॥ पौरुषं योगं परमपुरुषध्यानलक्ष
णं तमेवाह संयोज्येति। मानुष्यं लोकं मर्त्यलोकं मनुष्यरूपतां वा ॥२६॥ धरोपस्थां भूतले। भ्राजिष्णुरूपं ॥२८॥

अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन। एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि ॥२३॥ ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां। स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोग्निर्यथा वनं ॥२४॥ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः। अवतारितो भुवो भार इति मेनेऽवशेषितः ॥२५॥ रामः समुद्रवेलायां योगमास्थाय पौरुषं। तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि ॥२६॥ रामनिर्याणमालोक्य भगवान्देवकीसुतः। निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं ॥२७॥ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया। दिशो वितिमिराः कुर्वन्विधूम इव पावकः ॥२८॥ श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसा। कौशेयांबरयुग्मेन परिवीतं सुमंगलं ॥२९॥ सुंदरस्मितवक्त्राब्जं नीलकुंतलमंडितं। पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ॥३०॥ कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः। हारनूपुरमुद्राभिः कौस्तुभेन विराजितं ॥३१॥ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः। कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं ॥३२॥

तदेवानुवर्णयति। श्रीवत्सांकमिति चतुर्भिः ॥
२९॥ सुंदरस्मितं वक्त्राब्जं यस्मिन् तत्। पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिन् तत् ॥३०॥ वनमा
लया परीतान्यंगानि यस्मिन् तत्। निजायुधैश्च परीतांगं पंकजारुणं वामं पादं दक्षिणे ऊरौ कृत्वा आसी

भा०ए०
१४८

मुनयः सनकादयः प्रजेश्वरा मरीच्यादयः। १ द्विजा गरुडलोकवासिनः पक्षिणः। मैत्रेयादयो वा। २ भगवतो निर्याणं द्रष्टुकामाः संतः परमोत्सुकास्तत्रागमन्। तेषामौत्सुक्यकृतं महोत्सवमाह। साद्धेन। गायंतश्चेति ३ विभूतीरिंद्रादीष्व। पद्मनेत्रे न्यमीलयदित्यत्रायं भावः। पूर्वं ब्रह्मादिभिः सलोकान् लोकपालान्नः पाहि वैकुंठ किंकरानिति प्रार्थितत्वात् इदानीं तु स्वस्वलोकं प्रतिनेतुमागतत्वात्। तद्दुःखं च तेषु दृष्टिपाताद्भवेच्च यितुं समाधिमिव कुर्वन्नेत्रे न्यमीलयदिति ५ योगिनामिव स्वकदेहं तु भ्रमं वारयति। लोकाभिरामामिति। अयमर्थः॥ योगिनो हि स्वकदेहमप्येवं स्वतनुमाग्नेय्या योगधारणया दग्ध्वा लोकांतरं प्रविशं

श्रीशुक उवाच॥ अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः॥ महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः॥ १॥ पितरः सिद्धगंधर्वा विद्याधरमहोरगाः॥ चारणा यक्षरक्षांसि किन्नराप्सरसो द्विजाः॥ २॥ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः॥ गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च॥ ३॥ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः॥ कुर्वंतः संकुलं राजन् भक्त्या परमया युताः॥ ४॥ भगवान्पितामहं वीक्ष्य विभूतीरात्मनो विभुः॥ संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत्॥ ५॥ लोकाभिरामां स्वतनुं धारणाध्यानमंगलं॥ योगधारणयाग्नेय्याऽदग्ध्वा धामाविशत्स्वकं॥ ६॥

ति। भगवांस्तु न तथा किंतु अदग्ध्वैव स्वतनुसहित एव स्वकं धाम वैकुंठाख्यमविशत्। तत्र हेतुः लोकानामभिरामः अभितो रमणं स्थितिर्यस्यां तां जगदाश्रयत्वेन जगतोपि दाहप्रसंगादित्यर्थः। किंच धारणाया ध्यानस्य च मंगलं शोभनं विषयं इतरथा तयोर्निर्विषयत्वं स्यात्। दृश्यते चाद्याप्युपासकानां तथैव तद्रूपसाक्षात्कारः फलप्राप्तिश्चेति भावः॥ इत्थं शरीराभिप्रायेण वा यथा श्रुतमेवास्तु। तत्रापि तु लोकाभिरामामित्यादिविशेषणानामानर्थक्यप्रसंगात्तदप्यदग्ध्वा निरोधा

राम
१४८

248

नृपतिं तत्र दृष्ट्वा तस्य पादयोर्निपपात ॥४२॥ उदीक्षमाणस्य पश्यतः ॥४४॥ निर्याणं योगमार्गेण स्वधामगमनं ॥४६॥ अविताः रक्ष्यमाणाः इन्द्रप्रस्थं गमिष्यथेति वृद्धौ तिपूर्वेणान्वयः ॥४८॥ मन्मायारचनामेतां विज्ञायेति निजधाम्नि मम निरंतरं स्थितत्वात् तथा शोकं मा कुर्विति पदार्थः ॥४९॥

तं तत्र तिग्मद्युतिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिं ॥ स्नेहप्लुतात्मा निपपात पादयोर् रथादवप्लुत्य सबाष्पलोचनः ॥४२॥ अपश्यतस्त्वच्चरणांबुजं प्रभो दृष्टिः प्रणष्टा तमसि प्रविष्टा दिशो न जाने न लभे च शांतिं यथा निशायामुडुपे प्रणष्टे ॥४३॥ इति ब्रुवति सूते वै रथो गरुडलांछनः ॥ खमुत्पपात राजेंद्र साश्वध्वज उदीक्षतः ॥४४॥ तमन्वगच्छन्दिव्यानि विष्णुप्रहरणानि च तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥४५॥ गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः संकर्षणस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां ॥४६॥ द्वारकायां च न स्थेयं भवद्भिश्च स्वबंधुभिः मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ॥४७॥ स्वं स्वं परिग्रहं सर्वं आदाय पितरौ च नः ॥ अर्जुनेनाविताः सर्व इंद्रप्रस्थं गमिष्यथ ॥४८॥ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ॥ मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥४९॥ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः ॥ तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ॥५०॥ इति श्रीभागवते महापुराणे एकादशस्कंधे मौसले त्रिंशत्तमोऽध्यायः

कुलस्य विनष्टत्वात् दुर्मनाः ॥५०॥ इति एकादशे त्रिंशत्तमः ॥ एकत्रिंशे स्वकं धाम जगाम भगवानितः । तमेवानु ययुः प्रीत्या वसुदेवादयस्ततः ।१। देवानप्यद्भुतं विधाय यादोभयोद्देवान् विधाय च ॥ श्रीकृष्णः स्वेच्छया धाम

अभिप्रायापरिज्ञानतः प्रथमं क्लिष्टं दृष्ट्वांते नास्य प्रसक्तेरुक्तं दृष्ट्वा पुनस्तमेवार्थं प्रपंचयति
राजन्निति त्रिभिः। परस्य सर्वकारणस्य तनुभृत्सु यादवादिषु जननाप्ययेहाः आविर्भावति
रोभावचेष्टाः मायया अनुकरणमात्रमवेहि नटो यथाऽविकृत एव नानारूपैर्जन्मा॥

ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः॥ विस्मितास्तां प्रशंसंतः स्वं स्वं लो
कं ययुस्तदा॥१०॥ राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवे-
हि यथा नटस्य॥ सृष्ट्वात्मनेदमनुविश्य विहृत्य चांते संहृत्य चात्मम
हिनोपरतः स आस्ते॥११॥ श्रीकृष्णाय नमः॥ ॥ ॥

दिविडंबयति तद्वत्॥ आस्तां तावद्यादवादिषु जन्मादिशंका यावत् विश्वसर्गनिरोधादिष्वप्य
सावविकृत एवास्त इत्याह। सृष्ट्वेति। आत्मना स्वयमेवेदं जगत् सृष्ट्वांतर्यामित्वेनानुविश्यत्रा
त्ममहिना स्वमहिम्ना आस्ते॥११॥ न पुनरन्यथा मंतव्यं। यतोऽस्मिन्नेवावतारे तत्प्रभावो निरतिशयो दृष्ट इत्याह॥

नदानुसंचरस्वमेवलोकमागमिष्यतीति संभ्रमे ॥ देवादिकृतः सर्वतो दुंदुभिनादपुष्पवृष्ट्यादिम
होत्सवोऽभवदित्याह ॥ दिवीति ॥ भूमेः सकाशात् श्रीकृष्णमनुययुः ७ ॥ तदा श्रीकृष्णेंतर्हिते
सतिकुतोगतइति वितर्कयंतोपिब्रह्ममुख्यादेवादयः स्वधामनिविशंतं श्रीकृष्णं नदद

दिविदुंदुभयोनेदुः पेतुः सुमनसश्च खात् ॥ सत्यंधर्मोधृतिर्भूमेः कीर्तिः श्री
श्चानुतंययुः ॥ ७ ॥ देवादयोब्रह्ममुख्यानविशंतं स्वधामनि ॥ अविज्ञातगतिं
कृष्णंददृशुश्चातिविस्मिताः ॥ ८ ॥ सौदामिन्यायथाकाशेयांत्याहित्वाभ्रमंडलं
गतिर्नलक्ष्यतेमर्त्यैस्तथाकृष्णस्यदैवतैः ॥ ९ ॥ ॥ ॥

शुः । तत्र हेतुः अविज्ञातगतिमिति ॥ कचित्कचिन्नददृशुश्च । ततोऽतिविस्मिताबभूवुरि
त्यर्थः ॥ ८ ॥ अविज्ञातगतित्वं दृष्टांतेनस्पष्टयति सौदामिन्यागतिर्यथामर्त्यैर्नलक्ष्यते । देवै
स्तुलक्ष्यते । तथाभ्रमंडलंहित्वागच्छतः श्रीकृष्णस्यदैवैरपिनलक्ष्यते किंतुनत्यार्यदैरवेत्यर्थः ९ ॥

भा०ए०
१५०

तदेवं भगवता स्वलोकं गच्छता वसुदेवादीनामपि तत्राश्रयउपायश्चिंतितआसीत्तमाह। दा-
रुकइत्यादिना। कृष्णरामौ सुतावपश्यंतः॥१८॥ सदुक्तिभिः सत्योऽवितथाः उक्तयो येषु तैः।

दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः। पतित्वा चरणावस्रैर्न्यषिंचत्कृष्णविच्युतः॥१५॥
कथयामास निधनं वृष्णीनां कृत्स्नशो नृप। तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्छिताः॥१६
तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः। व्यसवः शेरते यत्र ज्ञातयो घ्नंत आननं॥१७
देवकी रोहिणी चैव वसुदेवस्तथा सुतौ। रामकृष्णावपश्यंतः शोकार्त्ता विजहुः स्मृतिं
१८॥ प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः। उपगुह्य पतींस्तात चितामारुरुहुः
स्त्रियः॥१९॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन्। वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्ना
दीन्हरेः स्नुषाः॥२०॥ कृष्णपत्न्योविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः। अर्जुनः प्रेयसः स
ख्युः कृष्णस्य विरहातुरः॥२१॥ आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः। बंधूनां न
ष्टगोत्राणामर्जुनः सांपरायिकं॥ हतानां कारयामास यथावदनुपूर्वशः॥२२॥ राम

250

नाहं प्रकाशः सर्वस्य योगमायासमावृतः। मूढोयं नाभिजानाति लोको मामजमित्यादिभिः
नष्टगोत्राणां नष्टसंततीनां सांपरायिकं पिंडोदकादिकार्यं॥२२॥ ॥

राम
१५०

मर्त्येनेति। यमेन स्वलोकं प्रतिनीतं गुरुसुतं मर्त्येन तेनैव शरीरेण आनयत् आनीतवान्। शरणादः शरणागतरक्षकः। त्वां च ब्रह्मास्त्रदग्धं योरक्षितवान् यश्च अन्तकानामप्यन्तकं ईशं श्रीरुद्रं बाणसंग्रामे जितवान्। यः स्वः स्वर्गं अनयत् नीतवान्। असौ स्वावने स्वरक्षणे अनीशः असमर्थः किं ॥१२॥ ननु यदि समर्थः तर्हि किंचित्कालं अत्रैव तेन वपुषा किं नातिष्ठत्। तत्राह। तथापीति। यद्यपि उक्तप्रकारेणाशेषस्य

मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धं ॥ जिग्येन्तकान्तकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहं ॥१२॥ तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुं वपुरत्रशेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥१३ य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां ॥ प्रयतः कीर्त्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमां ॥१४॥

जगतः स्थित्यादिष्वनन्यहेतुर्निरपेक्ष एव कारणं स्वयं यद्यस्मादशेषशक्तिधृक्। तथापि यादवान् संहृत्य निजं वपुः। अत्र शेषितं अवशेषितं प्रणेतुं कर्तुं नैच्छत् किंतु स्वमेव लोकमनयत् तत्र हेतुः मर्त्येन देहेन किं न किंचित्कार्यमिति स्वस्थानामात्मनिष्ठानां दिव्यां गतिमेव प्रदर्शयन् ॥ अन्यथा तेऽपि दिव्यां गतिमनादृत्य योगबलेन देहसिद्धिं विधायात्रैव रंतुं यतेरन् तन्मा भूदित्येतदर्थमिति भावः ॥१३॥ एतामुक्तप्रकारां पदवीं गतिं ॥१४॥ ॥

भा०ए०
१५१

आदित आरभ्य श्रीकृष्णचरितकीर्त्तनस्य फलमाह। य एतदिति द्वाभ्यां ॥ शन्तमानि परममङ्गलानि।

251

द्वारकां हरिणा त्यक्तां समुद्रो प्लावयत्क्षणात् ॥ वर्जयित्वा महाराज श्रीमद्भगवदालयं ॥२२
नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः ॥ स्मृत्याशेषाशुभहरं सर्व्वमंगलमंगलं ॥२३॥
स्त्रीबालवृद्धानादाय हतशेषान्धनंजयः ॥ इंद्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् ॥२४
श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः ॥ त्वां च वंशधरं कृत्वा जग्मुः सर्वे महापथं ॥२५॥
य एतद्देवदेवस्य विष्णोः कर्म्माणि जन्म च ॥ कीर्त्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते
२६ ॥ इत्थं हरेर्भगवतो रुचिरावतारवीर्य्याणि बालचरितानि च शंतमानि ॥ अन्य
त्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥२७॥ इति श्रीभाग
वते महापुराणे एकादशस्कंधे मौशलकथनं नामैकत्रिंशोऽध्यायः ॥३१॥ राम राम

परमहंसगतौ श्रीकृष्णे ॥२७॥ एवमेकादशस्कंधभावार्थस्य प्रदीपिका ॥ स्वाज्ञानध्वां
तभीतेन श्रीधरेण प्रकाशिता ॥१॥ इत्येकादशस्कंधभावार्थदीपिकायामेकत्रिंशोऽध्यायः ॥३१

राम
१५१

एकादशस्कंधे समाप्तं